X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 28

ACARYA CANDRIKABHIDHANAKA
SARVADEVAPRATISTHA
Title PADDHATI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 28 Subject: Ritual

Title: Ācārya Chandrikābhidhāna Sarva Deva Pratiṣṭhā [illegible]

Author: Vikramasūri Scribe: Ganapati Nārāyan.

Date of the work: — Date of the Ms.: V.S. 1872

Place of the work: — Place of the Ms.: —

Size: 11" by 4'4" Extent: 140 foll.

Language: Sanskrit. Script: Devanagari.

Remarks: Complete

॥ॐ श्रीगणेशाय नमः॥ ॥प्रणम्य गुरुपादाब्जं समासव्यासवर्जिता॥ क्रियते सर्वदेवा
नां प्रतिष्ठापद्धतिर्मया॥१॥ प्रासादस्य तडागानामादौ कर्मक्रियागतं॥ संक्षिप्य परिहृ
यत्वा तत्र ध्वजादीनां तयांततः॥२॥ समाहृत्यान्यतंत्राणि तत्त्वसिद्धपदैस्तथा॥ वाक्यै स्त २
रपि यथाशक्ति शिष्यानुग्रहहेतवे॥३॥ तत्र॥ सर्वांगानां यतः सिद्धिः प्रायेणाचार्यतोन
वेत॥ प्रासादादिविनिर्माणे तत्प्रतिष्ठादिककर्मसु॥४॥ तस्मात्कर्मण्यमाचार्यं दानमा
नादिभिः सुधीः॥ यजमानः प्रवृणुयाद्यादौ वृद्धमते स्थितः॥५॥ आचार्यलक्षणमु १
च्यते॥ आर्यावर्तदेशोद्भवः कुलसाचारदेशजो वा प्रतिष्ठाशास्त्रसत्तत्त्वकोविदो वास्तु
शास्त्रविशारदो वेदपारगः श्रद्धधानः सत्यवचनः प्रसन्नवदनो दक्षः प्रियवचनः शांतः

श्रु संतुष्टः शुचिराचारवान्दर्शनीयो मीमांसकः पाखंडासंसक्तो ब्राह्मणो गृहस्थः पद्महस्तः
प्रासादलिंगमंडपद्वारादिलक्षणज्ञ आचार्योन्वेष्टव्यः॥ एतल्लक्षणसंपन्नाः प्रसक्तोपा
योगिन आचार्याधीना ऋत्विजो द्वारपालाश्चान्वेष्या भवंति॥ व्यसनि वामन किरात कुब्ज
क्रोधन कुनखि श्याव चपलाधिकांगहीनांग पापिष्ठ सौचिक कुटिल व्याधित तार्किक वार्द्धिक
क्रूर काकस्वर खकहृत्ति गुरुदेवद्विजातिनिंदक वृषलीपति साहसिक वैद्य मत्सरि स्मय
नैदिश्याव दंत त्वग्दंत रोगि रुतघ्न पिशुनाश्रुचि पण्यरंगोपजीवि नोजक नास्तिक गणकः
तस्कर पुरोहित उन्मत्त चक सेवक क्लीब धर्मव्रतविवर्जित पण्यस्त्री परदाररतो द्विप्रासंस्कृ
हीन दुश्चर्म व्याध्याकुलालसाति स्थूलातिकृश निर्घृण खल्वाट दद्रुण तिरूसलाति गौरके

करकातसैरजडपङ्गुश्वासखरक्तकुंडगोलकखर्वयवनजस्मांकुरकठिनकायवधश्वारुद्गुक
कुज्योतिर्वित्‌विश्वावंकलंबोष्टवक्रवकनग्नशिस्नबधिरकपिलव्यंगगर्वितकलिप्रिय
परापवादरतविशर्व्ययोपजीविकासिशस्त्रनिष्ठीमंनशीलकाश्मीरकोशलकलिंगकां
तिकामरूपकावेरीकुंकुणकच्छदेशसमुद्भवकुलिंगकुष्ठित्रिविकमेस्लप्रतिछायास्वा
किंचितद्राद्याःश्चनेष्टुमिर्वर्जनीयाः॥ ॥ ॥इतिश्रीरघुसूरिसूनुत्रिविक्रमसूरिविर
चितायांप्रतिष्ठापद्धतौआचार्यलक्षणं॥ ॥अथभूपरिक्षाविधिरुच्यते॥तद्यथा॥शीतका २
लेउष्णस्पर्शाउष्णकालेशीतस्पर्शावर्षासूष्णयस्पर्शासर्वदामृदुस्पर्शावेणवीणाद्यनादि
शुभद्रव्यखनाशुभफलप्रदाभूमिः॥सर्वदाशीतासर्वदोष्णावाखरस्पर्शाऽश्वष्टगालगर्द

भामामिक्षमौडादिविरुद्धद्रव्यखनानाचविरुद्धा॥अथपूर्वेशानोत्तरानामन्यतमस्यांवामध्या प्र
द्वाएतःसर्वत्रवाबाह्यान्मध्येसर्वतःप्लवाशुभप्रदा॥ततोन्यत्रप्लवाविरुद्धेति॥अथशुभेदिनि
कृतोपवासःशुचिस्नातःशुक्लमाल्यानुलेपनोभूपरिक्षणायकृतसंकल्पआचार्यस्तत्र
करिष्यमाणप्रासादादिवास्तुदेवानभ्यर्च्यबलिंदत्वाचम्यप्राणानाचम्यब्राह्मणान्स्वस्ति
मो वाचयित्वावास्तुमध्येसर्वतोहस्तमात्रंखातंकुर्वन्पांशुमुत्किरेत्॥उत्कीर्यमाणायांमु
वि किंमणिमौक्तिकप्रवालस्वर्णफलादिशुभद्रव्यंयदिदृश्यते॥सातस्यकर्तुस्तदाशुभप्र
देति॥नस्थिमांसनाशुभंवानिमित्तंयदिदृश्यते॥तदामध्यमा॥यदिभस्मांगारास्थ्यादिविरुद्धं
दृश्यतेतदामध्यमेति॥अथवातेनोत्किरणेनखातेनरितेसतिकिंचिदुत्करोवशिष्यते॥

पि

यस्यां सा श्रेष्ठा॥ तस्मिन् खातसमे मध्यमा॥ हीने धमेति॥ अथवा आचार्यस्तत्र खाते व्रीह्या
दीनि बीजानि प्रकीर्य किंचित् मृदाछाद्य जलेनासिच्यापरेह्नि जोपायेत्॥ तानि बीजानि
त्रिभिर्दिनैश्चेत्प्ररोहंत्युत्तमा॥ पंचभिः प्ररोहंति चेन्मध्यमा॥ सप्तभिरधमेति॥ अथवा तत
त्या खातमुदकेनापूर्य मध्यगतो पदशतं गत्वा तथैवागत्य पश्येद्यदि तत्समं वारि तिष्ठेत्तदा श्रे
ष्ठा॥ युष्टेन हीनं चेद्भवति तदा मध्यमा॥ ततोपि हीने धमेति तां जानीयात्॥ अथ जातिलक्ष
णं॥ तत्र शुक्लवर्णा समचतुरस्राज्यगंधा मधुरा ब्राह्मी अष्टमांशायतोत्तरा रक्तवर्णा रक्तगंधा २
४३ कषायरसा क्षत्रिया॥ षडंशायतोत्तरा पीतवर्णा गोमूत्रगंधा अतिकषायरसा वैश्या॥ चतु
र्थांशायतोत्तरा कृष्णवर्णा विड्गंधा कटुरसा शूद्रा॥ अतो अन्यथा संस्थाना न्यथा संस्था

श्रू

वर्णगंधरसा मिश्रा पूर्वलक्षणा क्रूरसत्वकृतघ्नाचारभ्रष्टशठस्वभावजनप्राया वर्णाश्रमध
र्मापि च यवस्यं त्यजा॥ नीलवर्णा विषप्रायपार्थिवजला व्याधप्रायजनप्रदा पिशाचप्राया चांडा
ली॥ अथ प्रत्यक्षं जातिलक्षणं चेत् पूर्ववच्चवातं कृत्वा चार्ये श्वेतरक्तपीतकृष्णा निपुष्पा
ण्यादाय प्रदोषमुखे मंत्रैरनिमंत्र्य खाते तां तद्दिक्षु क्रमेण निक्षिप्य पश्चात्तेन्योरक्षां कृत्वा
रात्रिमतिवाहयेत्॥ ततः प्रातरागत्य पश्येद्यद्वर्णानि न मुष्यंति तद्वर्णा सा भूरिति नि
श्चिनुयात्॥ अथवा खातमध्ये प्रदोषसमये कुंभे घृतपूरितमामशरावं विन्यस्य तदुप
रि दिक्षु श्वेतरक्तपीतकृष्णा वर्णाश्चतस्रो वर्तीश्चतुर्भिर्मुख मंत्रैरनिमंत्र्य प्रज्वाल्य
निर्वातपरिश्रितं विधाय रात्रिं क्षपयेत्॥ ततः प्रातरागत्य पश्येत्तत्र यद्वर्णा वर्तिर्न निर्वा

तितद्वर्णसान्ररितिविज्ञानीयात्॥ चतस्रश्चेन्निर्वर्तितत्दांत्यजा॥ शरवाद्युपघातेसतिचां
डालीनिश्चिनुयात्॥ एवंविदित्वासवर्णांपरिगृह्णीयात्॥ तदन्नावेधमवर्णांवा॥ अथजा
त्यनिश्चयश्चेत्स्वजातीशमंत्रेणतत्रकृत्वासवर्णतामानीयपरिगृह्णीयादिति॥ नांत्यजा
नापिचांडालीवर्णिनांस्यात्कथंचन॥ उत्तमाधमवर्णस्यचेतिस्वीकारनिर्णयः॥ अथलक्ष
णएतस्यांनिमित्तैरनुकल्पितः॥ कृत्वास्ववर्णतांवेश्मप्रासादादीनिकारयेत्॥ तीर्थदेशे
महाक्षेत्रेस्वयंभुविसुरेश्वरे॥ देवर्षिस्थापितेक्षेत्रेदेवताद्युपदेशिते॥ जीर्णोद्धारेतडागा ४
दौवृक्षारोपणकर्मणि॥ निमित्तप्रेरणेश्रेष्ठंनतुंभूमिंपरीक्षयेत्॥ इत्यालोच्ययथोचित
परिगृहीतायांमृतस्पर्शादिदोषतरतमभावेनशुद्धिरभिधीयते॥ तद्यथा॥ इषडपहताप

यथालांगलकृष्टाशुद्धाभवति॥ ततोधिकोपघातेदशधालांगलकृष्टायांमासंगोकुलं
वासयेत्॥ अथभूयःकर्षयेत्॥ ततोव्रीह्यादिधान्यानिवापयेत्॥ तेषुफलान्वितेषुसाशुद्धा
भवति॥ अथक्रव्यादचांडालादिभिश्चिरसेविताविद्युदुपहतातापूयशोणितभस्मास्थ्यादि
भिरत्यंतोपहतातस्याःकृष्शुद्धिर्यथा॥ शतशःकर्षितायांनिरन्तरपक्षव्यायांसंवत्सरंगोकु
लंवासयित्वाभूयःकर्षयित्वातिलादीनिधान्यानिवापयेत्॥ तानियदाफलान्वितानि
स्युस्तदापुनःकृष्टासतिशुद्धाकामदाभवति॥ तांसमीकृत्योपलिप्यविधिनापरिग्रहं
तस्यांकुर्यात्॥ ॥इतिश्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौभूप
रिग्रहः॥ ॥अथवक्ष्यमाणेषुकर्मसुअवश्यमपेक्षितत्वात्स्वयमतोवास्तुपूजोच्यते॥ तत्र

वास्तुमंडलोद्धारौंयथांगृहवास्तौप्रकुर्वीतरेखाद्दशदशैवतु॥ब्रह्मानवपदोदिक्षुमरीच्या
द्यास्त्रिकोष्ठकाः॥कोणेष्वेकैककोष्ठस्थाःपंचपंचद्विकोष्ठकाः॥पंचपंचतथादिक्षुबहिःपंक्तौ
जयादिकाः॥मंडलेस्याच्छतपदेमरीच्याद्याद्दशांघ्रिकाः॥ब्रह्माषोडशकोष्ठस्थःकोणेष्व
ध्यर्धकोष्ठकाः॥अष्टावापादयोदेवाःशेषास्त्वेकैककोष्ठकाः॥रेखाषोडशकर्तव्यादेशादौ
वास्तुमंडले॥कोणेषुसप्तकोष्ठस्थाःतदंतःपंचकोष्ठकाः॥चतुर्गिरिापवत्साद्याःपर्जन्या
द्याद्विकोष्ठकाः॥ब्रह्माचैकोनपंचाशत्कोष्ठैर्दिक्षुचतुर्दश॥रेखानवनवैवात्रप्रासादेवा ५
स्तुमंडले॥ब्रह्माचतुष्पदोह्यर्धकोष्ठस्थाःकोणसंस्थिताः॥तेषामुनयतोबाह्येदेवाः
सार्धपदाःस्मृताः॥मरीच्याद्याजयंताद्याद्विपदाविंशतिस्मृताः॥तत्रादौपूजयेद्वास्तुं

वेदास्त्रेरुद्रनाजिते॥कोणेषुत्रिपदाःपूज्याईशाग्निपितृवायवः॥एकैकपदमारूढाःपर्जन्याद्या
यथातथं॥आपाद्याःकोणकोष्ठस्थाःमरीच्याद्यादशानुगाः॥ब्रह्मामध्यप्रदेशेचपंचविंशति
कोष्ठके॥यजेद्वास्तुंप्रतिष्ठायांवारुण्यांमंडलेस्थने॥परिगृहीतभूमध्येप्रारंभेतुयथाविधि॥ए
काशीतिपदेब्रह्मानवकोष्ठैर्यमादयः॥अष्टकोष्ठाश्चचत्वारोदिक्ष्वन्येपद्विकामताः॥रूपेषुपु
नरन्यथावास्तुकथ्यते॥अत्रापिपूजयेद्वास्तुंबिंबेभास्करनाजिते॥ईशस्त्वाग्निमरुतश्चैव
पितृरोगैर्मरुद्दिशि॥ईशादीशांतकोणेषुसार्धद्विपदनायकः॥पर्जन्याद्यास्तुपादस्थाआपा
द्याःपादयुग्मकाः॥नानुनागामरीच्याद्याब्रह्माषड्विंशदंशगाः॥चरक्याद्याविदिक्षुस्युःस्कं क्या२
दाद्याश्चदिक्षुपूर्ववत्॥इत्थंत्वावास्तुःकथ्यते॥सप्तधावीनाजितेगर्नेकोणपार्श्वैर्द्विकोष्ठकाः॥

त्रिपदास्तु मरीच्याद्या ब्रह्मा नवपदो मतः ॥ विदिक्ष्वर्धपदाः प्रोक्ता अन्ये तु पदिका मताः ॥ तत्र प
दविशेषनिष्ठो देवतापदे विशेषोपदेशो यथा ॥ मध्यपदे ब्रह्मा स्यात्तस्मादर्यमा स्थितः ॥ प्राच्यां
मेकांतरात्सदक्षिणमस्मात्सविता विवस्वांश्च ॥ विबुधाधिपतिस्तस्मान्मित्रोऽथ राजयक्ष्मना
मा च पृथ्वीधरापवत्सावित्येते ब्रह्मणः परिधौ ॥ आपो नामैशानकोणे होता शने च सावित्र्यं ज
यंत ईति नैऋते रुद्र आनिले त्वंतरपदेषु ॥ अथ बाह्यपरिक्षेपे ॥ शिखिपर्जन्यजयंतेंद्रसूर्य
सत्यभृशांतरिक्षश्च ॥ ईशानाद्याः क्रमशो दक्षिणपूर्वेनकोणेषु पूषा वितथगृहक्षतयमगं ६
धर्वारिव्यभृंगराजमृगाः ॥ पितृदौवारिकसुग्रीवकुसुमदंतांबुपत्यसुराः ॥ शोषोथपापयक्ष्म
रोगाः कोणे ततो हि मुख्योच भल्लाटसोमभुजंगास्ततोदितिदितिरिति क्रमशः ॥ अथ वास्तुमंड

लबाह्ये ॥ ईशानकोणादारभ्य कोणेषु चरकी विहासी नामा ॥ पूतना पापराक्षसी चेति ॥ अथ पूर्वादि
दिक्षु क्षेत्रपालचतुष्कं यथा ॥ स्कंदार्यमाजृंभः पिलिपिच्छो दिक्षु बाह्यतो देवाः ॥ ततः ईशादिलोक
पालांश्च पूजयेत् ॥ अथ मत्स्यपुराणे ॥ प्रासादादीदृशाः सूत कर्तव्याः श्रुतिमिच्छता ॥ प्रमाणं च ल
क्षणं तद्वद्विस्तरतोऽधुना ॥ सूत उवाच ॥ अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयं ॥ वास्तोः
परीक्षणं तद्वद्वास्तुदेशो विचक्षणः ॥ वास्तूपशमनं कुर्यात्समिद्भिर्बलिकर्म च ॥ जीर्णोद्धारेत
योद्यानेतथा गृहनिवेशने ॥ द्वारनिर्वर्तने तद्वत्प्रासादेषु गृहेषु च ॥ वास्तूपशमनं कुर्यात्पूर्वमेव वि
चक्षणः ॥ होमः स्विमे खले कार्यः कुंडे हस्तप्रमाणके ॥ यवैः कृष्णतिलैः स्तद्वत्समिद्भिः क्षीरवृक्ष
जैः ॥ पालाशैर्वारुणैस्तद्वत्कुशोदुंबरमयैरपि ॥ दधिक्षीरयुतैश्चैव मधुसर्पिः समन्वितैः ॥ कार्यस्तु

पंचभिर्बिल्वैर्बिल्वबीजैस्तथापि वा ॥ होमांते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् ॥ तद्विशेष
नैवेद्यमिदं दद्यात्क्रमेण तु ॥ ईशकोणे घृताक्तान्नं शिखिने च निवेदयेत् ॥ ओदनं स्यात्पलं द
द्यात्पर्जन्याय घृतान्वितं ॥ जयाय च ध्वजं पीतं पैष्टं कूर्मं च विन्यसेत् ॥ इंद्राय पंचरत्नानि पैष्टं
च कुलिशं तथा ॥ वितानकं च सूर्याय धूम्रं सक्तुं तथैव च ॥ सत्याय घृतगोधूमं भक्ष्यं दद्याद्भृशा
य च ॥ शष्कुलीं चांतरिक्षाय दद्यात्सक्तुं च वायवे ॥ लाजा पूष्णे तु दातव्या वितथे चणकौ
दनं ॥ गृहक्षताय मध्वन्नं यमाय पिशितोदनं ॥ गंधोदकं तु गंधर्वे भृंगे मेषस्य जिह्वकां ॥ मृगा ७
य यावकं दद्यात्पितृभ्यः कृसरं तथा ॥ दौवारिके दंतकाष्ठं पैष्टं कृस्नबलिं तथा ॥ सुग्रीवे पूपकं
दद्यात्पुष्पदंताय पायसं ॥ कुशौबेन संयुक्तं तथा पद्मं च वारुणे ॥ पीठं हिरण्मयं दद्यादसुरा

स्तं

य

य सुरासवं ॥ घृतोदनं तु शोषाय यवान्नं पापयक्ष्मणे ॥ घृतलड्डुकं रोगाय नागपुष्पं पुणवते ॥
भक्ष्यं मुख्याय दातव्यं मुद्गौदनमतः परं ॥ भल्लाटस्थानके दद्यात्सोमाय मधुपायसं ॥ नागाय शा
लिजं पिष्टं चादित्यै लोपिकां तथा ॥ दितेस्तु पूरिकां दद्यादित्येवं वा ततो बलिं ॥ क्षीरमापाय
पृ दातव्यमापवत्साय वै दधि ॥ सवित्रे गुडपूपाश्च जयाय घृतचंदनं ॥ विवस्वते पुनर्दद्याद्रक्तचंदन
पायसं ॥ हरितालौदनं दद्यादिंद्राय घृतसंयुतं ॥ घृतोदनं तु मित्राय रुद्राय घृतपायसं ॥ आमं मां
सं तथा पक्वं देयं स्याद्राजयक्ष्मणे ॥ पृथ्वीधराय मांसानि कूष्मांडानि प्रदापयेत् ॥ शर्करापायसं
दद्यादर्यम्णे पुनरेव तु ॥ पंचगव्यं यवाश्चैव तिलाक्षतहविश्चरुं ॥ भक्ष्यं भोज्यं च विविधं ब्रह्मणे वि
निवेदयेत् ॥ एवं संपूजिता देवाः शांतिं कुर्वंति वै सदा ॥ सर्वेषां कांचनं दद्यात्ब्रह्मणे गोपयस्विनीं ॥

ज्यं

राक्षसीनांबलिंदद्यात्मांसोदनबलिंतथा॥ईशानभागमाश्रित्यचरक्यैविनिवेदयेत्॥मांसोद
नंस्वनुरुधिरंहरिद्रोदनमेवच॥आग्नेयींदिशमाश्रित्यविदार्यैविनिवेदयेत्॥दध्योदनंसरुधिरं
मत्स्यखंडैश्चसंयुतं॥पीतरक्तंबलिंदद्यात्पूतनायैतुनिर्ऋते॥वायव्येपापराक्षस्यैमत्स्यमांससुरा
सवं॥पायसंवापिदातव्यंस्वनाम्नासर्वतःक्रमात्॥नमस्कारांतयुक्तेनप्रणवाद्येनसर्वतः॥उ
ग्रसेनंतुपूर्वेणडामरंदक्षिणेतथा॥पश्चिमेचमहाकालंपिलिपिच्छंतथोत्तरे॥पूजनीयंप्रयत्ने
नक्षेत्रपालचतुष्टयं॥ततःसर्वौषधीःस्नानंयजमानस्यकारयेत्॥द्विजांश्चपूजयेद्भक्त्यायेचा ८
न्येगृहमागताः॥एतद्वास्तूपशमनंकृत्वाकर्मसमारभेत्॥प्रासादभवनोद्यानप्रारंभेपरिवर्त्तने
पुरेवेश्मप्रवेशेचसर्वदोषापनुत्तये॥वास्तूपशमनंकृत्वासूत्रेणपरिवेष्टयेत्॥रक्षोघ्नपावमा

नेनसूक्तेनभवनादिकं॥नृत्यमंगलवाद्यंचकुर्याद्ब्राह्मणवाचनं॥अनेनविधिनायस्तुकुरुतेसंव
सरंबुधः॥गृहेवायतनेकुर्यान्नसदुःखमाप्नुयात्॥नचव्याधिभयंतस्यनचबंधुधनक्षयं॥जीवे
द्वर्षशतंसाग्रंस्वर्गेकिल्पंचतिष्ठति॥॥इतिश्रीरघुसूरसूनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठाप
द्धतौवास्तूपशमनंनाम॥॥अथप्रासादेकरिष्यमाणेभूपरिग्रहणविधिरुच्यते॥तत्रकालनि
र्णयः॥भूमेरूपरिगर्ताखातशिलान्यासध्वजोच्छ्रयात्॥यारेच्छायेचकुर्वीतजीर्णोद्धारंचसर्वदा
॥अथशुभेऽहनिदेवंविप्रंप्रपूज्ययजमानगृहात्सदारयजमानस्तपस्यान्वितआचार्यःशुक्ल
१२ वासाःशुक्लमाल्यानुलेपनोब्रह्मघोषेणतत्रगत्वापूर्वरचितमंडपेद्वारपूजादिनिर्वर्त्यअघोर
णतदस्त्रेणवांतदर्थंतिस्यार्द्धंवातिलैर्हुत्वाकरिष्यमाणप्रासादादिभूमौसमायांवर्द्धमानादि
सहस्रं

क्रसाधनप्रकारेणप्राच्यादिसाधयित्वासुवर्णेनदध्यक्तैःसमुच्चितैर्वाप्रदक्षिणंरेखांकृ
त्वाचतुःषष्टिकोष्ठकादिक्षेत्रंकृत्वामध्यकोष्ठादीशानकोणेसप्तधान्यपुंजंकृत्वासितशुसूत्रगं
धवस्त्ररत्नफलपुष्पधान्यौषधियुतंवारिपूर्णमव्रणंकलशंनमःशंभवायेतिप्रतिष्ठाप्यकल
शलिंगेनमंत्रेणशिवंगंधपुष्पधूपदीपनैवेद्यैःसंपूजयित्वामध्यपदेचतुःषष्टिपदादिकेक्षेत्रेपू
र्वोक्तविधिनावास्तुपूजांबाह्यंतांकृत्वाइंद्रादिलोकपालेभ्योनिजमंत्रैःक्षेत्रस्यदिक्षुगंधा
दिपूर्वकंबलिंतूर्यघोषेणत्र्यंबकमितिमंत्रेणाभ्यश्चदत्वामूलमंत्रैश्चपुष्पैःश्वेतैःशिवंपूजयि ९
त्वापुनर्दिग्विदिक्षुबलिंदद्यात्॥ तद्यथा॥ देवताभ्यःपितृभ्यश्चभूतेभ्यःसहजंतुभिः॥ एतत्स्था
ननिवासिभ्यःप्रयच्छामिबलिंनमः॥ ततश्चाचम्यप्राप्तलग्नेचान्यंकुंभंगंधादिभिर्भूषितंव

स्त्रयुगच्छन्नंतोयपूर्णमत्रतोपरिसंस्थाप्यतत्रशिवमिष्ट्वामंत्रविदाद्विजेनचयाहयित्वागीत
वादित्रब्रह्मघोषेणक्षेत्रस्यपूर्वसीमानंगत्वातत्रक्षणंस्थित्वागणेशादीन्स्मृत्वाशिवकोणात्त
प्रभृतिपरितःविपुलासीमांतचिंह्ना।निशांतिसूक्तंपठन्सिंचन्प्रदक्षिणंभ्रामयेत्॥ याव
दीशानकोणं॥ ततोभूमेरर्घदानेनासनसंरक्षंयजमानैःसाधुप्रयोगेणभूपरिग्रहंकुर्यात्
॥ ततःआचार्यःशिवकलशसंपूजामुपसंहृत्यतेनोदकेनयजमानंसगोत्रंएभिर्मंत्रैःअभिषिं
चेत्॥ सुरास्त्वांअभिषिंचंतुयेचसिद्धाःपुरातनाः॥ ब्रह्माविष्णुश्चशंभुश्चसाध्याश्चसमरुद्गणाः
॥ आदित्यावसवोरुद्राअश्विनौचभिषग्वरौ॥ अदितिर्देवमाताचस्वाहासिद्धिःसरस्वती॥ की
र्तिर्लक्ष्मीधृतिःश्रीश्चसिनीवालीकुहूस्तथा॥ दितिश्चसुरसाचैवविनताकद्रुरेवच॥ देवपत्न्य

ह

श्वयानोक्तादेवमातरएवच॥सर्वास्त्वामभिषिंचंतुभूतानाश्चास्यरसांगणः॥नक्षत्राणिमुहूर्त्ताश्चप
क्षाहोरात्रसंधयः॥संवत्सरादिनेशाश्चकलाकाष्ठालवक्षणाः॥सर्वेत्वामभिषिंचंतुकालस्यावयवाः
शुभाः॥वैमानीकाःसुरगणाःमनवःसागरैःसह॥सरीतश्चमहाभागा॥नागाःकिंपुरुषास्तथा॥वै स्ता॰
खानसामहाभागाद्विजावैहायसाश्चये॥सप्तर्षयःसदाराश्चध्रुवस्थानानियानिच॥मरीचिरत्रिः ति
पुलहःपुलस्त्यःक्रतुरंगिराः॥भृगुःसनत्कुमारश्चसनकोथसनंदनः॥सनातनश्चदक्षश्चजै
गीषव्योनगंधरः॥एकतश्चद्वितश्चैवत्रितोजाबालिकाश्यपौ॥दुर्वासादुर्विनीतश्चकण्वकात्या १०
यनस्तथा॥मार्कंडेयोदीर्घतपाःशुनःशेपोविदूरथः॥और्वःसंवर्तकश्चैवच्यवनोत्रिपराशरः
द्वैपायनोयवक्रीतोदेवरातश्चसानुजः॥प्रजापतिर्दितिश्चैवगावोविश्वस्यमातरः॥पर्वतास्तरवः

कल्याःपुण्यान्यायतनानिच॥वाहनानिचरत्नानिलोकाश्चापिचराचराः॥अग्नयःपितरस्ता ग्न
राजीमूताःखंदिशोप्सुराः॥एतेचान्येचबहवःपुण्यसंकीर्त्तनाश्चये॥तोयैरेतैःपवित्रैश्चमंत्रौ
षधिबलान्वितैः॥अभिनेस्त्वामभिषिंचंतुसर्वोत्पातनिबर्हणैः॥इत्थंनिषिक्तोयजमानश्चा
चार्यमन्यांश्चब्राह्मणान्यथाशक्तिपूजयित्वातान्गंधपुष्पवस्त्रादिनापरितोषयेत्॥ ॥
इतिश्रीरघुसूरिसुनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौनृपरिग्रहः॥ ॥अथप्रासा
त्र दादीनांस्तूपपातविधिरुच्यते॥यजमानानुकूलेपुण्यर्क्षेशुभनिमित्तेसतिपरिस्थिहितप्रासा
दादिक्षेत्रात्सौम्यदेशेवाकृष्टेपराह्नेवासुगुप्तेदेशेशुचिःस्नातोभूतोदेशीकस्तत्रप्रवि।
श्य ष्यपंचरत्नसर्वौषधिधान्यचंदनवारिपूर्णंचंदनचर्चितंवस्त्रकंठंपुष्पफलैर्युक्तंप्रसस्तमव श

ण्डं दद्यात् कुंभं सप्तधान्यपुंजोपरि स्थाप्य मंगलनिस्वनै राजिष्ठेति विन्यस्य तस्मिन्विश्वकर्म्मन्हवि ८
षेति विश्वकर्माणं आहूय च आवाहनासनपाद्यादिना संपूज्य परस्मै लोहमुष्टिं मानहस्तं मौं
जं कौसं बल्वजं शाणं कार्पासं वा चतुर्थ्यविपरिणाहं ग्रंथिवर्जितं सूत्रं पोन्नामेक यजमानहस्तेन सं
तानयन्निर्व्रणान्सुदृढान्सुतीक्ष्णान्मूलभागान्वितांश्चतुरस्त्रानाचार्यहस्तमात्रान्द्वेष्टेण
नषडंगुलांश्च चतुरोधोमूलानूर्ध्वाग्रान्कलशाद्युत्तरोत्तरान्स्थापयित्वा परस्मादीनिनिज
नाममंत्रैः शंकून्ब्रह्मादिलोकपालमंत्रैः गंधादिभिः पूजयित्वा विश्वकर्माणं विसृज्य रात्रौ पुष्य ११
वेधेन चित्रास्वात्यंतरेण वा प्राचीं साधयेत्॥ तद्द्रवाभत्स्य योगेन ध्रुववेधेन चोत्तरां॥ अथवा
विष्कवर्तिनिर्मलेव्योम्नि दिवसोदये समे सुस्लक्ष्णाम्भूतले द्वादशांगुलं षडंगुलं वेष्टनं शंकु

विन्यसेत्॥ तदायतं सूत्रमेवातस्य परितो द्वादशांगुलसूत्रभ्रमेण मंडलरेखां कुर्यात्॥ तत्र शं
कुच्छायया दिशो साधयेत्॥ तद्यथा॥ तत्र मंडलरेखायां प्रविशंती शंकुछाया पश्चिमभागे चि
ह्नयेत्॥ निष्क्रमंती पूर्वे च॥ ततः शंकुमुपनीय प्राक्प्रत्यगायतं सूत्रं प्रसार्य तेन सूत्रेण प्राक्प
श्चिमे जानीयात्॥ तत्सूत्रं पूर्वसंकोन्यस्य पश्चिमशंकुगमं धृत्वा प्राक्क्रमेणाष्टतमेकं कु
शं र्यात्॥ पुनस्तदेव सूत्रं पश्चिमशंकौ विन्यस्य पूर्वसंकुगमं धृत्वा पश्चिमक्रमेणापरं दृष्टत्मं भ्रमेणानि
ष्पादयेत्॥ ततो दृष्टद्वयरेखासंगमे दक्षिणोत्तरतो मत्स्यो उत्पद्यते॥ तन्मुखपुच्छरज्जुप्रसारणे
न दक्षिणोत्तरे विजानीयात्॥ अथ तत्रैस्य क्षेत्राविभजनीयवर्द्धमानेन विंशोपि सूत्रद्वययोग
नतत्र चतुःसूत्रपातेन चतुरस्त्रं पातायते दिक्षु चिन्हानि सर्वाणि जगती क्षेत्रबाह्यतः शिलादि

समुत्कीर्णप्रासादनिष्पत्तयेचिरंधारयेत्॥ततोवह्न्यादिकोणेषुचतुरःशंकून्निवेश्यपरंसूत्रमी
शशंकुंबध्वाप्रादक्षिण्येनाग्नेयादिशंकुंसूत्रवेष्टनेनयेत्यावदीशानशंकुं॥ततस्तत्रदृढं
बध्नीयात्॥प्रासेलग्नेविश्वकर्माणंविज्ञाप्यमधुसर्पिर्दधिक्षीरैःलिप्तमूलानलक्तककृतत्रि
शूलांश्चंदनलिप्तांस्त्रिसूत्रावेष्टितानधोमूलानूर्ध्वाग्रांश्चतुरःशंकूनस्वीकृतप्रासा
दादिक्षेत्रस्यवह्न्यादिकोणेषुविन्यसेत्॥तद्यथा॥शंकून्ग्राहयित्वाचाचार्योवहिर्दि
शंगत्वासनेवस्वच्छदेशप्राङ्मुखउपविश्यदक्षिणेनपाणिनाशंकुंसमुत्थाप्यवाममुष्टि १२
नागृहीत्वाभूम्यामवकंदृढंकृत्वाअष्टकृत्वोऽष्टमंगलसिद्धयेवक्ष्यमाणेनायोमंत्रजपं
न्निमित्तमीक्षमाणःताडयेत्॥तत्रहतमृताद्रिशाहृश्रवणेपाषंडादिदर्शनेवामूकृत्वै

स्थित्वापुनरष्टकृत्वस्ताडयेत्॥तत्रमंत्रः॥उविशंतुभूतलेनागालोकपालाश्चकामदाः
अस्मिंस्थानेत्रुतिष्ठंतुआयुर्त्वनैर्बलकराःसदा॥इतिघाताष्टकमाचार्योदद्यात्॥ततःप्र
धानशिल्पीताडयेत्॥यथाक्रमोप्रविशयेत्॥सकृदाहतोयदिनविशेत्॥अथसर्वोपिविशे
त्तितदानकर्मनिष्पत्तिर्निष्पिन्ननाशोवायदिशनैर्विशेत्कर्मसिद्धिःस्यात्॥निघ्नतेचेद्यजमा
नस्यश्रेष्ठःपुत्रोनार्यावाविनश्यति॥नज्यतेचेत्स्वामिनोनाशःपूर्वतःपणतेकीलकेधनंस्या
त्॥आग्नेयेअग्निभयं॥याम्येनिर्धनता॥नैर्ऋत्यांराक्षसभयं॥वारुण्यांधनहानिं॥वायव्येरो
गः॥सौम्येसुखं॥ईशान्येधनधान्यादिसंपत्॥यदिमस्तकेकुंचितःपुत्रपौत्रादिवृद्धिःहस्तता
डनंप्रच्यवतेताडयितुर्भ्रंशःएवमपरानूशंकुंताराप्यप्रागधिवासितंगाढमीशानशंकौबध्नी

ता

यात्॥यथासंकुंनमुंचति॥भ्रष्टेपुत्रविनाशः॥छिन्नेस्वामिनोनाशः॥तस्मात्शंकोर्दिगु
णवेष्टनेनशादद्भिरण्येनसूत्रप्रसारणंपूर्ववत्कुर्यात्॥सुखेनसर्वतश्चतुरस्रंसूत्रयित्वा
ग्नेयादिकीलकेषुतन्तुखेभूत्वाबलिंचतुर्निर्मितैःस्वाहाकारांतैर्दद्यात्॥ॐअग्निभ्योन
यसर्पेभ्योयेचान्येतान्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामि~~सर्वेभ्यस्त्वं~~चपुण्यमोदनमुत्तमं
नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः॥बलिंतेभ्यःप्रयच्छामिसर्वेगृह्णंतुमंत्रितं॥
ॐनमोवायुरक्षोभ्योयेचान्येतान्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामिगृह्णंतुपुण्यमोदनं १२
रुद्रेभ्यश्चैवसर्वेभ्योयेचान्येतान्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामिगृह्णंतुसततोत्सुकाः
॥सर्वेगृह्णंतुवेतुष्टाःस्वाहाकारांतयोजिताइति॥ततश्चाचम्यतत्रसमयेदेवेचतुःषष्टि

पदमेकाशीतिपदादिकंवावास्तुमंडलंविन्यस्यवास्तुपूजांकुर्यात्॥तद्यथा॥उत्तराभिमु
खउपविश्यप्राणायामंकृत्वाकृतसकलीकरणआचार्योर्घपात्रंसाधयित्वाआत्मानं
देवरूवयित्वालक्ष्मीपूजांकृत्वाअर्घादिकेनवास्तुपूजाद्रव्याणिसंप्रोक्ष्यअस्त्रमंत्रेणजलैर्दे
र्दैःपरितोवास्तुभूमिंमुल्लिख्यसर्वत्रांभसाभ्युक्ष्यपुनर्गंधवारिणासंसेचयेत्॥वास्तुदे
वतास्थानानिसर्वाणिपुष्पाक्षतैश्चिह्नयित्वासंकुस्थानेयेदेवास्तान्पूजयेत्॥ब्रह्मस्थाने
संमार्ज्यगंधोदकेनचतुरस्रंमंडलंकृत्वाततःपुनश्चतुरस्रंअक्षतैःकृत्वातत्रस्योना
पृथिवीतिसर्वांगांप्रमदारूपधारिणींलोकधात्रींयुवतींसर्वाभरणभूषितांप्रहृष्टाननां
पृथिवीमावाह्यनावयित्वागंधादिभिःपूजयित्वाततोवास्तुपुरुषंसर्वदेवमयंध्यात्वावा

स्तोष्पत इति मंत्रेण वाह्य तत्र गंधादिभिः पूजयित्वा ब्रह्मस्थाने दत्ताधारं कृत्वा सौवर्णं रा
जतं ताम्रं मृन्मयं वा सुदृढं नवं सर्वौषधियुतं पूर्वं जलेन संपूर्णं धूपधूपितं आजिघ्रेति प्रति
ष्ठाप्य ब्रह्मकलशं ब्रह्मजज्ञानमिति तत्र परात्परभावेन ब्रह्माणं ध्यात्वा गंधादिनोपचारैरा
तेन सपरिवारं पूजयित्वा ब्रह्मन्नमस्तेस्त्विति विसृज्याथ ब्रह्मन्वास्तुपूजां करिष्य इति कुरुष्वेति लब्धा
नुज्ञो वास्तुदेवान्स्वस्थानस्थान् विविधगंधपुष्पाद्यैरर्चयित्वा विविधभक्ष्यभोज्यैर्ब्राह्मणान्
पूजयित्वा वास्तुदेवांश्च ततो बहिः सार्वभौतिकं दिग्बलिं दत्वा च मध्यवास्तुभूमिं प्रविश्यै १४
शान्यामुदङ्मुख उपविश्य स्थंडिले परिसमूहनादिकं कृत्वाग्निं प्रतिष्ठाप्य आज्यभागांतं कृ
त्वाहुतद्रव्यैः स्तिलैस्त्वमिष्टप्रथा इति मंत्रेणाष्टोत्तरशतं होमं कृत्वा वास्तुदेवानां प्रणवा

म दिभिः नाममंत्रैः स्वाहांतैः दशदशाहुतीर्हुत्वा ब्रह्मांगैश्च होमं विधाय पूर्णां दत्वा ब्रह्मणे होमं
विनिवेद्य प्रणम्य विसृज्याथाष्टोत्तरशतमघोरेण प्रायश्चित्तार्थं हुत्वा पुनर्बहुरूपेणाष्टोत्तर
शतं च पूर्णाहुतिं दत्वा ब्राह्मणान्प्रणम्य देव नमस्तेस्त्विति विसृज्याथ ब्राह्मणान्स्वस्तिवाचयित्वा कलश
पूजामुपसंहृत्य ईशानादिकलशमादाय प्रादक्षिण्येन सूत्रमार्गेण तोयधारां भ्रामयित्वा कै
स्वस्थाने कलशं प्रतिष्ठाप्य तेनैव मार्गेण सर्वबीजानि प्रक्षिपेत्। ततः कुद्दालकपीठमानीय ब्र
ह्मकलशस्योत्तरतो विन्यस्य अर्घोदकेन प्रोक्ष्य गंधादिनाभ्यर्च्य निम्ननाम्ना चतुर्थ्यंतेन संपूज्य
त्रिसूत्रेण वेष्टयित्वा प्राग्ग्रे कलशमाचार्यो गृहीत्वा शांतिपाठेन तूर्यघोषेण च गृहीतपीठ
ककुद्दालेन शिल्पिना सह वास्तोराग्नेयकोणे गत्वा दक्षमुखः शिल्पी कुद्दालेनाथ मध्यात्मुखे ज्य १

ना

नवहिःपदंखनेत्॥ ततोमृदमुद्धृत्यवैणवेननवेनसुबद्धेनपूर्वकल्पितपीठकेनससहकृत्वोनै
ऋत्यांदिशितत्कीरंप्रक्षीपेत्॥ ततःआचार्यःशांतिकलशोदकेनतत्खातमासिच्यभूमिं
सर्वत्रसंप्रोक्ष्यकुद्दालादिकमाज्ञाव्यगंधादिकैःपूजयेत्॥ अथयजमानःआचार्यादीन्दक्षि
णादिभिःसूत्रधारादीन्वस्त्रादिनापरितोषयेत्॥ ॥इतिश्रीरघुसूरिसुनुत्रिविक्रमसूरिवि
रचितायांप्रतिष्ठापद्धतौसूत्रपातः॥ ॥अथापरेह्निप्रासादादिभूमिंप्रादक्षिण्येनखानयेत्
प्रा ॥तद्यथा॥ शाल्यांतंजलांतंवाशर्करांतमथापिवा॥ प्रासादपादभूमिस्थंसच्छल्यंदोषदंयतः १५
अधःपुरुषमात्रांतुनशल्यंदोषदंगृहे॥ प्रासादादिषुवैतस्मात्तत्तन्मानेनशोधयेत्॥ पाद
गर्भगताच्छल्यान्अनाधनतयाहितेः॥ स्फटानांपुष्कलत्वाच्चविश्लिष्यतिचिरंत्रिधा॥ अ

धःखन्यमानायांभुविशंखशुक्तिसुवर्णरजतमणिरत्नादिकंदृश्यतेसजीवोमंडूकःकश्यपो
वातत्सर्वंयथाननश्यतितथान्यत्रधारयेत्॥ अथसिद्धंखातंविधिनापूजयेत्॥ तद्यथा॥ ज्ञात
राचार्यःपूर्ववदागत्यखातस्यैशानभागेकृतोपरिकलशंप्रतिष्ठाप्यतत्रतमीशानमितिशि
वंगंधादिभिरुपचारैःपूजयेत्॥ कलशस्योत्तरतोकृतैःचतुःषष्टिपदादिकेमंडलेकृतेपा
प्रा ष्वद्वास्तुभिर्द्वांकलशस्यपश्चिमेग्निंप्रतिष्ठाप्याज्यभागांतंकृत्वाघोरेणशांत्यर्थमष्टोत्तरशतं
तिलैराज्येनवाहुत्वावास्तुदेवताभ्यःपंचपंचाहुतीर्नाममंत्रैर्हुत्वापूर्णांदत्वादिगीशेभ्योभूतेभ्य
श्चबलिंदत्वाचम्यकलशपूजामुपसंहृत्यकलशंगृहीत्वावह्निदिशंगत्वाप्राङ्मुखोवस्थायव
ह्निपदंकलशोदकेनाभ्युक्ष्यखातस्थंमणिरत्नादिकंयथाननश्यतितथातत्रनिक्षिप्याष्टांगु

लयामुद्राप्रदर्शकलशांनसान्नुत्स्यकपिशीर्षप्रमाणैः स्वेदितार्चितैः पाषाणैर्निबिडतरं कृत्वा भस्म
ञाव्यपलाशोडुंबराद्यैर्हस्तपट्टैराकोटयेत्॥ अथाचार्यः कलशोदकेन यजमानमभिषिंच्य ब्रा
ह्मणान्स्वस्ति वाचयेत्॥ ततो यजमान आचार्यादीन्यथाशक्ति पूजयेत्॥ ततः पश्चात्तिताव
ला मुद्राप्रदर्यं तथाविधैरेव पाषाणैः चित्वा ज्ञात्वा कोष्ठाकोष्ठेवं प्रक्रियया चतुर्थभागावशेषं खा
तपूरणं कुर्यात्॥ ॥इति श्रीरघुसूरिसुनुत्रिविक्रमसूरिविरचितायां प्रतिष्ठापद्धतौ भूमिक
र्म॥ ॥अथ शिलान्यासविधिः॥ तत्र कालनिर्णयः॥ सूर्यस्थिहगर्नोख्य शिलान्यासध्वजोच्छ्रयात् २६
॥शारोच्छ्रायं च कुर्वीत जीर्णोद्धारं च सर्वदा॥ पादोनपूरिते सुस्थे प्रासादे स्वेच्छया चोपताका
द्यलंकृते शिलान्यासं कुर्यात्॥ तत्रादौ तावत् शुभेऽहनि यजमानानुज्ञातो तद्देशिकानुमते

स्थितोऽध्वानुसारेण स्थपतिर्नव पंच चतस्रो वा शिला घटयेत्॥ तद्यथा॥ स्त्रीलिंगां शिलाप
रीक्ष्य तत्र शिरः षष्ठांशविभक्ताँगा हस्तायताँ वितस्तिविस्तारा अष्टांगुलोच्छ्रायाश्चतस्रो निर्दोषा
नव चेल्लोकपालायुधांकिताः पंच चेत्पद्मस्वस्तिकांकिताः चतस्रोप्येवंविधा एव॥ पक्षत्रयेपि
शिलासंख्यया तावत् एव शिलामयानाधारान्कल्पयेत्॥ तन्मध्ये निधिकुंभस्थापनार्थं प्रति
शिलं कुंभपरिमाणान्त्वथवटान्निदध्यात्॥ अथवा पंचशिलापक्षे चतुःशिलापक्षे च सर्व
तोऽष्टांगुलमिताः पद्मस्वस्तिकांकितास्तासामप्युपरि शिलाकल्पना पूर्ववत्॥ इष्टकाश्चेत्प्रा
सादस्तदेष्टका एव॥ ताश्च वितस्त्यायताः षडंगुलविस्ताराः प्रसिद्धेष्टकोदयप्रमाणाः शेषं
पूर्ववत्॥ शिलासंख्यया च मृन्मयान्सापिधानान्साधितान्कलशान्कारयेत्॥ ततो

ताम्र

यजमानःस्नातःमेरुत्तरतश्चष्टहस्तंमध्येतत्त्रिभागपरिमाणयावेद्यायुक्तंपंचकुंडोपेत
माचार्यकुंडादीशाननागेग्रहपीठोपेतंचतुर्द्वारंपैतोरणपताकाद्यलंकृतंमंडपंकृत्वातस्य
पूर्वेमंडपार्द्धेनस्नानमंडपंविदध्यात्॥ततःसुस्नातः॥स्वाचांतोदेशिकःप्रतिद्वारंरत्न
गर्भान्वितस्त्रयुगच्छन्नोपल्लवाननोस्त्रक्चंदनफलोपेतोवारिपूर्णौकलशौसस्यधान्यपुंजोप
रिप्रतिष्ठाप्यतत्रसंक्षेपतःप्रतिष्ठायागतोरणपूजांबहिरेवकृत्वालोकपालेषुतल्लिंगमं
त्रैर्बलिंदत्वाचम्यपूर्वद्वारेस्थित्वास्वान्निर्मंत्रितैःसर्षपैःप्रोक्षितोत्सादनंकृत्वाकृतसंस्कारेकुंडे ११
ग्निंप्रतिष्ठाप्यतंकुंडसंख्ययाविभज्यप्रागादिभागान्कृतसंस्कारेषुप्रागादिकुंडेषुमूर्तिपैःप्र
णम्यस्वकुंडादुत्तरतःस्वर्यैःपूर्ववदग्निंस्थापयित्वातत्रचरुंश्रपयेत्॥कुंडाग्नौगृह्योक्तवि

धिनाअग्निमुखंकृत्वागृहवेदिकायामादित्यादीन्ग्रहान्विन्यस्यसंपूज्यचग्रहेभ्यईशान
स२ नागेशांतिकलशंप्रतिष्ठाप्यतत्रसर्वेसमुद्राइतिमंत्रेणतीर्थानिवरुणंचावाह्यपूजयित्वास्व
कुंडमेत्यतत्रचर्वादिभिःग्रहहोमंनिर्वर्त्यपूर्णांदत्वाग्रहयज्ञंसमाप्यवेद्यांचतुःषष्टिपदादिकं
वास्तुंकृत्वाशिख्यादीन्देवान्गंधादिनाभ्यर्च्यवास्तोष्पतेवास्तुदेवानांतिलैर्होमंनिर्वर्त्यपू
र्णांदत्वायज्ञंसमाप्यवेद्यांचतुःषष्टिपदादिकंवास्तुंकृत्वाशिलाप्रतिष्ठार्थंशांतिकैःपौष्टि
कैःस्वमंत्रैःसमिदाज्यतिलानांचहोमंकृत्वायजमानान्वितोदेशिकःशांतिपाठेनशिलाःस्न
पनमंडपमानीयभद्रासनेषुनिवेश्यतूर्यमंगलघोषेणशांतिपाठेनस्वस्तिवाचनंकृत्वाता
सांस्नपनमारभेत्॥तत्रक्रमादिज्ञानार्थंतासांनामानि॥नवपक्षेनंदाभद्राजयापूर्णाजिता

पराजिताविजयामंगलाधरणीचेति ॥ तासांनिधिकुंभाः ॥ भद्रसुभद्रविभद्रसुनंदनपुष्पदं
तजयविजयकुंभकर्णोत्तरसंज्ञाः ॥ पंचपक्षे ॥ नंदाभद्राजयारिक्तापूर्णाचेति ॥ तासांनिधि
कुंभाः ॥ पद्ममहापद्मशंखमरकतसमुद्रसंज्ञाः ॥ चतुःशिलापक्षेगायत्र्युष्णिगनुष्टुप्बृ
हतीसंज्ञाः ॥ तासांपद्माद्याश्चत्वारोनिधिकुंभाइति ॥ स्नपनंयथा ॥ अग्निर्मूर्द्धेतिमृत्तिकाक
लशेन ॥ यज्ञायज्ञेतिपंचकषायेन ॥ गायत्र्यागोमूत्रेण ॥ मानस्तोकइतिगोमयेन ॥ गंधद्वारा
मितिगंधवारिणा ॥ पयःपृथिव्यामितिपंचगव्येन ॥ आप्यायस्वेतिक्षीरेण ॥ दधिक्राव्णइतिद १९
ध्ना ॥ घृतवतीतिघृतेन ॥ मधुवाताइतिमधुना ॥ अयंगौरितिशर्करया ॥ गंधद्वारामितिगं
धवारिणा ॥ प्रत्येकमेकांतरितेन ॥ याःफलिनीरितिफलोदकेन ॥ हिरण्यगर्भइतिसुवर्णोद

त्ति

केन ॥ हविष्मतीतिशृंगोदकेन ॥ याओषधीरितिसर्वौषधिजलेन ॥ ओषधयइतिधान्योदकेन ॥ इमं
मेगंगेइतितीर्थोदकेन ॥ गंधद्वारामितिगंधवारिणा ॥ स्नापयित्वावस्त्रेणपरिमार्ज्यकुंकुमचंदनेन
लेपयित्वावस्त्रेणाच्छाद्यस्वनाममंत्रैःप्रणवाद्यैःनमोंतैःगंधादिनापूजयित्वाधिवासनमंडपेभि
नीयवेद्यांकुशतल्पेनिवेश्यार्चयित्वाचार्योमूर्त्तिपैःसहस्वस्वकुंडेशिलानाममंत्रैराज्येनप्रत्येकंश
तसंख्ययाहोमंकृत्वाघोरेणचप्रत्येकंशतंशतंकृत्वापूर्णांदत्वासंस्रवान्कुंडकलशेषुनिक्षिप्यते
नोदकेनमूलमध्यशिरस्सुशिलामभिषिंचेत् ॥ अथाचार्यःप्रासादभूमिंगत्वाप्रादक्षिण्येनतासां
स्थानानिचिह्नयित्वादिग्बलिंदत्वाचम्यशिलास्थानेषुशिलाधारान्विन्यसेत् ॥ तद्यथा ॥ नवशि
लापक्षेधरणीशिलायांउपशिलांप्रासादगर्भगृहमध्येकिंचित्खातंकृत्वातत्राक्षतपुंजोपरिप्रा

वा

कृशिरसां पश्चिमशिरसां प्रतिष्ठाप्य मृद्दादिना दृढीकृत्य तन्मध्ये श्वभ्रे मध्यान्यपारदसुवर्णरत्न
गर्भितं पिहितमुखं कृत्वा चंदनेनानुलिप्य पुष्पादिभिः समभ्यर्च्यनंतरायनमः इति तत्र संस्थं
कलशं स्थापयित्वा मृद्दादिना निश्चलं दृढं कुर्यात्॥ ततः पूर्वादिदिक्षु यथाक्रमं नंदाद्या आधारशि
लाष्टकं पूर्वशिरसं प्रदक्षिणसिरसां वा भित्तिमध्ये पूर्ववत्संस्थाप्य तन्मध्ये श्वभ्रे पुनः पद्मादीन्निधि
कलशान्प्रतिष्ठाप्य प्राप्ते लग्ने शिलान्यासमुपक्रमेत्॥ तद्यथा॥ प्रादेशमध्ये नंदकलशोपरि
प्रणवपूर्वकं नाममंत्रेण धरणीं शिलामाधारशक्तिरूपां तेजोमयीं प्रथमां प्रतिष्ठापयेत्॥ ततो गं १९
धादिना समभ्यर्च्य पश्चात्पद्मादिषु निधिकलशेषु प्राग्वन्नंदाद्या अष्टौ शिलाः प्राक्शिरसो द
क्षिणशिरसो वा स्वनाममंत्रैः स्थापयित्वा गंधादिना पूजयेत्॥ पंचशिलां मध्ये पुनः पद्ममध्ये पूर्ववत्।

पद्मो पुनर्मध्ये

र्णया आधारशिलां विन्यस्य तन्मध्ये श्वभ्रे समुद्रकलशं विन्यस्यार्चयित्वाग्न्यादिकोणेषु पूर्ववन्नं दि
द्रादिशिलाधारान्विन्यस्य तन्मध्यावटेषु पद्मादीन्निधिकलशान्पूर्ववत्स्थापयेत्॥ प्राप्ते लग्ने स
मुद्रकलशस्योपरि पूर्णे त्वं महाविघ्ने सर्वसंदोहलक्षणे॥ सर्वसंपूर्णमेवात्र कुरुष्वांगिरसः
सुते॥ इति मंत्रेण पूर्णां स्थापयित्वा नाममंत्रेण गंधादिना पूजयेत्॥ एवमाग्नेयकोणे पद्मकल
शस्योपरि नंदे त्वं नंदिनी पुंसां त्वामत्र स्थापयाम्यहं॥ प्रासादे तिष्ठ संहृष्टा यावच्चंद्रार्कतारकं॥
आयुःकामं श्रियं देहि देवि वासिष्ठनंदिनी॥ अस्मिन्रक्षा सदा कार्या प्रासादे यत्नतस्त्वया॥ अनेन मं
त्रेण स्थापयित्वा नाममंत्रेण गंधादिना पूजयेत्॥ अथ नैरृते महापद्मकलशोपरि भद्रे त्वं॥ सर्व
दा भद्रं लोकानां कुरु काश्यपि॥ आयुर्दा कामदा देवि सुखदा च सदा भव॥ अनेन मंत्रेण भद्रां शि

लांस्थापयित्वानाममंत्रेणगंधादिनापूजयेत्॥ अथवायव्यकोणेशंखकलशस्योपरिस्थितेजयेत्वंस
र्वदादेवितिष्ठत्वंस्थापितामया॥ नित्यंजयायभूत्यैचस्वामिनोभवभार्गवि॥ इतिमंत्रेणजयांशि
लांस्थापयित्वानाममंत्रेणगंधादिनापूजयेत्॥ अथेशानेमकरेरतकलशोपरिरिक्तेत्वंरिक्तदो
षघ्नेसिद्धिमुक्तिप्रदेशुभे॥ सर्वदासर्वदोषघ्नेतिष्ठास्मिन्नीशरूपिणि॥ अनेनमंत्रेणरिक्तांशि
लांस्थापयित्वानाममंत्रेणगंधादिनापूजयेत्॥ अथदेवशिल्पेतिंयत्रप्रासादएवारभ्यतेतत्रप्रा
गाद्यष्टसुदिक्षुनंदाद्याअष्टौपूर्ववत्स्थापयेत्॥ चतुःशिलापक्षेआग्नेयादिकोणेषुभित्तिम २०
ध्येनंदाद्याश्चतस्रएवशिलाःशंखवत्प्रतिष्ठापयेत्॥ गायत्र्यादिसंस्कारावा॥ वापीकूपयोरा
रंभेमध्यभावाच्चतुःशिलापक्षएवक्रियतइत्येके॥ अन्येपुनरथाहुः॥ प्रासादेशैलजेशैला

ऐष्टिलौकेत्विष्टिकामयाः॥ अष्टांगुलमिताःकार्याःसर्वाश्चस्वस्तिकान्विताः॥ इतिविधिवाक्येप्रासा
दभवनंचाधिकृत्यशिलान्यासस्योक्तत्वात्वापीकूपयोर्विशिष्टशिलान्यासविधिर्नास्तीतिकृ
त्वावापीकूपयोरारंभेआरंभःशिलास्यानंदाभिधानावापूर्ववत्स्थापनीयेति॥ एवंशिलान्यासेकृ
तेसतिदिग्बलिंदत्वाचम्यशांत्यर्थंअघोरेणशतमष्टोत्तरंआज्येनहुत्वासर्वप्रायश्चित्तंशांति॥
काध्यायंजपेत्॥ ततःकृताभिषेकोयजमानोदक्षिणादिभिर्ब्रह्माचार्यादीन्सम्यक्पूजयित्वाशि
ल्पिवर्गंवस्त्रादिनापरितोष्यब्राह्मणान्भोजयेत्॥ न्यस्ताश्चशिलादशभिर्मृदंभसाचसंस्था
प्यशेषगर्तंपूर्ववत्पूरयेत्॥ अथप्रासादाद्यारंभउच्यते॥ तत्रकालनिर्णयः॥ आरंभंवाप्रवेशंवा
प्रासादपुरसद्मनां॥ उत्थितेकेशवेकुर्यान्नप्रसुप्तेविचक्षणः॥ गृहारंभेतुवैशाखःश्रावणो

मार्गशीर्षःपौषंफाल्गुणंकोपिवा॥गुरुर्दैवेर्द्दयेमासोभवनारंभइष्यते॥अथस्तंभेष्टितत्रवास्तु
मिष्ट्वावास्तुहोमंकृत्वादिग्बलिंदत्वाचमध्यंतरादिप्रासादानुसारेणचत्रहस्तोदयादीपीठबंधं
यथाशास्त्रंघटयेत॥ ॥इतिरघुसूनिसुनुनात्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौशिला
न्यासविधिः॥ ॥अथस्तंभोच्छ्रायविधिरुच्यते॥ततोमृगादिपूर्ववास्तुंसाधयित्वाआग्नेयादि
कोणेषुस्तंभस्थानेषुमध्यतवाधावस्तुपद्रवोपशमनायसैवालंसर्वधान्यानिकरंजमूलंपंच
रत्नानिक्षिप्यस्थितंपर्तितदुपरितलस्तंभानस्थापयेत॥अथाचार्यःसयजमानःशुचिस्नातःसि २१
तवासाःशुक्लमाल्यानुलेपनोवास्तुपूजांवक्ष्यातांकृत्वाप्रागुत्तरभागेसप्तधान्यपुंजोपरिवारि
पूर्णंस्वर्चितंकलशंविन्यस्यप्राक्चतुरोब्राह्मणानुपवेश्यस्वस्तिवाचयित्वादक्षिणांदत्वातेभ्यः

आशिषःस्वीकृत्यचतुर्भिर्ब्राह्मणैःशिल्पिनाचसहाचार्यस्तंभंस्नपयित्वाचंदनादिभिरभ्य
र्चस्निग्धाशुक्लवस्त्रेणोर्ध्वदेशेनावगुंठ्यब्रह्मघोषेणगीतमंगलनिस्वनेनाग्नेयकोणस्थितत
श्च स्तंभंस्वयंमोपरिलंबकेनसाधयित्वापुनःसुमुहूर्तेस्तंभंस्थापयेत॥यथादिङ्मूढोनभवति॥यतःस्तं
भेवाभवनेवापिद्वारेवासुरमंदिरे॥दिङ्मूढेकुलनाशःस्यात्तस्माद्यत्नेनवर्जयेत॥अथाचार्य
छ्रयस्ववनस्पतइतिऊर्ध्वस्तिष्ठामयइतिचमंत्रद्वयेनस्तंभमनुमंत्र्यगंधपुष्पादिनाभ्यर्च्यतस्यो
परिनवंमृन्मयंकुंभंन्युब्जंदत्वाछत्रंधारयेत॥छत्राभावेफलवतींशाखांबध्नीयात॥वस्त्रखंडेसि
द्धार्थसर्वौषधिधान्ययुतांरक्षापोटलिकांकृत्वास्तंभस्कंधेध्रुवाचदितिमंत्रेणबध्वाकोणस्तंभा
न्प्रादक्षिण्येनन्यसेत॥पुनर्नचालयेत॥मधुवातेनवास्तोष्पतइतिमंत्रेणाष्टोत्तरशतंहोमं

कृत्वावास्तुदेवताभ्यश्चप्रत्येकमाज्याहुतित्रयंकृत्वातिलैःपायसैश्चत्रयंचकृत्वादिग्बलिंदत्वाच
न्यशांतिकलशोदकेनस्नानमभिषिंच्ययजमानमभिषिंचयेत्॥ कृताभिषेकोयजमानोभि
षेकोत्तरमाचार्यादिभ्योदक्षिणांदत्वास्थपतिवर्गंमानयित्वाब्राह्मणान्यावत्संभोजयित्वास्व
स्तिवाचयेत्॥ एवंप्रदोच्छ्रायंद्वारशाखोच्छ्रायंचकुर्यात्॥ ॥इतिश्रीरघुसूरिसुतत्रिविक्रमसू
रिविरचितायांप्रतिष्ठापद्धतौस्तंभोच्छ्रायविधिः॥ ॥अथप्रासादप्रतिष्ठोच्यते॥ तत्रस्वयंभुवि
देवेपूर्वप्रतिष्ठितेऽदृश्यमानेप्रासादावयवेष्वृद्ध्यायजमानःप्रासादंकृत्वाप्रासादीशान्यांदश २२
द्वादशहस्तंवामंडपंप्रसाध्यतत्रिभागेनतन्मध्येवेदिमापाद्यतस्याःपरितःप्रतिष्ठायागवत्पंचकुं
डान्याचार्यकुंडादीशानभागेग्रहपीठंनैर्ऋत्येवास्तुपीठंनिर्माययज्ञियवृक्षजंस्रुक्स्रुवपंचकं

दा

नवग्रहमखसंभारोवास्तुपूजाद्रव्याणिमंडलरचनापूजोपकरणानिकुंडकलशाःपंचवास्तुमं
डलकलशास्त्रयप्रासादस्नपनकलशाएकाशीतिःअधिवासनकलशाअष्टौद्वारकलशास्ता
वंतएवंयथासंभवंव्यापारकलशाश्च॥ तथाऋत्विक्संख्ययाहोमद्रव्यदानपात्राणिसुवर्णपन
ताम्रमयमर्घ्यपात्रमाचार्यकुंडेचरुस्थालीमंडपेपताकानवप्रासादस्यैकायथासंभवंअन्येषां
समीपवर्तिदेवप्रासादादीनांचयथावर्णंनवग्रहवस्त्राणिद्वारकलशेषुअष्टौकुंडकलशेषुपंच
वास्तुमंडलशांतिकलशेषुत्रीणिवास्तुमंडलदेवानांब्राह्मणाचार्यादीनांवरणवस्त्राणिशि
ल्पिनांवस्त्रालंकरणमाचार्यादीनांहोमार्थमाज्यतिलमाज्ययवान्भूतोत्सादनार्थंसर्षपाव्रत्यमा
णस्नपनकलशाधिवासनद्रव्यंचयथोचितंगंधपुष्पाद्यन्यतमच्चोपकरणजातंसंबिभृयात्॥

शु
ततः शुभेस्यानुकूले दिवसे पूर्वेद्युः पुण्याहवाचनं मंडपस्थापनमाभ्युदयिकं ऋत्विग्वरणं च कृत्वा
शांत्यादिघोषेणाचार्यमूर्त्तिपान्वित उपकरणजातमादाय यजमानो यागमंडपमागच्छेत्॥ अथा
चार्यविद्यां तद्देवतामंडलं कृत्वा वास्तुपूजां कृत्वाचार्यकुंडे अग्निं प्रतिष्ठाप्याज्यभागांतं कृत्वा ग्रहानि
ष्ट्वा द्वारतोरणपूजादि निर्वर्त्य प्रासादमधिवासयेत्॥ तद्यथा॥ प्रासादस्याग्रत एकाशीतिपदमक्ष
तैः कृत्वा तेषु पदेषु सप्तधान्योपरि वारिपूर्णानेकाशीतिकलशान्स्थाप्य तेषां मध्ये नवकं त्रिसूत्र्या
वेष्ट्य प्रतिदिशं नव नव कलशान्वेष्टयेत्॥ तेषु नवकेषु मध्यमं मध्यमं कलशमाजिघ्रेति त्र्यमि २३
मंत्र्य तत्र तत्राधिवासनद्रव्यं निक्षिपेत्॥ तद्यथा॥ मध्यमनवकेषु उदुंबराश्वत्थचंपकाशोक
पलाशप्लक्षन्यग्रोधकदंबाम्रबिल्वार्जुनतरुसंभवपल्लवद्वादशकं निक्षिपेत्॥ पद्मकरोचनाद्ये ६१
चा१

ज नै
र्वांकुरदर्भान्वितसर्षपश्वेतरक्तचंदनजातीकुसुमकुंदनंद्यावर्त्तमिति दशकं पूर्वे यवव्रीहितिल
सुवर्णरजतसमुद्रगामिनीनदीकूलद्वयमृत्तिकान्यसंस्पृष्टगोमयमिति सप्तकं आग्नेये॥ वि
श्वक्रांतार्कगिरीमहौषधीशमीशतवरीदूर्वागुडूचीश्यामाकमित्यष्टकं याम्ये॥ कदलीफलना
२ रिकेलबिल्वनारंगमातुलिंगबदरामलकचूतमित्यष्टकं नैर्ऋत्ये॥ मंत्रसाधितं पंचगव्यं वारु
णे॥ आम्रोदुंबराश्वत्थन्यग्रोधपलाशानां कषायपंचकं वायव्ये॥ सहदेवीबलाशतमूलीशतावरीकु
मारीगडूचीसिंहीव्याघ्रीति मंगलमूलाष्टकं सौम्ये॥ वल्मीकादिसप्तमृत्तिका ईशान्ये॥ हिरण्यव
र्णां हिरणीमिति तानभिमंत्र्य शेषान्गंधोदकपूरितान्मध्यमादीन्कलशान्पूर्वादिक्रमे
ण मूलमंत्रेणाभिमंत्र्य सूत्रेणावेष्ट्यांतर्बहिरधस्तादूर्ध्वं प्रासादं स्नपयेत्॥ तद्यथा॥ संप्रोक्ष्य मूर्

ह रि न

नदीवइतिवल्मीकमृदाविलिप्यसमुद्रज्येष्ठाइतीशानदिक्स्थेनमृत्तिकुंभेन ॥ यज्ञायज्ञेतिवा का
यव्यस्थेनकषायकुंभेन ॥ पयःपृथिव्यामितिवारुणेनपंचगव्यकुंभेन ॥ याःफलिनीरितिनैरृ
तफलकुंभेन ॥ ईं॰सम्रुचिषदितिसौम्यस्थेनमंगलकुंभेन ॥ विष्णोरराटमितिपूर्वकुंभेन ॥ सोमं
राजानमितिवह्निस्थकुंभेन ॥ विश्वतश्चक्षुरितियाम्यकुंभेन ॥ नमोस्तुसर्पेभ्यइतिमध्यमकुंभे
न ॥ ततइदमापःप्रवहतेत्यष्टाभिःपूर्वाभिर्दिक्क्रमेणप्रासादंस्नपयित्वाध्वजपताकाःसद्वस्त्रैर्विनि
वानुरूपेणभूषयित्वादेवस्वरूपंतंध्यात्वागंधमाल्याद्यैःपूजयित्वात्रिसूत्रावेष्टनंदेहंपीठंच २४
वितानेनपुष्पमंडपिकयाप्रासादंमंडपंचवस्त्रैर्वस्त्रेणवाद्वारादेशमाच्छाद्यार्घहस्तोदेशिको
देवसमीपंगत्वासकलीकृतविग्रहोदेवायार्घ्यंदत्वांर्माल्यमपनीयवारिणादेवंपिंडिकासहि
नि

तंस्नापयित्वादेवंसांगावरणमभ्यर्च्यपुनरर्चयित्वामुद्रांबध्वानमस्कृत्यदेवंस्नपयेत् ॥ आप्याय
स्वेतिक्षीरेण ॥ समुद्रज्येष्ठाइतिगंधवारिणा ॥ दधिक्राव्णइतिदध्ना ॥ आपोहिष्ठेतिगंधवारि
णा ॥ तेजोसीतिघृतेन ॥ शन्नोदेवीतिपुनर्गंधेन ॥ यवगोधूमचूर्णेनद्रुपदादिवेत्युद्वर्त्यपुनःशु
द्धोदकेनदेवंसमंतात्प्रक्षाल्यकुशोदकेनमंत्रैरभिषिंच्यसुगंधवस्त्रेणदेवंसंमार्ज्यवस्त्रेणप
रिधाप्यभूषणैर्गंधपुष्पाद्यैःसंपूज्यप्रणम्यविज्ञाप्यमंडपंमौनेनागेप्रासादवास्तुमंडलंसमुद्धृत्य
तत्रवास्तुपुरुषंसर्वदेवमयंसर्वाधारंजगन्मयंसंचिंत्योक्तविधिनावास्तुपूजांकृत्वाबहिर्दिगी
शेभ्योबलिंदत्वाभूतेभ्यश्चाचम्ययागमंडपमागत्यमंडपेदेवंसांगावरणंसंपूज्याचार्यमू
र्तिपैःसार्धंहोममारभेत् ॥ तत्रतत्वसंमूर्तिमूर्तिशेभ्योलोकपालेभ्यश्चतत्तन्मंत्रैर्होमंनिर्वर्त्य
२१

देवायनिवेद्यदेवस्यसमंतादष्टौवारिपूर्णान्कलशान्विन्यस्यदेवंप्रासादंचाधिवासयेत्॥ रात्रौ
शंखवादित्रगेयनृत्यैर्ऋग्यजुःसामानिस्वनैर्महोत्सवंकुर्यादित्यधिवासनं॥ ॥अथापरेह्नि
शुचिराचार्योयजमानान्वितःप्रासादंप्रविश्यशिवस्यदक्षिणयांमूर्त्तौमिंत्रविग्रहंशिवमं
न्यत्रप्रतिमांसंपूज्यसंस्नाप्यपूर्ववदर्घ्यंदत्वाप्रणम्यदिग्बलिंदत्वाचमध्यमंडपमागत्योद्या
पनार्थंविधिविशेषहोमंकृत्वार्घ्यहस्तोयजमानान्वितोदेवसमीपमागत्यपूर्ववत्संस्नाप्य
प्रणम्यगंधाद्यैःप्रपूज्यक्षीरनीरकुशयवतिलतंडुलसिद्धार्थकपुष्पाण्येकस्मिन्पात्रेकृत्वाष्टांग २५
मर्घ्यंदेवायमूर्द्ध्निदत्वाभ्यर्च्यप्रणमेत्॥ अथाचार्योबहिर्निर्गत्यप्रासादाभिमुखोभूत्वाप्रासा
दंदेवस्वरूपंध्यात्वाध्यानेनस्थापयेत्॥ तत्ध्यानंयथा॥ पादौपादशिलास्तस्यजंघापादे

र्धमुच्यते॥ गर्भश्चैवोदरंज्ञेयंकटिश्चकटिमेखला॥ स्तंभाश्चबाहवोज्ञेयाघंटाजिह्वाप्रकीर्त्ति
ता॥ दीपःप्राणोस्यविज्ञेयोह्यपानोजलनिर्गमः॥ ब्रह्मस्थानंपदंतस्यतन्नाभिपरिकीर्त्तिताः
॥तिलकुंभादधोद्वारंतस्यप्रजननंस्मृतं॥ शुकनाशाभवेन्नासागवाक्षःकर्णउच्यते॥ काय
पालीस्मृतःस्कंधोग्रीवामलकेसरः॥ कलशस्तुशिरोज्ञेयोमज्जाद्विपरसंहितं॥ मेदश्चैव
सुधांविद्यात्प्रलेपोमांसमुच्यते॥ अस्थीनिश्चतुलास्तस्यस्नायुःकीलादयःस्मृताः॥ चक्षुंषि
शिखरास्तस्यध्वजाःकेशाःप्रकीर्त्तिताः॥ एवंपुरुषरूपंतंध्यात्वामनसासुधीः॥ जगत्यासहप्रा च
सादंध्यानमंत्रेणस्थापयेत्॥ सर्वदेवमयांचिंत्यसर्वरत्नोज्ज्वलाकृतिं॥ यावच्चंद्रश्चसूर्यश्चतावदत्र
स्थिरोभवेति॥ ततोगंधाद्यैःपूजयित्वात्रिसुत्र्यावेष्ट्यकुंडांतिकमागत्यवास्तोष्पतइतिशतमष्टो

त्रंकृत्वादेवमंत्रेणचतथाशांत्यर्थमघोरेणचकृत्वाप्रायश्चित्तादिपूर्णांतिंकर्मनिर्वर्त्यदिग्बलिंदत्वाचा
मेत्॥ अथयजमानोदेवसमीपमागत्यवित्तानुसारेणभूमिसुवर्णादिकंदेवायदत्वात्मानंनिवेद्यप्र
मेत्र२ णम्यविज्ञापयेत्॥ अथाचार्योमंडपपूर्वेद्युत्तरस्यांदिशिपद्ममष्टदलंतंडुलैरादिरच्यतदुपरिभद्रासनं ति
विधायतस्मिन्सपत्नीकसपुत्रबंधुबांधवंयजमानमुपवेश्यतूर्यमंगलादिशब्देनमहोत्सवंकृत्वापू
र्वकल्पितैःशांतिकलशाद्यैःकलशैःकैरभिषेकमंत्रैराचार्यमूर्तिपान्वितोनिषिंचेत्॥ अथमस्तके
जलाभावेकृताम्थस्नातोयजमानोदेवंमंडलेदृष्ट्वादक्षिणामाचार्यमूर्तिपेभ्योब्राह्मणेभ्यःस्थ २६
पत्यादिभ्योवस्त्रादिकंदत्वादेवांतिकंगत्वाप्रासादमुत्सृजेत्॥ तत्रप्रयोगः॥ इमंशिलेष्टकादारु
दिनिर्मितंवलभीजगतीप्राकारगोपुरपरिवारदेवतालयसंयुक्तंतत्तद्देवतालोककामःकुलद

न
यानुग्रहायतत्तद्देवताप्रीतयेहमुत्सृजामित्यक्षतपुष्पादिकंप्रक्षिप्यदेवंप्रणम्यब्राह्मणान्भोज
यित्वादीनानाथांश्चसर्वांस्तैस्तैर्वाचयेत्॥ ॥इतिश्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायांप्र
तिष्ठापद्धतौप्रासादप्रतिष्ठा॥ ॥अथप्रासादहृदयप्रतिष्ठाविधिरुच्यते॥ तत्रादौप्रासादादुत्तरतोष्ट
हस्तंमंडपंनिष्पाद्यतन्मध्येचतुर्हस्तांवेदिकांचतस्याःप्राच्यांहस्तमात्रंकुंडंकृत्वाचतुर्षुद्वारेषुवस्त्र
र्माणद्वारशाखातोरणादिकुर्यात्॥ तस्मादुत्तरेस्नपनमंडपंतन्मध्येवेदिंभद्रासनंस्कंकस्कंवांचनि
ष्पाद्ययथाशक्तिसौवर्णपुरुषंसारुदारुजंवितस्तिमात्रंशय्यांअधिवासनशय्यांसुवर्णकमलंसु
जं वर्णादिधातुकंकलशंरत्नान्यर्घपात्रंवास्तुमंडलयोचरनापूजाद्रव्याणिसमिधःपताकाबलिकरण
द्रव्याणिसंक्षेपतोनवग्रहमयौक्तंद्रव्यसंभारंनन्मयानवकलशानेकविंशतिर्वापरकलशान्द्वार
ख्वो

कलशास्तत्पिधानाय प्रकीर्णबीजशरावाणि पूर्ववदन्यच्चोपकरणजातं समाहरेत्॥ अथ शुभेऽहनि
पूर्वविहित आचार्यश्चतुर्भिर्मूर्तिपैः संयुक्तः स यजमानोऽन्यसंभारवत्पुरुषैरन्वितः शांतिमंगल
तूर्यनिनादैर्मंडपमागच्छेत्॥ अथाचार्यो वेद्यां प्रासादवास्तुमध्ये तैरुद्धृत्य सर्वतोभद्रमंडलमा
लिख्य वर्णकैः प्रपूर्य तत्संनिधौ शोपबर्हंशय्यां निवेश्य कुंडेऽग्निं प्रतिष्ठाप्य वास्तुकग्रहमंडलयोः
पूजां निर्वर्त्य गृहान्वास्तुमंडलदेवतानिष्ठां वक्ष्यमाणं च प्राग्द्वारे अग्निमीळे इति तोरणमारभ्य
द्वारशाखामूलयोर्धान्यपुंजोपरि स्वर्चितौ सहिरण्यौ सरत्नौ सवस्त्रौ सपल्लवौ गतिबीजशराव २२
पिहितौ प्रशांतशिशिरनामानौ कलशौ प्रतिष्ठाप्य स्वनाममंत्रेण संपूज्य तत्संनिधावंतरिक्षे शक्र
मावाह्य त्रातारमिंद्रमिति गंधादिना पूजयित्वा तोरणोपरि रक्तपताकामुच्छ्रित्य तन्मूले भूमा॥

[गंधाद्य]
विंद्राय बलिं निवेद्य त्र्यंबकमिति मृत्युंजयोक्तानामिति क्षेत्रपालाय [illegible] पूर्वकं बलिं दत्वेंद्रं प्रार्थ
येत्॥ लोकेशमापताकं श्वेतगंधपुष्पादिकं बलिं॥ मया दत्तं गृहीत्वाद्य पाहि यज्ञमिह स्थितः॥ अथ मंड प
लस्याग्नेयकोणे अग्निमावाहयामि दूतमिति पूर्ववत्संपूज्य रक्तं पताकामुच्छ्रित्य तन्मूले त्रिविधं बलिं दत्वा
पूर्ववत्प्रार्थयेत्॥ अथ याम्ये विंडषेत्वेति तोरणमालभ्य द्वारशाखामूलयोः पूर्ववत्पर्जन्याशोकसंज्ञकौ
संस्थाप्य प्रपूज्य तत्सन्निधौ यममावाह्य सुगन्नु पंथामिति गंधादिना प्रपूज्य कृष्णां पताकामुच्छ्रित्य पू
र्ववद्बलिदानानि कुर्यात्॥ अथ नैर्ऋत्यां नैर्ऋतिमावाह्य असुन्वंतमिति प्रपूज्य कृष्णां पताकां समुच्छ्रि
त्य शेषं पूर्ववत्कुर्यात्॥ अथ वारुण्यां दिशमागत्य आयाहीति तोरणमालभ्य द्वारशाखामूलयोः पू
र्ववद्भूतसंजीवननामानौ कलशौ निवेश्य तत्सन्निधौ वरुणमावाह्य तत्वायामीत्यभ्यर्च्य श्वेतां पताका

मुच्छ्रित्यशेषंपूर्ववत्कुर्यात्॥ अथवायव्येवायुमावाह्यानोनियुद्भिरितिप्रपूज्यपीतपताकामुच्छ्रित्यशेषं
पूर्ववत्कुर्यात्॥ अथसौम्येशन्नोदेवीरितितोरणमालभ्यद्वारशाखयोर्द्धंनिदध्यात्प्रदोकलशौसंस्था
प्यसंपूज्यतन्निकटेसोममावाह्यवयंसोमेतिप्रपूज्यश्वेतपताकामुच्छ्रित्यशेषंपूर्ववत्कुर्यात्॥
अथैशान्येईशानमावाह्यतमीशानमित्यभ्यर्च्यश्वेतपताकामुच्छ्रित्यशेषंपूर्ववत्कुर्यात्॥ अथमंडप
मध्येऊर्ध्वभागेब्रह्माणमावाह्यब्रह्मजज्ञानमित्यभ्यर्च्यरक्तगौरंपताकामुच्छ्रित्यबलिंदद्यात्॥
अथस्नानमंडपेवेद्यांप्रकीर्णवालुकायांन्यासनेसौवर्णंपुरुषंनिवेश्यततोमृत्तिकागोमय २८
कषायगोमूत्रभस्मपंचगव्यकुष्ठयकुष्ठपंचामृतगंधोदकपुष्पोदकफलोदकधान्योदक
सर्वौषध्युदकसौवर्णादिकरत्नोदकशृंगोदकपल्लवोदककलशैस्तल्लिंगमंत्रितैःदेवंस्नपये

त्॥ ततोगंधादिनाभ्यर्च्यवस्त्रैराच्छाद्यमहामंडपमानीयशय्यायांस्थापयित्वामधुघृताभ्यामभ्युत्य
चामरादियथाशक्तिसंनिधायअधिवास्यकुंडेमूलमंत्रेणसमिद्भिराज्येनतिलैर्वाअष्टोत्तरशतंहु
त्वापूर्णंदत्वासंस्रवान्कलशेषुनिक्षिप्यतेनोदकेनदेवमभिषिंच्यकुंडेसर्वप्रायश्चित्तंहु
यात्॥ अथदेवमादायशांतिमंगलादिपाठेनप्रासादमारुह्यशुकनाशोर्ध्वभागेप्रविश्यतत्रभू
मिमर्घ्यादिकेनपंचगव्येनचसंशोध्यसर्षपैर्वृत्ताप्रासादनंकृत्वामध्येकृतेस्वस्तिकमालिख्यतदुप
रिपूर्वंकूर्मंसोपवर्हांशय्यांपश्चिमचरणंमुत्तरचरणौवाविन्यस्यतदुपरिसुवर्णकमलंसौव
र्णंरजतंताम्रंवाकलशंविन्यस्यार्घ्यादिकेनपंचगव्येनचशिक्त्वामधुघृताभ्यामापूर्यतत्ररत्नानि
निक्षिप्यआजिघ्रेतिप्रतिष्ठाप्यशुक्लवाससापरिधापयेत्॥ अथकलसमध्येतंहिरण्मयंपुरु

षंपुरुषसूक्तेनविन्यस्यॐनमःप्रकृतयेपुरुषायनमःइत्यभिमंत्र्यएषवैप्रतिष्ठानामेत्यस्त्र
तैःप्रतिष्ठाप्यगंधादिनाप्रपूज्यवर्माणितेवर्माणैतिसंरोध्यदिग्बलिंदत्वाचम्यमंडपमागत्य
अघोरेणाष्टोत्तरशतंन्यूनादिदोषनिवृत्तयेघृतेनहुत्वादिग्बलिंदद्यात्॥अथयजमानोभि
पि षिक्तोदेशिकमूर्तिप्रजापिनोन्यांश्चयथाशक्तिपूजयित्वाशिल्पिवर्गान्परितोष्यब्राह्मणा
दीन्भोजयेत्॥ ॥इतिश्रीरघुसूनुविष्णुसूनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौपुरुष
प्रतिष्ठाविधिः॥ ॥अथप्रासादेकलशारोपणविधिरुच्यते॥ ॥तत्रशुभेहनिप्रासादादुत्तर। २९
देशेद्वादशहस्तंदशहस्तंवासकुंडमंडपंनिर्मायतन्मध्येपंचहस्तांचतुर्हस्तांवावेदिंविधायतत
स्मादुत्तरतःपूर्वतोवासवेदिकंस्नानमंडपंकृत्वापूर्ववत्द्रव्यसंभृतिंविधायपुनःशुभेहनि

यजमानश्चाचार्यवरणादीन्निष्पादयेत्॥अथयजमानशिल्पिमूर्तिपपरिचारकसंयुतआचार्यः
पुर सर्वोपकरणसंयुक्तोमंडपमागत्यपश्चिमद्वारेणप्रविश्यवेद्याःपूर्वतःपुण्याहंवाचयित्वाकुंडेग्निंप्रति
ष्ठाप्याग्निमुखंकृत्वाथहस्तवेदिकायांग्रहान्प्रतिष्ठाप्याभ्यर्च्यग्रहहोमंनिर्वर्त्यमंडपवेद्यांप्रासादवास्तु
मालिख्यमंडलंचविधायवर्णकैराप्यविवास्तुमंडलदेवानांपूजनंचहोमंचनिष्पाद्यद्वारतोरणप
ताकादिदिग्बल्यंतंपूर्ववद्विधायाचम्यस्नानमंडपमागत्यवेदिकायांस्वस्तिकोपरिनद्यासनंनि
वेश्यवेदिकोपरिकोणेषुचतुरःकलशान्वारिपूर्णान्सरत्नान्सपल्लवान्सहिरण्यान्वस्त्रावगुं
ठितान्श्रीसूक्तेनाभिमंत्र्यगंधादिनाप्रपूज्याधिवासयेत्॥अथयजमानमूर्तिपशिल्पिवर्गा
न्वितोगुरुःकुंभकुटींगत्वापंचभिःकलशैःस्थापककलशंप्रतिष्ठाप्यलोकपालेभ्यःसार्वभौतिक

बलिंदत्वाचम्यतैलेनाभ्यज्यचंदनादिनाभ्यर्च्यविस्रग्विणमारोप्यशांतिमंगलतूर्यघोषेण
स्नानमंडपमानयेत्॥ अथभद्रासनेतमारोप्यपुरतःपुण्याहवाचनंकृत्वाघृतवतीतिघृतेनाभ्यज्य
द्रुपदादिवेतियवमसूरहरिद्रापिष्टेनोद्वर्त्यशालोदकेनप्रक्षाल्यमूर्द्धानंदिवेतिवल्मीकादिमृद्भि ६३
लिथया रूपदिव्याइतिगंधोदकेनहिरण्यगर्भ~~समवर्त~~इतिपंचपल्लवोदकेनयाओषधिरित्यौषध्युदके
नहंसःशुचिषदितिश्रुतोदकेनस्नापयेत्॥ अथपूर्वकल्पितवेदिकोणेकलशैर्मानस्तोके स्नो५
इतिप्रथमेन॥ विष्णोरराटमसीतिद्वितीयेन॥ सोमंराजानमितितृतीयेन॥ विश्वतश्चक्षुरितिचतु ३०
र्थेन॥ समुद्रज्येष्ठाइतिशुद्धोदकेनस्नापयित्वादेवलिंगकेनामंत्रेणवात्वार्चयित्वागंधपुष्पैः
श्र२ संपूज्यवस्त्रैराच्छाद्यअभित्वाशूरनोनुमइतिरक्तलोत्याथवादक्षिणेनमहामंडपमानीयप

त२

श्चिमद्वारेणप्रविश्यवेद्युपरिपथोचितशय्यायांसास्तृतारुक्मपट्टेवानिवेश्यगंधादिनासंपूज्यमत्स्योज्यादि
नापरितःप्रपूर्यविश्वतश्चक्षुरितिसंकल्पीकृत्याचार्यःकुंडांतिकमागत्यसमिधादिप्रकल्पद्वारे
षुद्वारपालान्जपायनियोजयेत्॥ अथाचार्यस्वकुंडेघृतदधिक्षीरमधुभिःपृथक्पृथक्कृतैः
संपृक्तैश्चहोमंकुर्यात्॥ पालाशोदुंबराश्वत्थशम्यपामार्गसमिद्भिश्चयथासंख्यंघृताद्यक्ताभिश्च
रुणांतिकैश्चप्रत्येकमष्टसहस्रसंख्ययाष्टसहस्रैर्वातत्संख्ययाहुत्वाप्रत्येकेपूर्णांदत्वाशांतिकल
शोसंस्रवान्निक्षिप्यतेनोदकेनपादनाभिरुद्धस्तःशिरांशिक्रमेणस्पृष्टेशेत्॥ अथपुरुषसूक्तं
प्रत्येकंकलशेविन्यस्यकलशंगंधादिनासंपूज्यबलिंदत्वाप्रासादमारुह्यगंधोदकेनप्रक्षाल्य
वक्ष्यमाणविधिनाअंगन्यासादिकंकृत्वाशांतिमंगलवाद्यनिस्वनैःकलशंप्रासादमस्तक

मानीयच्छर्णं विश्रम्यसुखं कृत्वेशिप्रासादे देवलिंगकमंत्रेण कलशमंत्रेण च प्रतिष्ठापयतदुपरिध्वजं
फ़ि मंत्रेणाभिमंत्र्यपूर्वोक्तविधिनाध्वजं विन्यसेत्॥ तत्रेश्वरचंडिकयोस्त्रिशूलं विष्णुमहालक्ष्म्योश्चक्रं सूर्यविरं
चिलक्ष्मीणां पद्मं॥ एवमन्येषां भूतनिवारणार्थं स्वायुधं निवेशयेत्॥ अथ शिल्पी तं स्थिरीकृत्यस्व
नवारिणा संस्नाप्य ततः सर्वफलस्नानं कृत्वा गंधपुष्पाद्यैः पूजयित्वा प्रासादादुत्तीर्य भूमौ साष्टांगं
प्रासादं प्रणम्य पुनरावाह्य गंधादिना प्रपूज्य स्वस्त्रकवस्त्राण्यन्योन्य बध्वानि कलशाग्रे निबध्येशा
नभागे तद्दर्पणं भूमिं स्पृशेत्॥ अथाचार्यो मंडपमागत्य कर्मशेषं निर्वर्त्य पूर्णां दत्वा प्रायश्चित्त ३१
होमं निर्वर्त्य बलिकर्म निर्वर्त्य च शिल्पीवर्गं यजमानमभिषिंचेत्॥ अथाभिषिक्तो यज कोर
मानो दक्षिणाभिराचार्यादीन् पूजयेत्॥ शिल्पिनश्च॥ तेभ्यो भोजनं दद्यादन्येभ्यश्चेच्छयेति

स्तं५

॥ ॥इति श्रीरघुसूरिसुनुत्रिविक्रमसूरिविरचितायां प्रतिष्ठापद्धतौ कलशारोपणं॥ ॥अथ
मानस्तंभप्रतिष्ठोच्यते॥ वृक्षसारमयोश्ममयो लोहमयो वा मानस्तंभो विचित्रघटनान्वितो व
र्तुलो वा यजमानाष्टोत्तरशतसहस्रतदर्धस्तस्मादप्यर्धः प्रासादप्रमाणो वा यथोचितविस्ता
रो लिंगायामविस्तारो वा भवति॥ अथाष्टौ चत्वारो वा ते भवंत्यथ पूर्ववन्मंडपद्वारतोरणपूजाधि
वासनांतं कर्म कृत्वा प्रासादे स्थिते मानस्तंभ मानष्टौ यद्वा चतस्रश्चतुरो वैशान्यामेकं मानस्तं
भं विधिनाधिवासितं कृत्वा रत्नन्यासं च पूर्ववत्प्रतिष्ठाप्य संपूज्य तन्मानवंशदंडेन पताका
मावध्य स्तंभोपरि निवेश्य पूर्ववद्दक्षिणाद्य यजमानमभिषिंचयेत्॥ अथ यजमानस्तंभो देवः श्री
जो देवी तद्योगी तद्योगः प्रतिष्ठाश्वमेधफलदायिका भवतीति॥ ततो दक्षिणादानं ब्राह्मणभो

नै
जनं चेति॥ ॥इति मानस्तेन प्रतिष्ठाविधिः॥ ॥अथ सर्वदेवप्रतिष्ठाकालनिर्णय उच्यते॥ चैत्रे
वा फाल्गुने वापि ज्येष्ठे वा माघ एव तथा॥ माघे वा सर्वदेवानां प्रतिष्ठा शुभदा सिते॥ रिक्तान्यतिथिषु
स्यात्सा वारे भौमान्यके तथेति॥ सिते इति अनेन पुष्टे चंद्रे तिथयः उच्यंते॥ न शुक्लपक्षः॥ तथा
च विष्णुधर्मोत्तरे॥ कृष्णपक्षे त्रिभागे तु प्रथमे द्वितीये मध्यफलदा तृतीये च शुभावहा॥ धनधा
दि न्यवती स्फीता वरदा च तथा भवेदिति॥ प्रतिष्ठेति शेषः॥ वारे भौमान्यके इति॥ मंगलादन्यवारे॥ तथा
च विष्णुधर्मोत्तरे॥ तेजस्वी निःसूर्यदिने चंद्रे क्षेमावहा भवेत्॥ भौमेग्निभयदा प्रोक्ता बुधे च धनदा ३२
भवेत्॥ गुरुणा सगुणा नित्यं लोकानंदकरी सिते॥ आचंद्रार्कस्थिरा सौरी प्रतिष्ठा शुभदा स्मृ
तेति॥ तिथावरिक्ते इति॥ चतुर्थी नवमी चतुर्दशी व्यतिरिक्ते॥ तथा च तत्रैव॥ हृष्टा धनयुक्ता

स्फीता तथा प्रतिपदि स्मृता॥ द्वितीयायां धनोपेता तृतीयायां धनप्रदा॥ चतुर्थ्यां मासमाप्नोति य
मस्य स्यासुखावहा॥ विनायकस्य देवस्य तथा तत्र हितप्रदा॥ पंचम्यां श्रीयुता कर्तुर्वरदा च त
था भवेत्॥ षष्ठ्यां लक्ष्मीयुता नित्यं सप्तम्यां रोगनाशिनी॥ अष्टम्यां धान्यबहुला नवम्यां च वि
श्य नश्यति॥ नष्टकाल्याः कृता तत्र कर्तुर्भवति पुष्टये॥ धर्मवृद्धिकरी ज्ञेया दशम्यां तु तथा कृता॥ ए
कादश्यां तथा युक्ता द्वादश्यां सर्वकामदा॥ त्रयोदश्यां च विज्ञेया चतुर्दश्यां विनश्यति॥ कृष्णप श्य
क्षे च तु पंचदश्यां कर्तुः क्षयकरी भवेत्॥ पंचदश्यां तथा शुक्ले सर्वकामकरी भवेत्॥ श्रवणेश
क्रादीत्यादि प्रमुखे वइति॥ तथा च मत्स्यः॥ आषाढे द्वे तथा मूलमुत्तरात्रयमेव च॥ ज्येष्ठा श्रवण
रोहिण्यः पूर्वाभाद्रपदा तथा॥ हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा॥ अनुराधा तथा स्वा

तीप्रतिष्ठासुप्रशस्यतइति॥ क्रूरराशौद्वित्रिषष्ठदशमैकादशेशुभा॥ प्रतिष्ठास्थिरलग्नेस्याद्वृषक
न्याधनुर्झषे॥ पापैस्त्र्यायारिगैर्युक्ते सौम्यैर्व्ययाष्टवर्जितैरिति॥ क्रूरराशौप्रतिष्ठाकुर्यात्॥ जन्मरा
शिमारभ्यत्र्यादिसंख्याके॥ स्थिरवृषसिंहवृश्चिककुंभे॥ द्वंद्वकन्याधनुर्झषे मिथुनकन्याधनु
र्मीने॥ पापैस्त्र्यायारिगैः तृतीयैकादशषष्ठगैः॥ तथासौम्यैर्व्ययाष्टमवर्जितैः द्वादशाष्टमवर्जितेषु
केंद्रलग्नेप्रतिष्ठास्यात्॥ तथाचविष्णुधर्मोत्तरे॥ जन्मराश्युदयेकुर्यात्क्षिप्रंनाशकरीभवेत्॥ द्वितीये
धनवृद्धिस्यात्॥ तृतीयेकलहेद्विधा॥ चतुर्थेगृहनाशायपंचमेव्याधिदाभवेत्॥ षष्ठेशत्रुविना ३२
शायसप्तमेधननाशिनी॥ अष्टमेमृत्युदाज्ञेयानवमेधर्मनाशिनी॥ दशमेकर्मणांवृद्ध्यैलाभेसा
नंदकरीभवेत्॥ द्वादशेतुभयायस्यात्प्रतिष्ठातुतथाकृता॥ जन्मलग्नोदयेश्रेष्ठाधनधान्यवतीभ

शे

वेत्॥ जन्मराशिफलंसर्वंशेषस्थानेषुनिर्दिशेदिति॥ तथामेषोदयेतयाक्षिप्रंनाशमाप्नोतिपार्थिवः
वृषोदयेस्थिराप्रोक्ता॥ वृषोदयेस्थिराप्रोक्ताधनधान्यवतीभवेत्॥ लोककांताचमिथुनेबहुक
ल्याणकारिणी॥ कुलीरेक्षिप्रनाशायसिंहेचसुदृढाभवेत्॥ कन्यायांलोककांतास्यात्तुलायां
भवतिस्थिरा॥ वृश्चिकेचस्थिराप्रोक्ताकल्याणायधनुर्धरे॥ मकरेक्षिप्रनाशास्यात्कुंभलग्नेदृ
ढाभवेत्॥ मीनेगुणवतीकर्तुःकंन्याश्चान्यातथाभवेदिति॥ तथा॥ रविर्दशत्रिषट्संस्थोराहुस्त्रि
दशसंयुतः॥ षट्त्र्यायानुगताःशस्तामंदांगारककेतवः॥ शुभाःक्रूराश्चपापाश्चसर्वेचैकादश
स्थिताइति॥ अत्रैवपक्षेसर्वेषांनावफलान्यफलानि॥ तत्रसौम्याःसर्वत्रशुभाः॥ चंद्रस्तुद्वादशा
ष्टमवर्जितःसर्वत्रशुभः॥ बहुत्वान्नलिख्यते॥ अथशैवप्रतिष्ठा॥ तत्ररत्नसमुच्चयेरुद्रसं

यद्ववाक्यंपठति॥यतीनांसर्वकालेषुलिंगस्यारोपणंमतम्इति॥आरोपणंप्रतिष्ठा॥शुक्लपक्षेस्थि
रलग्नेहरिःस्थाप्योनरैःसदाइति॥अथदेवीप्रतिष्ठा॥तत्रदेवीपुराणेस्कंदेयद्ववाक्यंपठति॥
मातृभैरववाराहनरसिंहत्रिविक्रमाः॥महिषासुरहंत्र्याश्चस्थाप्यावैदक्षिणायने॥अत्रैवका
लनिर्णयमाह॥सर्वकालइति॥तथाचतुःषष्टिप्रतिष्ठायांब्रह्मा॥स्थापनंतुप्रवक्ष्यामिसर्वका
मप्रसाधनं॥सर्वकालेप्रकर्तव्यंकृष्णपक्षेविशेषतः॥रात्रिरूपायतोदेवीदिवारूपोमहेश्वरः
अतःस्वकालपूजाभिःसिद्धिदापरमेश्वरी॥अथवाप्यादिप्रतिष्ठाकालः॥अथवाप्यादिधनुः ३४
सिंहाद्यवर्जितेलग्नेश्रेष्ठेनतथाऊषरइति॥वाप्यादि॥वापीकूपतडागादि॥प्रतिष्ठाप्य॥मितिज्ञेयं
अद्योमेघः॥तथाचभविष्यपुराणे॥तस्मिन्सलिलसंपूर्णेकार्तिकेचविशेषतः॥तडागस्यवि

धिःकार्यः॥स्थिरनक्षत्रयोगतइति॥तथाचवह्निपुराणे॥वापीकूपतडागानांकस्मिन्काले
विधिःस्मृतः॥सुदिनेशुभनक्षत्रेप्रतिष्ठाशुभदास्मृता॥कर्कटेपुत्रलाभायसौख्यंतुमकरेभवेत्
मीनेयशोर्थलाभश्चकुंभेवसुबहूदकं॥वृषेचैवमिथुनेवृद्धिःवृश्चिकेचजलंभवेत्॥पितृहाशिश्व
कन्यायांतुलायांशाश्वतीगतिः॥सिंहोमेषोधनुर्नाशंलक्ष्याश्चद्विजयच्छंतीतिबहूदकेवा
प्यादौकालनियमोनास्तीत्याह॥कूपस्यचबहुत्वांबुनीति॥बहुत्वांबुनिसतीकूपस्यप्रतिष्ठाका
र्येत्यर्थः॥कूपस्येत्येतदुपलक्षणंइतरेषां॥तथाचभविष्यपुराणे॥मुनयःकेचिदिच्छंतिअतीतेचो
त्तरायणे॥नकालनीयमस्तत्रप्रमाणंसलिलंयतइति॥तत्रउदगयने॥माघादिपंचमासेषु॥शु
क्लपक्षेचतुर्थीषष्ठ्यष्टमीचतुर्दशीनवमीवर्ज्यंकृष्णपक्षेदशम्यंतानांनिषिद्धवर्जितानांमध्ये

न्यतमस्यांतिथौसंमिद्धास्वपिस्वदैवत्यायांयजमानस्यचंद्रसूर्यताराबलान्वितायांप्रतिष्ठांकु
र्वीयात्॥ अश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तराहस्तस्वात्यनुराधाज्येष्ठाश्रवणमूलधनिष्ठारेवती
नामन्यतमेननक्षत्रे॥ अनुपदिष्टेष्वपिस्वदैवत्येवा॥ उद्दिष्टेदैवत्येवा॥ बुधबृहस्पतिशनैश्चराणा शुक्र
तमे मस्मिंश्चान्येतेवारे॥ अनुपदिष्टेष्वपिस्वदैवत्येवा॥ उद्दिष्टेष्वपिप्रोक्तकालहोरायांभद्रावर्जितक
रणेवैवस्वतमैत्रसावित्रवैराजाभिजिद्रोहिणमाहेंद्रगांधर्वेष्वन्यतमस्मिन्मुहूर्तेगुणान्विते॥
स्थिरलग्नेततोन्यस्मिन्नप्यपिस्थिरेंशेशुभनिमित्तानुमोदितेकालेप्रतिष्ठांकुर्यात्॥ ॥ ३५
इतिप्रतिष्ठाकालनिर्णयः॥ अथप्रतिष्ठायागोपकरणंकथ्यते॥ तत्रउदुंबरवृक्षनिर्मितंक्षीरवृ
क्षजंवाश्रीपर्णीदारुजंवापंचाशत्षट्त्रिंशत्षड्विंशत्॥ त्रिंदशांगुलविस्तारंतद्विगुणदैर्घ्यंषोड

शांगुलोच्छ्रायंपद्मस्वस्तिकालंकृतंचतुष्पादंज्येष्ठादित्रिविधंभद्रपीठत्रयंमंडपार्थेपलाशादि
यज्ञवृक्षोद्भवाःषोडशस्तंभाः॥ तदुपरितिर्यक्काष्ठचतुष्कद्वयं॥ कर्णकाष्ठचतुष्कंच॥ शिखरंच र
नार्थंकाष्ठकलशमेकंप्लक्षोदुंबराश्वत्थन्यग्रोधवादशाखाश्चाष्टौ॥ एततरुसंभूतौत्तरांगानिचत्वा
रितद्वत्स्थूलोपेतानिप्लक्षोदुंबराश्वत्थन्यग्रोधपल्लवतोरणानि॥ द्वादशांगुलविस्तीर्णाद्विति
पंचहस्तापताकाकनिष्ठादित्रिविधाबाहुमात्रीवाताश्चइंद्रायायुधनिभापीतारक्ता॥ कृष्णा
हरिता॥ श्वेता॥ मेघवर्णा॥ रक्तगौरारक्ता॥ मेघवर्णा॥ रक्तापताकादश॥ यथाशोभमपराश्चतस्त्र
श्च॥ दशहस्तास्तावेतएववैणवायज्ञियवृक्षोद्भवावापताकादंडाः॥ वज्रमौक्तिकवैडूर्यशंखव
स्फटिकपुष्परागेंद्रनीलमहानीला॥ इतिरत्नाष्टकं॥ तालकमनःशिलाभ्रककक्षांजनसौराष्ट्री

कसीसहेममाक्षिकगैरिका॥ इतिधात्वष्टकं॥ गोधूमतिलयवमुद्गनीवारश्यामाकहैषप्रिवीह्य स

रक्तचंद- इतिबीजाष्टकं॥ चंदनंअगुरुकर्पूरंकुंकुमंत्रश्रीरवेल्लवीसहदेवीलक्ष्मणा॥ इत्योषध्यष्टकं॥ सुवर्णरजतता ध्य

नार त्र कांस्यारकूटत्रपुसीसतीक्ष्णलोहमितिलोहाष्टकं॥ कांचनपद्मरागपारदसौवर्णपन्नगवलविद्रु

ममितिन्यासद्रव्याणि॥ मधुपर्कपात्रंसौवर्णं॥ ताम्रमयंपंचाशत्पंचविंशतिविंशतिपलंअर्घपा

त्रंत्रिविधं॥ एकमासद्विमासत्रिमासनिर्मितास्तुवर्णजाशलाका॥ पंचरत्नकदेवकद्यं॥ स्थाप

नीयकलशारत्ना निद्राकलशाश्चाष्टौ॥ लोकपालकलशादश॥ वेदिकलशाश्चत्वारः॥ वास्तुमंडलक ३६

लशौ॥ कुंडकलशानवपंचवा॥ निद्राकलशः॥ स्नपनकलशाःपंचचत्वारिंशत वेदिकोणस्तंभगाराणां अं

कुरितधान्यानि॥ द्वारकलशाश्चारादि॥ धारासहस्रान्वितौकलशौ॥ चुल्लीचरुस्थालीपिधानं॥ होम

यष्ठिणीताःकर्कत्विसंख्याकाः॥ स्फटिकास्नापनपात्रं॥ उदकाहरणकुंभाः॥ करकाश्वगजाश्वरथ्यावल्मी

ककूदवराहोत्खातागारगोष्ठस्थानेभ्योमृत्तिकाष्टकं॥ औदुंबरन्यग्रोधाश्वत्थजंबूआम्रलकसंभवं

कषायपंचकं॥ समीपलाशसहितवर्त्तवा॥ हरिद्रासर्षपप्रियंगुध्रौ कोअर्जुनपद्मकेसरगोरोचननागके

सरसहदेवीसिंहीव्याघ्रीबलातिबला॥ शंखपुष्पीवचासुवर्चलारुद्धिवृद्धिशतावरीसूर्यवर्त्ताअप

राजिताविष्णुक्रांताइत्योषधिगणः॥ मुरामांसिवचाकुंष्टंचंदनमुस्तानागतिफलेलालवंगसर्षपकुं

कुमानीतिसर्वौषध्यः॥ शैलेशवचामांसीरजनिद्वयकुष्टचंदनजातिफलमुरामुस्ताकर्पूरकंकोल

धूपसहितमुद्वर्त्तनं॥ गोधूमयवमसूरचूर्णंविरूढकं॥ पंचगव्यं॥ पंचामृतंपृथक्पात्रस्थितं॥ शालि

मुद्गगोधूमतिलकंगूयवरक्तखाट इतिसप्तधान्यानि॥ गोमयं॥ गोघृतं॥ गोश्रृंगोदकंतीर्थोदकं॥ निरा

पो तू
जनाय पिष्टमयपन्नस्वस्तिकशंखादुदीपाश्च॥ दुग्धहस्तकाष्टशय्यातूलिकासपरिछदामंच
कशिर्षोपधानद्वयं॥ श्वेतवस्त्रं॥ चामरं छत्रं॥ विचित्रवितानं॥ स्नापनीयकलशवस्त्राणि॥ त्रेया
दुकूलपट्टाः॥ कार्पासिकाश्च विविधाः छिं॥ ऋत्विक्प्रदेयानि वस्त्राणि॥ शिल्पिवस्त्रयुग्मं॥ ऋत्विजां
मुद्रिकाभरणानि॥ नवग्रहमखसंभाराः॥ पलाशोडुंबराश्वत्थापामार्गशमीसमिधं प्रत्येकं द्वाद
शसहस्राणि षट् सहस्राणि त्रिसहस्रमष्टशतं वा॥ ऋत्विक्कुंडेषु लोकपालयागाय खादि
र पलाशोडुंबराश्वत्थवटापामार्गबिल्वशमीसमिधं प्रत्येकमष्टसहस्रमष्टशतं वा॥ देवालंकर २१
णार्थं मुक्तानि ग्रथितानि पुष्पाणि॥ कुंकुमकर्पूरकस्तूरीयुक्तचंदनं॥ गुग्गुलः॥ धूपदहनपा
त्रं॥ आरात्रिकं॥ घंटा॥ पादुका॥ दर्पणं॥ मुसलोदूखलदृषदुपलशूर्पपात्रांजनपात्रसिंदूरपा
च ग

त्रासनभोजनपात्रघृतपात्राणि॥ विविधो बलिः॥ पापसंभक्ष्यभोज्यनैवेद्यं॥ होमार्थं घृततिलय
वाक्षतफलादिकं॥ प्रतिकुंडे चत्वारो विष्टराः॥ प्रतिकुंडे स्रुक्स्रुवौ॥ उपवेशनायासनानि॥ त्रि
सूत्री॥ पट्टोर्णश्वेतोर्णसूत्रनिर्मितं कौतुकं॥ यज्ञोपस्करणपात्रं जातं॥ मंडलबंधनाय श्वेतरक्त २
पीतनीलकृष्णवर्णकाः॥ यथासंभवं स्नपनकलशपल्लवाः॥ मंडलरचनोपकरणानीति संभारा
श्री न्नाहृत्य यथासौनं कदलीस्तंभादि सर्वमुपाकृत्य मंडपादि कारयेत्॥ ॥ इति रघुसूरिशिष्यत्रि
विक्रमसूरिविरचितायां प्रतिष्ठापद्धतौ संभाराहरणविधिः॥ अथ मंडपकरणं वितन्यते॥ तत्र
शुचिः स्नातः आचार्यो यजमानशिल्पिसहितः शंखतूर्यनिनादैः ब्रह्मघोषैश्च यागमंडपं र
चयेत्॥ तद्यथा॥ नवस्य पुरस्तात् दनावे पूर्वत उत्तरत ईशान्यां वा प्रागुदक्प्रवणे देशे तुषभ

स्मादिविवर्जितेमंडपभूमिंपरिषिंच्यगंधवारिणाभ्युक्ष्यतत्रहस्तमात्रंचतुरस्रंमंडलंकृत्वात
च्चांतर्वास्तुपुरुषंयवैःशालिपिष्टेनवाशतमालिख्यवारिपूर्णंकलशमादायतस्यमुखेमहेश्वरं
आवोराजानमितिविन्यसेत्॥ईशंविष्णुरितिमध्येविष्णुं॥ब्रह्मयज्ञानमितिमूलेब्रह्माणं॥स्यो
नापृथिवीतिकुक्षिदेशेपृथिवीं॥मातृभ्योनमइतिमध्येमातृगणमितिदेवमयंकृत्वापल्लवा
ननपूर्णपात्राढ्यंदूर्वाचंदनभूषितमाजिघ्रकलशमितिब्रह्मस्थानेतंविन्यस्यगंधपुष्पादिभिः
समभ्यर्च्यतदीशानादिक्रमेणशिवादीन्लोकपालान्समभ्यर्च्यतद्बाह्येविश्वकर्मादीनिचब्रह्मा ३९
णिविन्यस्यपूजयित्वावास्तुपूजांकृत्वामंडपदारुणिशिरोहरयेत्॥अथयजमानआचार्यब्रा
ह्मणशिल्पिनस्रक्चंदनतांबूलादिभिःपूजयेत्॥आचार्योयजमानहस्तेब्रह्मयज्ञानमिति

ब्रह्माणंविन्यस्यसूत्रेगायत्रीशक्तिंचगंधादिभिःसंपूज्यरक्तवस्त्रखंडेसिद्धार्थकदूर्वादध्यक्षता
न्वितांरक्तसूत्रनिबद्धांरक्तांपोटलिकामध्यवोचदितिबध्वावास्तुकलशपूजनमुपसंहृत्यकल
शोदकेनमंडलधरांप्रदक्षिणंसर्वेषामुपकरणानांदत्वा॥कलशंस्वस्थानस्थंगंधाद्यैःप्रपूज्यदिग्
बलिंविधायपुण्याहंवाचयित्वायजमानहस्तंगृहीत्वासुमुहूर्तेविश्वकर्माणंस्मृत्वासमुत्थायसु
मुहूर्तेमस्त्वित्युक्त्वाप्रासादगर्भेबहिर्मुखंसूत्रंप्रसार्यधाम्नःपंचगुणंधामसंमितंवादशाकरसंमि
तंवानुवंसोपानायपरित्यज्यततस्तेनसूत्रेणषोडशहस्तंद्वादशहस्तंवाकुर्यात्॥यद्वावर्णभेदेन
विंशतिहस्तोमंडपोब्राह्मणस्य॥षोडशहस्तःक्षत्रियस्य॥द्वादशहस्तोवैश्यस्य॥दशहस्तोष्टह
स्तोवाशूद्रस्य॥अथवाद्वादशहस्तादारभ्यद्विहस्तवृध्याअष्टविंशतिपर्यंतंनवमंडपाभवंति॥ते

शू

यांनामानि॥ घनो घोषो विराजश्चक्रो चनक्का मदायकौ॥ सुघोषो घर्घरो दक्षो मंडपानामतोध्रुव
मिति॥ तत्राद्यस्त्रयः कनिष्ठार्चायां॥ मध्यमामध्यमायां॥ उत्तमाउत्तमायां॥ महार्चास्थापने
पंचासत्यं चचत्वारिंशच्चत्वारिंशद्धस्तास्त्रयो मंडपाः विपुलविभ्रमन्हरिनामानो भवंति॥ स्वयंभु
विबाणलिंगे देवर्षिस्थापिते वालिंगे आर्चायां च यथारुचि मंडपो भवति॥ तेषामन्यतमं प्रतिमा
द्यनुसारेण रचयेत्॥ तत्र षड्हस्तोच्छ्रयः कनिष्ठमंडपोष्टहस्तोच्छ्रायो मध्यमो दशहस्तो
च्छ्रायो ज्येष्ठः॥ तत्र वह्निकोणस्यादक्षिणेन षोडशस्तंभानां॥ तास्त्रयस्त्रिहस्तेसंनवा॥ पालाभ्यो ३९
वा भवंति॥ तत्र समंतात्द्वादशमध्येचतस्रस्तन्मूर्द्धिवलिकाः आगया उदगया श्च॥ तदूर्ध्वं वंशास्ततः
छादनानि ततस्तेजन्य इति निवर्तिं कृत्वा तस्य मध्ये चतुरस्रा चतुर्हस्ता वा पंचहस्ता वा कनिष्ठावे

दिः॥ षड्हस्ता सप्तहस्ता वा मध्यमा॥ अष्टहस्ता नवहस्ता वा श्रेष्ठा॥ तत्र कनिष्ठा हस्तोच्छ्रया॥ मध्य
मा ष्टांगुलहस्तोच्छ्रया॥ द्विहस्तोच्छ्रया श्रेष्ठा॥ पद्वाहस्तोच्छ्राया त्रिविधापि वेदिका मंडपनवभागेन
यथा॥ त्रिभागीकृते मंडपे मध्यभागो वेदिः॥ दर्पणोदरसन्निभा कूर्मपृष्ठोन्नता कर्तव्या॥ वेदिग
र्भसूत्रेण कुंडानि द्वाराणि च साधयेद्यथा॥ गर्भो न चलितः॥ ॥इति श्रीरघुसूरिसूनुत्रिविक्रम
सूरिविरचितायां प्रतिष्ठापद्धतौ मंडपकरणं॥ अथ कुंडलक्षणमुच्यते॥ ॥वेदिभित्तितः सम
ताच्चयोदशांगुलांतरं हस्तमात्रांतरं त्रिंशदंगुलांतरं कनिष्ठादिवैदिक्रमेण परित्यज्य सर्वतो
धस्तात्वहस्तमात्राणि समेखलानि सकंठानि चतुरस्राणि वर्तुलानि वा नव पंच वा कुंडानि वि
दध्यात्॥ तत्र नव चेत्प्रागाद्यष्टदिक्षु॥ पंच चेत्प्रागादि दिक्षु॥ तत्र नवममीशानपूर्वं कुंडांतरा

प

ले॥ पंचममैशानकोणे भवति॥ यद्वा कुंडस्वरूपाणि प्रागादिचतुःकोणभगाकारार्धचंद्राकृतित्रि
कोणवर्तुलषट्कोणपद्माकाराष्टकोणानि भवंति॥ नंदकनीमकसौम्यचंद्रगंभीरधूमकेतुनिवा
सकनिर्मुक्तिसंज्ञकानि॥ श्रेयःप्रशांतिरिपुनाशपुष्टिशत्रूच्चाटनारोग्यसिद्धिकराणि॥ तत्र
षडंगुल एकांगुलो वा कुंडकंठो भवति॥ कंठसमंतात्पंचत्रिरेका वा कुंडाकारा मेखला भवंति॥ त
त्र पंच चेदुपर्युपरि षट् पंच चतुस्त्रिद्व्यंगुलैकविस्तारोच्छ्राया भवंति॥ तिस्रश्चेच्चतुस्त्रिद्व्यंगुलाः॥ एका
चेच्चतुरंगुला षडंगुला वा तदुपर्युपरि षट् पंच चतुस्त्रिद्व्यंगुलैकविस्तारोच्छ्राया भवंति तिस्रश्चेच्च ४०
तुस्त्रिद्व्यंगुलाः॥ एका चेच्चतुरंगुला षडंगुला वा॥ तदुपरि वितस्तिमात्रायामा षट्सप्तांगुलविस्तारां
गुलोच्छ्रायांगुलनिम्नतोष्ठा॥ पूर्वाग्नेययाम्यकुंडेषूत्तराननायोनिः॥ शेषेषु पूर्वानना॥ आचार्यकुंडे

ध

न्युत्तराननेति॥ ॥इति कुंडलक्षणं॥ ॥अथ द्वाराणि वक्रकृमिस्थूलग्रंथिविवर्जितानि॥ न्यग्रो
धु धपलाशोदुंबरसिंदुकाश्वत्थमधुकप्लक्षबिल्वतरुसंभवान्यष्टौ चत्वारि चेत्प्लक्षोदुंबराश्व
त्थन्यग्रोधशाखानि पंच षट् सप्त हस्तानि कनिष्ठमध्यमज्येष्ठानि॥ अष्टद्वारपक्षे पूर्वाग्नेये
शानस्थितानि पूर्वमुखानि॥ नैर्ऋत्यपश्चिमवायव्यानि पश्चिमाननानि दक्षिणद्वारं दक्षिण
मुखं॥ उत्तरमुदङ्मुखं॥ हस्तसमखातानि॥ कनिष्ठानि अष्टांगुलहस्तखातानि मध्य
मानि षोडशांगुलाधिकहस्तसंमितखातानि श्रेष्ठानि॥ सर्वाण्युच्छ्रायार्धविस्ताराणि॥ पूर्व
वत्रिशूलोपेतानि त्रिशूलानि च मुद्गहस्तचतुरंगुलाधिकहस्तसंमितखातानि श्रेष्ठानि॥ त्रिविध
सर्वाण्युच्छ्रायार्धविस्ताराणि॥ चतुरंगुलविस्ताराणि चतुरस्राणि एतानि कुर्यात्॥ घंटाचा

मरसरुद्रमाल्ययुतानि कदलीस्तंभान्वितानि। तत्र चूततरुपल्लवतोरणानि। मंडपं पुष्पमा
लाचामरदर्पणनारिकेलनारंगमातुलिंगद्राक्षाकदलीफलैर्भूषितं। मंडपस्यैशान्यां चत्वरस्यां पू
र्वस्यां वा दिशि चतुर्हस्तां तोरणमहामंडपार्धमानेन त्रिभागेन। चतुर्भागेन वा प्रासादमानेन
वा चतुष्कोणं ध्वजस्तंभान्वितां नान्वितं कदलीस्तंभयुतं चतुर्द्वारं पूर्वमुखमुत्तरमुखं वा स्नपन
मंडपं कुर्यात्। तन्मध्ये वेदिकात्रयं द्विहस्तं त्रिहस्तं चतुर्हस्तं वोदकसंस्थमुदकप्रवणं चतु
र्थं सिद्धार्थं द्विमेखलं मिष्टकामयं वालुकाकीर्णं कुर्यात्। यद्वा महावेद्यर्धविस्तीर्णं तदुच्छ्रायं वा ४२
विदध्यात्॥ ॥इति वेदिकालक्षणं॥ ॥अथ प्रासादगर्भे देवतास्थापनादिकं कथ्यते। सप्तभा
गीकृते सर्वे गर्भे ब्रह्मस्थानं तु मध्यतः। राक्षसासुरमनुष्याणां दृष्टा तेषां क्रमाश्रयः। मनुष्यासु

रयोर्मध्ये तु चाद्भिः स्थापयेत्सदा। रक्षोंशे स्थापनं श्रेष्ठं धनायुर्धान्यनासकृत्। कुड्यलग्नानकर्त्त
व्या स्थापने स्तु न मिष्ठता॥ कुड्येन सह संसृष्टा कार्यजमानं विनाशयेत्॥ अथवा॥ षड्भागगर्भाजिते ग
र्भे त्वेकांशं संसृष्टं तत्त्यजेत्॥ स्थापनं पंचमे भागे सर्वेषां तु सुखावहं॥ अष्टधा वा कृते गर्भे त्वेकांशं
पूर्वतस्त्यजेत्॥ सप्तमे विजयं राज्ञः स्वच्छंदर्णस्य संपदः॥ षष्ठे व्ययं ह्वयो व्याधिर्भोगहीनो न नंदति
॥भित्तौ लग्नायदाशोकोद्वेगो निश्रियो जनः॥ चतुर्थे तस्करम्लेच्छा भिन्नतां नवति प्रजा॥ अथ
वा॥ गर्भमध्याद्विपश्चात्या नित्यं तं सूत्रसप्तकं॥ समं ब्रह्मादिरक्षांतं देवतानां नवेक्रमात्॥ तत्र
ब्रह्मांशे शिवः स्थाप्यो व्यक्ताव्यक्तो मयात्मकः॥ प्राजापत्ये पुनः स्थाने हरिर्ब्रह्मा दिवाकरः॥ सौम्यष
डानन्नागौरी लक्ष्मी दुर्गा गणाधिपः॥ ऐंद्रे भास्कररोरुद्रा लोके सामरुतोयहाः॥ गांधर्वे मुनयो

नागाःसिद्धविद्याधरादयः॥स्वस्थानेयक्षरक्षांसिपिशाचाभित्तिमध्यतः॥ब्रह्मस्थानस्थितायां
तुसर्वपापीड्यतेप्रजा॥स्थापकोयजमानादिःशिल्पिवर्गश्चपीड्यते॥ब्रह्मस्थानमितिप्रोक्तंग
र्भसूत्रद्वयायुतिः॥तस्याप्यपरभित्तेश्चमध्यंकृत्वातुसमर्धं॥तत्रसूत्रचतुष्केतुपीठगर्भोभि
धीयते॥मंडपेचतुरस्रेतुप्रतिष्ठायदिसंभवेत्॥ब्रह्मस्थानेप्रतिष्ठाप्याःप्रतिमास्सकक्षाअपि
॥चतुरस्रंचतुर्द्वारिंगलिंगेहर्म्यपिवा॥तत्रापिप्रतिमाःसर्वाःब्रह्मस्थानेनिवेशयेत्॥एकद्वा
वे रंयदाकेश्मतत्रापित्रिदशाधिपाः॥विकलाःप्रतिमाःसर्वाःब्रह्मस्थानेनिवेशयेत्॥सकक्षा ४२
पिहितामूर्त्तिःब्रह्मस्थानाद्विहिःस्थराफ॥वराहोत्तरसिंहश्चवैकुंठोहयग्रीववक्रकः॥त्रैलोक्यमो
हनःस्थाप्याब्रह्मस्थानेविजानता॥शयानांस्थापयेन्नैत्रीब्रह्ममानुषकांतरे॥उपविष्टास

द्वास्थाप्यामनुष्याणांपुरेषुच॥संस्थितादैवकेवापिदैवमानुषकेपिवा॥अन्याश्चप्रतिमाःसर्वादेव
स्थानेनिवेशयेत्॥ब्रह्मसूत्रचतुष्केतुस्थापयेत्कूर्मशिलांततः॥तज्ज्ञैर्विन्यसेत्कूर्मंसौवर्णंशि
रसन्मुखं॥तत्ररत्नादिभिःसार्द्धंभूमिचक्रदयेनतु॥न्यस्यब्रह्मशिलांपश्चात्तेनैववर्त्मना
न्यसेत्॥न्यस्यैवचहितज्ज्ञैर्नीरंध्रंवज्रलेपकैः॥लिप्तायथातितोयेनप्रोक्तोलिख्यात्कवत्त
तः॥ततस्तेजोभिधांशक्तिंकलितांसनरूपिणीं॥संपूज्योत्क्रमाद्भैरत्नादिन्यासमाचरेत्
तन्मध्येस्थापयेल्लिंगंवेधदोषविशंकया॥तस्मान्मध्यंपरित्यज्ययवार्धेनयवेनवा॥व्यक्ताव्य
नांचसंस्थानंक्रियाशक्तिपुरस्सरं॥रत्नादिपंचकंयच्चकूर्माद्यंयत्सकीर्त्तितं॥तत्सर्वंचवि
नानाव्यपीठवर्त्तेनिवेशयेत्॥दत्वानासाग्रसूत्रंतुलंबमानमधोनयेत्॥कूर्मनेमारवजितेदृष्ट्वा

सामूर्त्तिःसततांव्रजेत्॥तथानासाग्रसूत्रंतुलंबमानमध्येनयेत्॥कृत्वाग्निमध्यदेशंतुसमंता
त्सचयेद्बुधः॥सामूर्त्तिःशुभदाज्ञेयानाधोदृष्टिनचोर्ध्वगा॥नपार्श्वगात्त्वयामूर्त्तिःसाशुभारोग्य
दायका॥ ॥अथप्रतिमापिंडिकोर्ध्वमानं॥द्वारोच्छ्रयोह्यष्टभागःत्रिधातत्रोर्ध्वगयोःसमार्चति
द्वयोभागोदिहस्तुत्र्यसंयुतः॥पिंडिकोर्ध्वप्रमाणंस्यादूर्ध्वस्यप्रतिमाभवेत्॥ अथप्रतिमादृष्टि
पदं॥द्वारदेशोष्टधाभक्तेसप्तमस्यतुसप्तमे॥दृष्टिर्मूर्द्धस्थितार्चानांभागेशिल्पीप्रकल्पयेत्॥आ
सीनानांपंचमस्यपंचमेदृष्टिमादिशेत्॥शयानानांतृतीयस्यतृतीयेसमसूत्रतइति॥एवंस्वप ४२
दस्थितायामर्चायांतदृष्टेःसूत्रतः॥प्रतिमापिंडिकयोर्निश्चलत्वंसंसाध्यनिरोधंस्थित्वाप्रति
मामूर्त्तायिकर्मकुटीनयेत्॥अथपिंडिकोपरिचलनाद्बहिःचष्टासुदिक्षुसूत्रंदत्वाप्राच्यादि

क्रमेणशास्त्रेणरेखानिष्पाद्यतासुनिष्पावधान्यंपंचवावरकान्रत्नन्यासार्थंकल्पयेत्॥अथमह
तीप्रतिमापुनःपुनश्चालयितुंनशक्यतेतितदावक्ष्यमाणप्रकारेणमंत्रवर्जितंरत्नन्यासंकृत्वा।
पिंडिकोपर्यंतिर्धनायसुवर्णशलाकांप्रतिष्ठालग्नंयावद्द्यात्॥तदुपरिपूर्ववत्प्रतिमामचलां
कृत्वाप्रतिमामचलांकृत्वावज्रलेपादिनाप्रतिमापिंडिकयोरंतरंनिश्छिद्रंविधायपट्टकूलादि
नाप्रतिमांपिधायवैधस्नपनादिकंदेवस्नपनादिकंयावत्तद्विधायवेद्यांनरक्षयेदिति॥ ॥
इतिश्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौप्रासादगर्भेदेवस्थापनवि
धिः॥ ॥अथयजमानःपत्न्यासहप्रायश्चित्तव्रतेनसद्यआत्मानंपावयित्वादैशिकमतेस्व
शक्त्यनुसारेणकरिष्यमाणयागसाधनसंपत्तिमवलोक्यतत्कर्मसमर्थंभृत्यादिकंकल्पये

त्य। अथ करिष्यमाणोत्तमादिपक्षस्वीकृतमार्गानुसारेण प्रतिष्ठालग्नात्पूर्वं सप्तमदिने पंचमदि-
ने द्विदिने वा शुभमुहूर्ते प्रतिष्ठायागमारभेत॥ तद्यथा॥ यजमानभवने बहिःशालायां देशिकान्वि-
तो यजमानः शुचिः शुक्लवस्त्रमाल्यानुलेपनो गणेशादिस्मरणं कृत्वा देशकालग्नमात्मनो चि-
श्राय पूर्वाह्णि पुण्याहवाचनं कृत्वा मंडपस्थापनं कृत्वा मातृपूजां विधाय मात्रादिसंबंधस्याभ्यु-
दयिकं श्राद्धं यथाविधि कुर्यात्॥ तत्राचार्यसंकल्पमंत्रः॥ प्रतिष्ठायागनिमित्तं श्राद्धमेतत्सुदुर्ल-
भं॥ यजमानायात्मनः शक्यं करिष्यमाणपूर्वकमिति॥ मंत्रमुच्चार्य शिरसि यजमानः स्वगृह्योक्त- ४४
विधिना प्रसादयेत्॥ ततो ब्राह्मणेभ्य आशिषो लब्ध्वा करिष्यमाणकर्मसंसिद्धिमाशास्य।
अक्षतमंडलके ब्रह्माचार्यादीनां चरणौ प्रक्षालयित्वा तान्गंधादिनाभ्यर्च्य पृथक्पृ-

थक् आसनेषु प्राङ्मुखानुदङ्मुखान्वा कृत्वा यथाक्रममुपवेशयेत्॥ तत्रादौ ब्राह्मणमथाचार्यं
ततो वरक्रमेण यथार्हं वैदिकश्रेष्ठमध्यमनिष्ठाल्पप्रतिष्ठानुसारेण द्वात्रिंशत् षोडशाष्टौ चत्वारो
वा ऋत्विजोऽष्टौ चत्वारो वा द्वारपालान्वृणीयात्॥ तद्यथा॥ आचार्यानुमते स्थितो यजमानः स्वस्तु-
तोर्चितां गंधपुष्पवस्त्राभरणानि साधनसंपत्तिं कुर्यात्॥ विभवानुसारेण॥ यद्वा वस्त्राभरणादि
ब्राह्मणे देयं तत्सर्वं द्विगुणमूल्यमाचार्याय॥ ब्राह्मणे देयार्धमूल्यं ऋत्विग्भ्यः॥ तदर्धं द्वारजापिभ्यो
ऽथान्येभ्योऽपि सदस्येभ्यः॥ तथा छत्रकमुंडलुउपानहादि च कल्पयेत्॥ ततो ब्राह्मणः पुरत उपवि-
श्य प्राणायामं कृत्वा स्वगृह्योक्तविधिना मधुपर्कं विधाय तस्मै गंधपुष्पादिकं दत्वा वस्त्रालंक-
रणाद्यं हस्ते प्रतिपाद्य वरणार्थमेवं प्रयोगं कुर्यात्॥ तद्यथा॥ अस्मिन्काले अस्मिन्देशे अमुक

वेदाध्यायिनं अमुकगोत्रं अमुकशर्माणं सांगे प्रतिष्ठाकर्मणि ब्रह्मसाध्यकर्मसिद्ध्ये अमुकवे
दाध्याय्यमुकगोत्रोमुकशर्माहं अमुकवस्त्रालंकरणादिना द्रव्येण ब्रह्माणं त्वां वृणे ॥ वृतोस्मी
ति प्रतिवचनं एवमाचार्यमृत्विजो द्वारपालांश्च वृणुयात् ॥ अथ क्वचित् क्वचित् सिद्धये कर्म
स्यानुकूलां सुदयः कर्मविधेः प्रतिपुरुषाय किंचित्किंचित् दापयित्वाचार्यः स्वीकुर्यात् ॥
तत्कर्मविचक्षणार्थमुपदृष्टसदस्यांश्च ॥ एवं कृत्वा यजमानः पुष्पमालादिकं गृहीत्वा समीपमा
गत्य पुरत उपविश्य प्रणिपत्याचार्यं प्रार्थयेत् ॥ यथा ॥ मंत्रमूर्ति भवान्नाथ संसारोच्छेदकारक ४५
॥ देवः पूजार्थं हि यथा स्यात्कुरुष्व मेद्य तिं चनः ॥ संसारभयनीतेन अयं यस्तु मक्तितः ॥ प्राणेश्वर
स्त्वत्प्रसादेन निर्विघ्नं मे भवत्वपि ॥ अथ गंधपुष्पादियागोपकरणजातं तं तत्तैर्य हि ग्राहयित्वा आ

चार्यो यजमानगोत्रपुत्रनार्यान्वितस्तूर्यघोषेण शांतिपाठेन मंगलगीतरवैः यागमंडपमा
गत्य पूर्वकृते कोष्ठागारे साधनजातं निवेश्य यजमानो गोत्रपुत्रकलत्राद्यन्वितो महामंडपं
पश्चिमद्वारेण प्रविश्य वेद्याः प्राक् प्रत्यङ्मुख उपविशेत् ॥ अथाचार्यः सऋत्विक्द्वारपालो
कृते यजमानमाशीर्भिरभिनंद्य शांतिघोषेण यजमानं मंडपांतरे निवेशयेत् ॥ ॥ इति श्रीरघु
सूरिसूनुत्रिविक्रमसूरिविरचितायां प्रतिष्ठापद्धतौ ब्रह्माचार्यवरणं ॥ ॥ अथ आचार्यो ब्रा
ह्मणैर्गंधादिकं ग्राहयित्वा मंडपमनुमंत्रयेत् ॥ तद्यथा ॥ वेदिकाग्नेयकोणे प्रथमां स्थूणां [illegible]
दायै नमः इत्यालभ्य गंधादिना पूजयेत् ॥ भद्रायै नमः इति द्वितीयां ॥ अदित्यै नमः इति तृतीयां
नंदायै नमः इति चतुर्थी ॥ अथ मंडपाग्नेयकोणे नंदत्यै नमः इति प्रथमां स्थूणां आवाहयामीति स

र्वत्रोहंकुर्यात्॥ततःप्रदक्षिणक्रमेणसरस्वत्यैनमइतिद्वितीयां॥पूर्वसंध्यायैनमईतितृतीयां
मध्यसंध्यायैनमईतिचतुर्थी॥पश्चिमसंध्यायैनमईतिपंचमी॥गायत्र्यैनमईतिषष्ठी॥सावि
त्र्यैनमईतिसप्तमी॥बृहत्यैनमइत्यष्टमी॥अदित्यैनमईतिनवमी॥विनतायैनमइतिदश
मी॥पौर्णमास्यैनमइत्येकादशी॥सिनीवाल्यैनमईतिद्वादशी॥इतिषोडशस्थूणाआलभ्यगंधा
दिनापूजयेत्॥नागमात्रेनमईतिबलिकां॥सर्पेभ्योनमइतिशाखोर्द्धधनमानिमंत्र्यसंपूज्य
पश्चिमद्वारेणनिर्गत्यपूर्वादितोरणपद्धतिपूजामारभेत्॥ ॥इतिमंडपानुमंत्रणं॥ ॥अथ ४६
द्वारतोरणपूजा॥आयाहिवज्रसंघातैःपूर्वद्वारकृताद्विप॥ऋग्वेदाधिपैनाम्नासुशोभनननमोस्तु
ते॥अनेनैवद्वारदेवताआवाहनं॥अग्निमीलेईतितोरणलंभनं॥प्राचींचदिशमाश्रित्यसुदृढंना
तै ते

मतोरणं॥महावीर्यंमहाकायमिंद्रायुधसमप्रभं॥अस्मिन्महोत्सवेयत्नेकत्तूनांप्रवरेस्तुमे॥एह्ये
हि अश्वत्थऋग्वेदाधिष्ठितईद्रदैवत्यमहातोरणएनंयत्नंरक्षसर्वविघ्नान्निवारय॥ऋग्वेदाधिष्ठिता
यमहातोरणायनमइतिगंधादिभिरर्चयेत्॥अथत्रिशूलशृंगेषुप्रदक्षिणक्रमेणादित्यन्यासः॥प्र
थमशृंगेइंद्रं॥द्वितीयेधातारं॥तृतीयेत्वगमित्यादित्यत्रयं॥द्वारशाखयोर्ध्वेचश्वरंचेतिवसुरुद्रयंना
ममंत्रैर्गंधादिनासंपूज्यशृंगेषुशाखयोर्वस्त्राणिबध्वाशाखामूलयोर्धान्यपुंजोपरिवारिपूर्णैरत्नग
र्भौवस्त्रयुगछन्नौप्रशांतशिशिरनामानौकलशौजातबीजांकुरशरावपिहितौआजिघ्रकल
शमितिप्रतिष्ठाप्यनाममंत्रेणगंधादिनापूजयेत्॥अथद्वारदेशेइंद्रमावाहयेत्॥इंद्रःसुरप
तिश्चैववज्रहस्तोमहाबलः॥शतयागाधिपोदेवस्तस्मैयागात्मनेनमः॥इंद्रायाहीतिपी॥तप

ताकालंभनः॥ ॐ इंद्रायाहि चित्रभानो सुता इमे त्वायवः॥ अण्वीभिस्तना पूतासः॥ त्रातारमिंद्र
मितिस्तस्यास्तोरणोपरि निधानं॥ ईद्रंपरेखईतीद्रसंन्निधानं॥ ईद्रंपरेवरेमध्यमासइंद्रयंतोव
सित्तासईद्रं॥ इंद्रह्वियंतयुध्यमानाइंद्रनरोवाजयंतोहवंते॥ योमेदंडईतिसर्वत्रदंडारोपणं॥ ई
द्रायसामगायतेतिइंद्रायसामगायतविप्रायबृहतेबृहत्॥ धर्मकृतेविपश्चितेपनस्यवे॥ गंध
पुष्पधूपादि॥ उदकानिमंत्रितोद्दत्तोबलिदानं॥ शचीपतेगजारूढवज्रहस्तसुराधिप॥ पूर्वाक
क्षत्रयुष्मानीरक्षणीयाप्रयत्नतइतिप्रार्थनं॥ अथद्वारशाखयोः ऋ लोकायनमः॥ भुवर्लोकाय ७
नमः॥ पुनः आदित्यायनमः॥ सोमायनमः॥ ऋ ध्वौंडुंबरे ऋग्वेदायनमः॥ द्वारशाखयोर्गंगायैन
मः॥ यमुनायैनमः॥ उत्तरांगेगणेशायनमः॥ श्रियैनमः॥ ध्वजेकुमुदायनमः॥ योमेदंडइति

ध्वजदंडालंभः॥ योमेदंडः परापतद्वैहायसोधिभूम्यां॥ तमहंपुनरादद आयुषेब्रह्मणेब्रह्मवर्च
साय॥ क्षेत्रकायक्षेत्रपालायनमः॥ नाममंत्रैर्गंधादिनाबल्यंतपूजनंकुर्यात्॥ ऋग्वेदमग्निमी
ळइति मंत्रेणसांगंसपरिवारंगंधाद्युपचारैः पूजयेत्॥ ऋग्वेदध्यानं॥ ऋग्वेदः पद्मपत्राक्षोगाय
त्रसोमदैवतः॥ अत्रिगोत्रस्तु विप्रेंद्रः कुत्विक्कलेमेमखेभव॥ तत्रजपः॥ श्रीसूक्तंपावमानंचसो
मसूक्तंसुमंगलं॥ पौरुषंरुद्रसूक्तंचवामदेव्यंतथैवच॥ अग्निमीळइत्यादिनैकविंशत्यनुवाका
न्॥ पवमानंकनिक्रददिति॥ तथाऋग्वेदोक्तंशांतिपाठंतत्रसूयोरिति॥ ॥ अथाग्नेयकोणे अग्ने य
रावाहनादि॥ तद्यथा॥ सर्वदेवमयोदेवोरक्तोवह्निर्महाबलः॥ सप्तजिह्वोमहावीर्योनमोवैश्वा
नरायते॥ अग्न आयाहीतिसौवर्णपताकायांनमः॥ त्वन्नो अग्न इतिपताकोच्छ्रयः॥ ध्यामंतो॥ वि

स्वमित्यग्नेःपूजनं ॥ अग्निर्दूतमित्याज्योदनोबलिदानं ॥ ध्वजे कुमुदाद्यायनमः ॥ योमेदंडई
तिध्वजदंडार्पणंमंत्रः ॥ तत्रत्रिपुरघ्नायरुद्रेभ्यःपालायनमः ॥ नमस्तेत्वग्निरूपायपिंगलायमहात्म
ने ॥ चंडायचंडरूपायरक्तलेहव्यवाहने ॥ अथयाम्येपूर्ववत् ॥ नमस्तेधर्मराजाय ॥ त्रेतायुगा
धिपायच ॥ यजुर्वेदाधिदेवायसुनंदाद्वाररक्षिणे ॥ अनेनद्वारदेवतावाहनं ॥ इषेत्वेतितो
रणालंभनं ॥ दक्षिणांदिशामाश्रित्यविकटंनामतोरणं ॥ महावीर्यंमहाकायंभिन्नांजनसम
प्रभं ॥ एह्येहिअस्मिन्नौदुंबरमहातोरणयजुर्वेदाधिष्ठितयमदेवत्यैर्नयज्ञंममसकार्यंभि ४८
न्नौरक्षसर्वविघ्नान्निवारय ॥ यजुर्वेदाधिष्ठितायऔदुंबरतोरणायइतिगंधादिनापूजये
त् ॥ अथशृंगेष्वादित्यान्नापूजनेनमंत्रः ॥ मित्रायनमः ॥ वरुणायनमः ॥ द्वारशाखयोःसौम्या

यनमः ॥ आपायनमितिवसुद्वयं ॥ नाममंत्रेणगंधादिनासंपूज्य ॥ शृंगेषुशाखयोर्वस्त्राणिबध्वा
शाखामूलयोर्धान्यपुंजोपरिवारिपूर्णौरत्नगर्भौवस्त्रयुगच्छन्नौपर्जन्याशोकपल्लवनामानौकल
शौजातबीजांकुरसरावपिहितौआजिघ्रकलशमितिप्रतिष्ठाप्यनाममंत्रेणगंधादिनापूजये
त् ॥ अथद्वारदेशेयममावाहयेत् ॥ दंडहस्तोयमोदेवोधर्माध्यक्षोमहाबलः ॥ आवाहयेद्धर्म
राजंतस्मैप्रेतात्मनेनमः ॥ यमायत्वामखायत्वेतिश्यामपताकालंभनं ॥ यमायत्वागिरस्वतइ
तितस्यास्तोरणोपरिनिधानं ॥ यमायसोममितियमसन्निधानं ॥ योमेदंडइतिदंडार्पणं ॥ सु
गंनुपंथामितिअत्रगंधपुष्पधूपदीपादिमाषान्नबलिदानं ॥ वैवस्वतमहादेवनमस्तेधर्मशालि
क ॥ शिवान्यापिहितोदेवदिशंरक्षनवानिह ॥ अथद्वारशाखयोःस्वर्लोकायनमः ॥ महर्लोका

यनमः॥ पुनर्भौमायनमः॥ बुधायनमः॥ उद्धौंडुंबरेयजुर्वेदायनमः॥ कारशाख॥ योगीदायैनमः व
कल्याण्यै॥ नाममंत्रैर्गंधादिबल्यंतंपूजनंकुर्यात्॥ यजुर्वेदमिषेत्वेतिमंत्रेणसांगंसपरिवारं
गंधाद्युपचारैःपूजयेत्॥ यजुर्वेदध्यानं॥ कातरक्तोयजुर्वेदस्त्रेष्टुनोविष्णुदैवतः॥ काश्यपेय
स्तुविप्रेंद्रकुत्विकस्त्वंमेमखेभव॥ तत्र॥ आनोभद्रानुवाकस्य आशुःशिशानकस्तथा॥ यद्देवा
त्रीणिचपठेत्ततस्तोष्टेत्पुनर्नुमा॥ अभिधा असिसैसेत्वद्दीर्घायुश्चैस्तेऊचापठेत्॥ द्यौःशांति
रेकाप्यायस्वषट्॥ पयःपृथिव्यामेकया॥ नमोस्तुसर्पेभ्यो आकृष्णेनदेवस्य त्वाएथकस्तथक ८९
नमःसंभवमित्येका एकाग्निर्देवताकमात्॥ त्रातारमिंद्रमग्निमित्येकासोमेराज्ञानमेक
या॥ अन्नपतेमहाइंद्रश्चवाचंसमग्रकं॥ इतिशांतिपाठंपठेत्॥ इषेत्वेतियजुर्वेदोक्तंशांतिपा

ठंपठेत्॥ अथनैरृत्यांनैरृतेरावाहनादि॥ तद्यथा॥ सर्वपेताधिपोदेवोनैरृतिर्नीलविग्रहः॥ क
रेसखड्गधरोनित्यंनैरृतायनमोनमः त्वामावाहयामीत्यहंप्रयुंजीत॥ एवंयस्मिन्मंत्रेयत्पद
मपठितंतत्तत्वाहनीयं॥ यत्तेदेवीनिरृतिरितिकृष्णपताकालंभः॥ एषतेनिरृतेभागइतिपताकां
ब्रूयः असुंन्वतामितिनिरृतेर्गंधादिनिःपूजनं॥ मोषूणइतिकृष्णबीजान्नंपुराणघृतसहितंब
लिंदद्यात्॥ ध्रुजेवामनायनमः॥ योमेदंडइतिदंडालंभः॥ दंडे अग्निजिह्वायक्षेत्रपालायनमः
॥ राक्षसेभ्योहिरक्षार्थंभवानत्रप्रतिष्ठितः॥ निर्विघ्नायज्ञभूमिंत्वंकुरुश्वशवाहन॥ अथपश्चि
मायां॥ नमोस्तुकामरूपायपश्चिमद्वारपायच॥ सामवेदाधिपत्वंहिनाम्नाकल्याणकारक॥
अनेनद्वारदेवतावाहनं॥ अग्नआयाहीतितोरणालंभः॥ प्रतीचींदिशमाश्रित्यसुनीमंनाम

तोरणं॥ महावीर्यं महाकायं सुवर्णसदृशप्रभं॥ एह्येहि सामवेदाधिष्ठितश्चात्र महातोरण वरुण
देवतैनं पुरस्तात्॥ सर्वविघ्नान्निवारणाय॥ सामवेदाय पश्चिमतोरणाय नमः इति गंधादिभिरर्च
येत्॥ अथ त्रिशूलस्थं गोधादित्यान्॥ अर्यम्णे नमः॥ अंशाय नमः॥ विवस्वते नमः॥ द्वारशाखयोः
अनिलाय नमः॥ अनलाय नमः इति वसुदयोः॥ नाममंत्रैर्गंधादिना संपूज्य स्थंभेषु शाखयोर्व
स्त्राणि बध्वा शाखामूलयोर्धान्यपरिवारिपूर्णौ रत्नगर्भौ वस्त्रयुगच्छन्नौ कृतसंजीवनामृत
नामानौ कलशौ जातबीजांकुरशरावपिहितौ आजिघ्र कलशमिति प्रतिष्ठाप्य कृतजीव ५०
नाय नमः॥ अमृताय नमः इति नाममंत्रेण गंधादिना पूरयेत्॥ अथ द्वारदेशे वरुणमा
वाहयेत्॥ पाशहस्तात्मको देवो जलराश्याधिपो महान्॥ निम्नगामीति विख्यातो वरुण

यन मो नमः॥ इमं मे वरुणेति श्वेतपताकालेनमः॥ उदुत्तमं वरुणेति तस्यास्तोरणोर्ध्वं निधाय दि
तत्वायामीति वरुणसन्निधानं॥ यो मे दंड इति दंडार्पणं॥ त्वन्नो अग्ने इति अत्र गंधपुष्पधूपदी
पादि॥ नवनीत ओदनो बलिदानं॥ अपांपतिस्त्वमापो वेदैर्देवदेव निगद्यसे॥ शमं नयाशु विघ्नान् नि
नमस्ते पाशपाणये इति प्रार्थनं॥ अथ द्वारशाखयोः जनलोकाय नमः॥ तपोलोकाय नमः
पुनः बृहस्पतये नमः॥ शुक्राय नमः॥ ऊर्ध्वोदुंबरे सामवेदाय नमः॥ द्वारशाखयोर्नर्मदा
यै नमः॥ तापै नमः॥ उत्तरांगे गणेशाय नमः॥ श्रियै नमः॥ ध्वजे शंकुकर्णाय नमः॥ यो मे दं
ड इति ध्वजदंडालेनमः॥ ध्वजदंडे कालाय क्षेत्रपालाय नमः॥ नाममंत्रेण गंधादिना पूज
येत्॥ अग्न आयाहीति सामवेदं सपरिवारं सांगं पूजयेत्॥ ध्यानं॥ सामवेदस्तु पिंगाक्षो

गतः शक्रदैवतः ॥ भारद्वाजस्तु विप्रेंद्र ऋत्विक्त्वं मे मखे भव ॥ तत्र जपः ॥ इंद्राय साम गायत ॥ ॐहे
अहमस्मि प्रथमजा ॥ सेवुंस्तर ॥ स्वादिष्टया ॥ गायंति त्वा गायत्रिणः ॥ कस्य नूनं कतमस्या
मृतानां ॥ स शौक्रियं च्छंदः साम ज्येष्ठसाम रथंतरं ॥ तथा सामवेदो ऽर्कं शांतिपाठं जपेत् ॥ अथ वा
यव्ये ॥ वायव्यावाहनादि ॥ तद्यथा ॥ सर्वप्राणात्मको नित्यं सर्वप्राणायुरुच्यते ॥ ध्वजहस्तो महा
प्राणस्तु स्मै प्राणात्मनेन मः ॥ वायो शत मिति छत्रवर्णपताकालंकृतः ॥ तव वायवृतस्पते इ
तिपताको च्छ्रायनं ॥ आनो नियुद्भिरिति गंधादिना पूजयेत् ॥ यवौदनो बलिदानं ॥ ध्वजे सार्वभौ ५२
माय नमः ॥ यो मे दंड इति दंडार्पणं ॥ ध्वजदंडे सर्वनेत्राय क्षेत्रपालाय नमः ॥ प्राणिनां प्राणि
रूपो यो महाबलपराक्रमः ॥ महावेगसमारूढ दिशं रक्ष प्रभंजन ॥ अथोत्तरे ॥ नमस्ते दिव्य

रूपाय त्वयवाधिपते धनो ॥ कलेरधिपतिर्नाम्ना मंगलं चोत्तराननं ॥ द्वारदेवतावाहनं ॥ शंनो दे
वीति तोरणालंबनः ॥ उत्तरां दिशमाश्रित्य सुप्रसन्नं नाम तोरणं ॥ महावीर्यं महाकायं शुद्धस्फटिक
निर्मलं ॥ रक्षेहि अथर्वाधिष्ठित न्यग्रोध महातोरण सोमदैवत्ये नयन्तं रक्ष ॥ सर्वविघ्नान्नि
वारणाय ॥ अथर्वाधिष्ठिताय न्यग्रोधमहातोरणाय नमः इति गंधादिभिरर्चयेत् ॥ शृंगे प्रा
द्वितयानः ॥ त्वष्ट्रे नमः ॥ सावित्रे नमः ॥ विश्वदेवेन मः ॥ द्वारशाखयोः प्रत्यूषाय नमः ॥ घनासाय
नम इति वस्तुद्वयं ॥ नाममंत्रैर्गंधादिना संपूज्य ॥ शृंगेषु शाखयोः वस्त्राणि बध्वा शाखामूल
योर्धान्यपुंजोपरि वारिपूर्णो रत्नगर्भो वस्त्रयुगच्छन्नो धनदश्रीपदनामानौ कलशौ जातबीज
शरावपिहितौ ॥ आजिघ्र कलशमिति प्रतिष्ठाप्य ॥ धनदाय नमः ॥ श्रीप्रदाय नम इति नाममं

त्रेणगंधादिनापूजयेत्॥ अथद्वारदेशेसोममावाहयेत्॥ नक्षत्राणांचसर्वेषांसोमोराजाप्रकी
र्तितः॥ रत्नांगीचमहाहस्तसोमराजायतेनमः॥ सोमोधेनुरितिसुवर्णपताकार्लंनं॥ वयंठ
सोमव्रतेतवेति॥ अत्रगंधपुष्पधूपदीपादि॥ पैयंगवंबलिदानंकुर्यात्॥ तस्यास्तोरणेपरिनिधा
नं॥ आप्यायस्वेतिसोमसान्निधानं॥ योमेदंडइतिदंडार्पणं॥ वयंठसोमेति॥ अत्रगंधपुष्पधूप
दीपादि॥ पैयंगवंबलिदानंकुर्यात्॥ प्रालेयांसोमहारूपनक्षत्राणामधीश्वर॥ औषधीनांप्रनो
रक्षन्दीचीत्वंसमाहितः॥ शाखयोःसप्तलोकायनमः॥ ध्रुवलोकायनमः॥ पुनःशनैश्चराय ५२
नमः॥ राहवेनमः॥ ऊर्ध्वोडिंबरेअथर्ववेदायनमः॥ द्वारशाखयोःवैण्यायैनमः॥ पयोस्त्यैनमः
नत्तरांगगणेशायनमः॥ श्रियैनमः॥ ध्वजेसुमुखायनमः॥ योमेदंडईतिध्वजदंडार्लंनं॥ ध्वज

दंडेएकपादायक्षेत्रपालायनमः॥ नाममंत्रैर्गंधादिनापूजयेत्॥ अथर्ववेदंशन्नोदेवीतिमंत्रेण
सांगंसपरिवारंगंधाद्युपचारैःपूजयेत्॥ ध्यानं॥ सुवर्णनयनोथर्वानुष्टुप्छंदःपुरंदरः॥ वेदो
वैतानगोत्रस्तकृत्विकत्वंममखेभव॥ अथर्वांगिरसंचैव अथर्वसिरसंतथा॥ शांत्यध्यायंच
पठेत्॥ अथेशाने॥ ईशानाध्वा॥ ध्यानं॥ सर्वविद्याधिपोदेवईशानोनामनामतः॥ शूलपाणि॥
महादेवत्रैलोक्याधिपतयेनमः॥ नमःसंभवइतिरक्तपताकार्लंनं॥ तमीशानमितिपता॥
कोद्यायः॥ कद्रुद्रायेतिईशानपूजनं॥ गंधादिभिः॥ गवेधुकंबलिंदद्यात्॥ रक्षणंकुरुमेदेव
त्रिनेत्रायत्रिशूलिने॥ वृषध्वजायरुद्रायनमस्तेत्र्यंबकउमापते॥ ध्वजेसुप्रतिष्ठायनमः॥ योमेदंड
ईतिध्वजदंडार्लंनं॥ ध्वजदंडेनीमार्यक्षेत्रपालायनमः॥ अथमंडपस्याग्नेनैर्ऋते॥ पन्नगाधिप

तिद्दैवं अनंतो नाम नामतः ॥ पाताले वसते नित्यं नागराजाय ते नमः ॥ नमोस्तु सर्पेभ्य इति मेघ
पताकालं मंत्रः ॥ तद्विष्णोरिति पताकोच्छ्रायः ॥ विष्णोर्नुकमिति गंधादि क्षीरवल्यंतं पूजनं ॥ अ
नंतत्वादनंतस्त्वं फणींद्राधिपते हरे ॥ त्वयात्र रक्षणं कार्यं कलशं नेत्राय ते नमः ॥ यो मे दंड इति
दंडालं मंत्रः ॥ ध्वजदंडे भैरवाय क्षेत्रपालाय नमः ॥ अथ मंडपयाम्ये मध्योर्ध्वे ॥ पद्मयोनिश्चतुर्मू
र्तिर्वेदावासः पितामहः ॥ आयाहि ब्रह्मलोकात्वं तस्मै ब्रह्मात्मने नमः ॥ यद्देवा देवहेडनमिति
रक्तपताकालं मंत्रः ॥ ब्रह्मयज्ञानमिति पताकोच्छ्रायः ॥ सनो भुवनस्पते इति गंधादि पायसोदन बा ५२
लिदानांतं पूजनं कुर्यात् ॥ पितामह जगत्स्रष्टः कुरुष्व सव्योमरक्षणं ॥ ब्योमस्थान नमस्तुभ्यं रक्ष
स्वेदं महाप्रभो ॥ ध्वजे सुप्रनाय नमः ॥ यो मे दंड इति दंडालं मंत्रः ॥ ध्वजदंडे ब्रह्मनाथाय क्षेत्रपालाय

नमः ॥ प्राच्यां गत्या नो त्वेति गणपतिं ॥ नमोस्तु रुद्रेभ्यो ये अंतरिक्षे ये दिवीति अस्मै रुद्राय इति मं
त्रश्च येन मंडपबाह्ये दिग्विदिक्षु रुद्रान्विन्यस्य तेभ्यो बलिं दत्वा सर्वभीतिकं बलिं मंत्रैर्दद्यात् वा
॥ तद्यथा ॥ नक्षत्राधिपतिश्चार्ध्वं नक्षत्रैः परिवारितः ॥ स्थाने चैव पिशाचांश्च सर्वे गृह्णंतु मे बलिं
॥ अधश्चैव तु ये लोका असुराश्चैव पन्नगाः ॥ सपत्नीपरिवाराश्च पाणिगृह्णंत्विमं बलिं ॥ ईशा
नोत्तरयोर्मध्ये क्षेत्रपालो महाबलः ॥ भीमनामा महादंष्ट्रः सर्वे गृह्णंत्विमं बलिं ॥ ये केचि त्वि
ह लोकेषु आगता बलिकांक्षिणः ॥ तेभ्यो बलिं प्रयच्छामि नमस्कृत्वा पुनः पुनः ॥ बलिं गृह्णं
त्विमं देवाः आदित्या वसवस्तथा ॥ मरुतो अश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातु
धानाश्च पिशाचा मातरो नगाः ॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः

सिद्धगंधर्वमालाविद्याधरानराः॥दिक्पालालोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांति
कर्त्तारोब्रह्माद्याश्चमहर्षयः॥माविघ्नोमाचमेपापंमासंतुपरिपंथिनः॥सोम्याभवंतुतेतृप्ता
देवाभूतगणास्तथा॥इतिईशाननागेबलिंदत्वाचामेत॥ ॥इतिश्रीरघुसूरिसूनुत्रिविक्र
मसूरिविरचितायांप्रतिष्ठापद्धतौतोरणपूजाविधिः॥ ॥अथवेदिकोपरिमंडलरचनाकथ्यते
॥मंडलंमंगलंपुंसांयज्ञविघ्नस्यवारणं॥गुह्यंमनोरमंकार्यंकाम्येनैमित्तिकेविधौ॥पूजितं
विधिवद्देवंतत्रस्थंयस्तुपश्यति॥संसारगतिविच्छेदोजायतेतस्यदर्शनात्॥मंडलंतेनविख्य ५४
ख्यातंशक्रगंधर्वसिद्धिदं॥मंडलंयज्ञभूमेस्तुनिगोपार्थंतथैवच॥यज्ञस्ययजमानार्थायस
र्वदेवालयःपरं॥ध्वंसनायचरक्षःसुदानवानांभयायच॥मंडलानांचनामानिस्पष्टाणिदेविव

राननो॥भद्रंचसर्वतोभद्रंलतालिंगोद्भवंतथा॥लिंगोद्भवंचपद्मंचस्वस्तिकंधनुराकृति॥त्रिको
णमष्टकोणंचषट्त्रिंशत्खाब्जमेवच॥शंखंगदांचचक्रंचचक्राब्जंयोनिमंडलं॥षट्कोणंपंचको
णंचद्वादशारंसराकृति॥षोडशारंसहस्रारंशतारंसूर्यमंडलं॥हस्तिकर्णंचगोकर्णंत्र्यंबक
र्णंगदाकृति॥नवनाभंत्रिनाभंचपंचनाभंउमाप्रियं॥गौरीतिलकसंज्ञंचत्रैपुरंचंद्रमंडलं॥
त्रैलोक्यमोहनंचैवत्रिपुरामोहनंतथा॥नगरंतंवटकाभंनागबंधंखगध्वजं॥त्रिलिं
गमेकलिंगंचनवलिंगंहरप्रियं॥वैल्लवेभैरवेयोगेयोगिनीनांचस्थापने॥मंडलंनवनाभं
चपुत्रायुर्बलवर्द्धनं॥त्रिपुरस्थापनेत्वैरंतन्मंडलंनवनाभकं॥शंभोस्तुसर्वतोभद्रंलिंगं
स्वस्तिकमेवच॥एकलिंगोद्भवंगौरीतिलकंलिंगमाल्यपि॥लतावितानिकाप्रष्टलिंगो॥

द्रवमिमानिषद्वा॥ मंडलान्यागमोक्तानि भवंति षट्तयोनशः॥ कपोलोदरवक्त्राख्यं भूलमा
ख्यानि धंतथा॥ शैववैष्णवचक्रं चेत्युदितं मंडलत्रयं॥ हरेर्हरस्य च प्रीत्यै नवेदित्यागमो
दितं॥ गृहादेर्मंडलं भानोः सर्वतोभद्रमर्चने॥ लक्ष्म्याश्च सर्वतोभद्रं पूजने मंडलं तथा॥
सीहोदरं प्रकृतिकं पद्मोदरसमाह्वयं॥ वाग्देव्याः सर्वतोभद्रं स्याद्भद्रं स्योदरं मंडलं॥ गौ
र्यास्तु सर्वतोभद्रं अष्टलिंगोद्भवं तथा॥ चंड्यास्तु सर्वतोभद्रं मंडलं चयराह्वयं॥ भगवत्या
दिकानां च शक्तीनां मंडलं भवेत्॥ पूजने सर्वतोभद्रमेकलिंगोद्भवं तथा॥ भैरवक्षेत्रपाला ५५
दिपूजने मंडलानि तु॥ सर्वतोभद्रमुख्यानि शैवोक्तान्यखिलान्यपि॥ यतस्यात्सर्वतोभ
द्रं सर्वदेवप्रियप्रदं॥ सर्वेषां मंडलानां तु प्रकृतित्वेन निश्चितं॥ यतो निधीयते तस्य समुद्धा

रायथागमं॥ अन्येषां मंडलानां तु सर्वेषामतिविस्तरात्॥ शैवादिष्वादिमग्रंथेषूद्धारस्य प्रकल्पनं
॥ तत्वसागरसंज्ञायां संहितायां प्रपंचितं॥ यथाविधिहृत्संचराचादिष्वागमेष्वपि॥ निम्नतोन्नु
गताहीनसुस्लक्षणो वेदिकातले॥ ईशानादिक्षु वेनार्दे विलिप्ते गोमयेन च॥ धत्तूरपल्लवैष्टैर्य
द्यामार्गपिप्लवैः॥ देवाराधनमंत्रेणामंत्रितात्त्यं च गव्यतः॥ अभ्युक्षिते स्वमंत्रेण कृत्वा दिक्सा
धनं ततः॥ खटिकामानसूत्रं च गंधाद्यैरभिपूजयेत्॥ चतुरस्रं चतुर्भिः स्यान्मंडलं चतुर
स्रकं॥ हस्तैर्हस्तद्वयेन स्यान्मध्यमं हस्तमात्रकं॥ कनिष्ठं मानहस्तं तु पूर्वं यागे प्रशस्यते
॥ बिंदुनालांछनं तत्र कुर्यात्मध्यप्रदेशतः॥ तस्योपरि समं सूत्रं कृत्वा पश्चिमपूर्वयोः॥ उद
ग्दक्षिणगं सूत्रं वीथीमध्ये पृथक् पृथक्॥ एवं सूत्रद्वयं चान्यत्पूर्वपश्चिमदिग्गतं॥ एवं षो

कुशसंस्थेषुकोष्टकेषुकृतेषुच॥पूर्वपश्चिमगंसूत्रंवीथीमध्येप्रथक्पृथक्॥उदग्दक्षिणा
योस्तद्वत्कुर्यात्तदनंतरं॥बिंदुपूर्वशिरयोर्मध्यबिंदुमन्यंनिविक्षिपेत्॥तस्योपरिक्षिप
सूत्रंदक्षिणोत्तरदिग्गतं॥मध्यबिंदोःप्रतिच्याश्चमध्यबिंदुनिविक्षिपेत्॥दक्षिणोत्तरगंचा
प्यक्षिपेत्सूत्रचतुष्टयं॥कोष्टकानांनवैवंचतुःषष्टिश्चमंडले॥अष्टानांमध्यवीथीनांपूर्व
पश्चिमदिग्गतं॥सूत्रंविनिक्षिपेद्योमध्यदेशपृथक्पृथक्॥कोष्टकानांसमयाणांएवंवि
रचितेसति॥षट्पंचाशच्छतेद्वेचपदसंख्याप्रोक्ताचमंडले॥वीथ्यांयत्संतीतिवर्तिन्यौकोष्ट ५६
कानांचतुष्टयं॥मध्यंतद्वद्द्वितीयस्यांमध्यस्थंकोष्टकद्वयं॥एषामंतररेखासुरचितोमार्जि
तासुच॥स्थानेयद्द्वेकतांप्राप्तंतद्वत्कैवेद्वारसंज्ञकं॥एवमेवयदाद्वारपार्श्वयोःकोष्टकंनवेत्॥

प्रांतवीथ्यांद्वितीयस्यांवीथ्यांपूर्वंव्यवस्थितं॥त्रयंत्रयंत्रकोष्टानांएषांरेखासुमध्यतः॥उन्मा
र्जितासुवत्स्थानंद्वारशोभाख्यंतुतत्॥द्वारशोभासमीपस्थंप्रांतवीथ्यांव्यवस्थितं॥कोष्ट
कत्रितयंवीथ्यांद्वितीयस्यांचकोष्टकं॥एवमेतश्चतुर्थेषुरेखासून्मार्जितासुच॥स्थानंव्यव
स्थितंयस्मादुपशोभाख्यंतुतत्॥एवमन्यासुदिक्षुस्याद्द्वारादीनांप्रकल्पना॥कोणेषुको
ष्टषट्कंस्यात्पार्श्वस्थमुपशोभना॥तत्रमध्यनिविष्टासुरेखासून्मार्जनेकृते॥स्थानंयन्मंडले
तत्तुनवेत्कोणसमाख्यं॥एवंद्वाराणिचत्वारिद्वारशोभाष्टकंतथा॥उपशोभाष्टकंतद्व
थाकोणचतुष्टयं॥तृतीयस्याश्चतुर्थ्याश्चवीथ्यारेखाकदंबके॥उन्मार्जितेमध्यगतेभवे
द्वीथीसमंततः॥पंचम्याश्चापिवीथ्याश्चमध्येकोष्टचतुष्टये॥तत्रमध्यस्थरेखानांसर्वतो

तुंसनेकृते॥तत्स्थानमेकतांयासंपीठपद्मांकयेत्तुतत्र॥पार्श्वयोःपीठमध्यायाःकोणस्थेको
ष्ठकत्रयं॥प्राग्वत्तत्रैकतांनीत्वापीठस्यचरणंत्रतत्र॥विथ्याःषष्ठ्यास्तुसप्तम्याअष्टम्यामध्य
वर्तिनी॥रेखांत्यक्त्वोपरेखाणांप्राग्वदुत्स्यंसनेकृते॥बृहत्कोष्ठचतुष्कस्यानमंडलान्यंतरस्थि
तं॥ईशानकोणादारभ्ययावत्कोणस्तुनैर्ऋतः॥सूत्रंकोष्ठयुगस्यैकंमध्यबिंदोरथोपरि॥आ
ग्नेयकोणाद्वायव्यकोणंविधितथैवच॥अन्यद्वैत्रकोष्ठयुग्मेतिसूत्रमन्यद्विनिक्षिपेत्॥म
ध्यतःपीठपद्मायसूत्रंबिध्वविधिस्थितं॥दिक्चतुष्केपिचतुरस्रस्यमार्गान्प्रकल्पयेत्॥तेषु ५
मार्गाःस्वतुर्योयोमध्यबिंदुसमीपतः॥तस्याधेवर्तुलाकारंक्षिपेत्सूत्रंसमंततः॥तन्मध्ये
कर्णिकाकार्याबहिस्तस्यद्वितीयके॥नागेंद्रवर्तुलाकारंसूत्रंप्राग्वद्विनिक्षिपेत्॥तन्म

ध्यकेसराणिस्युःकेशरेभ्योबहिःस्थिता॥मार्गात्तृतीयकेप्राग्वद्वृत्तंसूत्रंविनिक्षिपेत्॥तंम
ध्येष्टौदलानिस्युस्तेभ्योबाह्येचतुर्थके॥नागेन्यद्वर्तुलाकारंक्षिपेत्सूत्रंसमंततः॥अष्ट
संख्यान्यसूत्रस्यदलाग्राणितुसर्वतः॥इत्येवंमंडलंप्रोक्तंसर्वतोभद्रसंज्ञकं॥तस्माद्वि
तुचसर्वासुबहिर्वीथीप्रमाणतः॥सूत्रत्रयंसत्वरजस्तमःसंज्ञंविनिक्षिपेत्॥पंचव
र्णेनचूर्णेनमंडलंपूजयेत्ततः॥हरिद्रारचितंचूर्णंकर्णिकायांविनिक्षिपेत्॥चातुर्वर्ण्येकेस
रेषुवीहितंदलसंभवं॥दलेषुनिक्षिपेदेततेभ्योबाह्यप्रदेशतः॥शम्यपराजिताचूर्णंव्योम
रेखांतरेक्षिपेत्॥द्वारेषुश्वेतवर्णंचद्वारशोभासुलोहितं॥हरिद्रामुपशोभासुतदंतंदलसं
भवं॥कोणेषुनिक्षिपेच्चूर्णंमंडलस्यबहिःपुनः॥श्वेतंत्रसत्वविरव्यारव्येरजःसंज्ञेचलोहि

तां॥ कृत्वांतमोनिधाने चक्रमाचूर्णं विनिक्षिपेत्॥ इति सर्वतोभद्रं॥ अथ सर्वव्यापी मंडलस्य ना
गकल्पनाप्रकारः कथ्यते॥ हस्तांगुलाश्च ये नागास्तत्क्षितेर्लिख्य वृत्तमंडलं॥ षष्टिनागकृतं तेन
चतुःषष्ट्यार्द्धांगुलांशकं॥ लब्धराशिसमं कोष्ठं तेनांशं परितः पुरं॥ अनुजलपांक योः सूत्रं दाना
द्भागक्रिया स्फुटा॥ चतुरस्रीकृतं क्षेत्रं विभजेत्तत्समं यथा॥ ततः शतार्धमेकोनं कोष्ठका
नां प्रजायते॥ मध्यमैर्नवभिर्नागैः सद्भं भोगं प्रकल्पयेत्॥ द्वाराणि च सकोणानि पंक्तिक
द्वितके बहिः॥ पद्ममेकमुपद्यामं चतुर्दिक्षु प्रमार्जयेत्॥ यत्तदर्थं द्वारकंठं तु पदषट्कं वि ५८
लुप्यते॥ चतुःकोणेषु रजसा भवेदेवमनुक्रमात्॥ व्योमवृत्ताकृतं मध्ये शुक्लेन निलिखं
श्यमां रेखाग्रणीं पुनः सर्वं कृष्णेन श्यामलेन वा॥ संधीश्च पद्मपत्राणामेवमेवोत्तरेष्वपि॥ ये

मकंठांतरं सम्यक् पांडुरक्तेन कोणकान्॥ सुरक्तेनांतरं तेषां पीतेनैवेति मंडकं॥ छ॥ चक्रा
रविंदं वक्ष्यामि पुंडरीकाक्षस्य वल्लभं॥ चतुरस्रं पुरा क्षेत्रं हस्तमानं समान्वितं॥ कृत्वा त
स्तमात्रं तु दद्यात्तत्र समानुपं॥ एकादश प्रमाणेन नाम्नाचैव ब्रवीमि तान्॥ अंगुलानां
च चक्रेण प्रथमोत्र भ्रमस्मृतः॥ नाभिक्षेत्रभ्रमश्चात्र द्वितीयं स्वांगुलेन तु॥ ततोर्द्धांगु
लमानेन कार्यं भ्रमचतुष्टयं॥ आराश्च सर्वदैर्घ्यैः स्यान्नाभ्यामेकांगुलो भ्रमः॥ शोभाक्षेत्रं त
दूर्ध्वं स्यात्तत्राप्येकांगुलो भ्रमः॥ रेखाक्षेत्रं भ्रमं तस्मादूर्ध्वं चात्त्यमां गतं॥ द्वारार्थमेकांगु
लेन तदूर्ध्वं स्याद्भ्रमद्वयं॥ क्षेत्रस्य हस्तमात्रस्य चैतन्मानं प्रकीर्तितं॥ अनयैव दिशाके
कार्यं द्विगुणं त्रिगुणं स्य च॥ ततश्चारा राः प्रकर्तव्या लक्षणं तासु वक्ष्यहं॥ यावत्सारा: प्र

कर्त्तव्या रेखा षड्भागास्तु नाशयेत् ॥ द्विचत्वं ततस्त्वारानागं प्रत्येकं नाशयेद्बुधः ॥ ऊर्ध्वाधो
भागषट्केन चतुर्विंशतिकोष्ठकाः ॥ भवंति तैरारान्कल्पं चतुर्भिः कारयेद्बुधः ॥ चतु
ष्टयेकोष्ठकानां मध्यात्तैव तथा क्रमः ॥ अनयोः पार्श्वयोः कृत्वा तत्क्रमान्यां पुनर्भ्रमः ॥ सं
श्लिष्टं कारयेत्स्थानात्क्षेत्रमयोरर्धचंद्रवत् ॥ एवं शेषशालोपेन प्रकाराः प्रदृश्यते ॥ तथै
कातद्वदन्यास्तु कर्त्तव्याः साधकोत्तमैः ॥ अथ शिवाय यदा कुर्यात्तदैकं चक्रमंभवेत् ॥ म
ध्यन भागे चारायां भागमेकेन मातुनः ॥ सूत्रं दद्यादूर्ध्वसूत्रं न लिनं प्रकटं ततः ॥ अथो ५९
राद्दृश्यते तत्र शोभा द्वे चतथा धियो ॥ शोभा प्रकल्पयेत्स्थाने यथा शोभायुता भवेत् ॥ न
लिनी बहुमध्यं चाष्टगारान्वा प्रकल्पयेत् ॥ द्वारदेवे च द्व्यं चाचत्वारा मानेन नाशयेत् ॥ को

ष्ठकानां चतुष्केण तत्र द्वारं प्रकल्पयेत् ॥ द्वारात्द्वारांतरं यच्च वीथिकास्ताः प्रकल्पयेत् ॥ यावंत
प्राराभवंत च तथा द्वारं प्रकल्पना ॥ अतदेवैव कर्तव्यं पर्यंत च सितं शुभं ॥ नाभिः कृत्वाप्र
कर्तव्या रक्ताः सर्वास्ताराः स्मृताः ॥ नेमी पीता तथानीलाः रेखाः सर्वा सितास्तथा ॥ रेखा चतु
ष्टयं कार्यं चित्रवर्णं विभागतः ॥ द्वाराणि श्वेतवर्णानि वीथयो नद्ववस्मृताः ॥ एवं द्वित्रिचतुः
पंचगुणमानेन कल्पयेत् ॥ चतुरस्रकं तैः पंचचक्रं अष्टचक्रं च कारयेत् ॥ अनयैव दिशान्यैः
विस्तारपरिमाणतः ॥ ॥ इति चक्रारविंदं ॥ चतुर्विंशतिधा क्षेत्रं कृत्वा षष्ठाभिः सरोरुहं ॥ म
ध्यकोष्ठेषु लिंगानि त्वष्टाष्टाभिः प्रकल्पयेत् ॥ तत्राष्टाभिः सुरपत्रं षड्भिः कंठं चतुष्टयं ॥ षड्भिः कृत्व
रपत्रं च वेदी सखुरवदाचरेत् ॥ लिंगोछेधास्त्रिभिः कोष्ठैर्विस्तारं द्विपदेन वा ॥ पत्रस्याभिमुखं लिंग

विदध्यान्नपराङ्मुखं॥ विदिक्षुस्वस्तिकानेवमष्टानिस्क्ततथायथा॥ ईशकोणादारभ्यपंक्तिंत्यक्त्वा
तुदक्षिणां॥ स्वपंक्त्वावेवमष्टीयात्पदकानित्रयोदश॥ तदधेचकेयदंत्तश्चत्वार्यपदद्वयं॥ तस्या
त्पुनरेपंचस्वपंक्त्याभिमुखंयथा॥ तथाग्निकोणादारभ्यविहायापरपंक्तिकां॥ शेषंपूर्वमिवर्लेयं॥
नैर्ऋताच्चतयारभ्यविहायोत्तरपंक्तिकां॥ वायव्यकोणादारभ्यत्यक्त्वावैपूर्वपंक्तिकां॥ शेषंपूर्वमि
वलेयमितिस्वस्तिकलक्षणं॥ इतिसम्यग्विधायाथरजसैवंप्रपूरयेत्॥ लिंगंपीतंचशुक्लेनकंव
स्यामयपार्श्वगं॥ चत्वपदंततोधीमान्सुरक्तेनमनोहरं॥ पंचपंचातिरक्तेनलिंगस्याभयपार्श्व ६०
तत्र॥ चत्वारस्तद्बहिःपीतनीलरक्तसितेनच॥ पूरयित्वेतिलिंगानिस्वस्तिकानपिपूरयेत्॥ ई
शादिवायुपर्यंतंक्रमात्कोणचतुष्टयं॥ सितरक्तपीतकृष्णैःपार्श्वेदरनिभत्रयं॥ लिंगस्वस्तिक

संयुक्तं लिंगस्वस्तिकमंडलं॥ सर्वकामफलंह्येतदाचार्याःसंप्रचक्षते॥ केवलैःस्वस्तिकै
श्चैवस्वस्तिकंपरिगीयते॥ ॥इतिलिंगस्वस्तिकं॥ ॥चतुरस्त्रीकृतेक्षेत्रेत्रिभाग्भागेसमं
ततः॥ मध्येषड्भागिकंपद्मंपीठंस्याद्भागिकंततः॥ भागेनवीथिकातस्मात्तीरंपद्मंचपूर्व
वत्॥ तद्बहिर्वापिकावर्षाभागिकोद्वारमुक्तवत्॥ नवनाभमिदंप्रोक्तंमंडलंनवपंकज
॥ पद्मस्थानेथवाकुर्यात्तन्मात्रास्वस्तिकानव॥ दिक्षुमध्येथवाज्ञानायद्वामध्याविदिक्षु
च॥ पद्मस्वस्तिकमित्येवंमंडलंसर्वकामदं॥ चत्वभिर्मध्यमेकोष्टेरसचंद्रामयेद्गुणं॥
नंद्यावर्त्तंयदापीठंकर्णांतंस्वस्तिकंनवेत्॥ विचित्रैर्णववर्णैर्नलोकपालाभिधेनवा॥
स्वस्तिकान्वरजसाचैवपूरयेच्छेषमुक्तवत्॥ ॥इतिपद्मस्वस्तिकं॥ चतुरस्त्रेक्षेत्रेचतुर्दि

क्षुविंशत्याचनागैर्विभज्यकोष्ठशतचतुष्टययुतंनिष्पाद्यसमंताद्बाह्यपंक्तौवीथींविधाय
तदनंतरपंक्तिचतुष्टयेप्रतिपंक्तिकोष्ठद्वयंद्वयंमध्येपरिलोप्यचतुर्दिक्षुद्वाराणिकुर्यात्
॥तद्द्वारानुगतानितत्पार्श्वयोरष्टौलिंगानिविदध्यात्॥तद्यथा॥बाह्यवीथ्यनंतरंद्वारसं
बंधकोष्ठत्रयेणपीठंतदुपरितनकोष्ठैकत्रयेणचयंदक्षिणकोत्तरकोष्ठद्वयस्यएकैकरे
खालोपनान्मध्यकोष्ठेनैकेन कंठंतदुपरिचकोष्ठत्रयेणजलपदंतदुपरिकेनलिंगंएवं
सर्वास्वपिलिंगानिविधायकोणेषुकर्णकोष्ठांश्चतुरालतार्थंसंलक्ष्यलतालिंगोतरा॥ हे
ऽशेषसरेखाविलोप्यतदुपरितनोद्वरितकोष्ठकेषुवीथीपीठपद्मानिसर्वतोभद्रवत्कुर्यात्
॥ ॥इतिलतालिंगोद्भवं॥ ॥सप्तधाविभज्यकोनपंचाशत्कोष्ठकान्संपाद्यबहिर्विना

नचतुर्विंशतिकोष्ठकैःसमंताद्वीथींनिष्पाद्यअवशिष्टपंचविंशतिकोष्ठकेषुपूर्वादिदिक्षु
कोष्ठकाष्टकेनवकंयमध्येसस्थाप्यशेषषोडशलोपेनवीथिकाचतुष्टयांतर्नवपद्मानि
चसत्त्वानिकृत्वावीथ्यनुगान्यष्टद्वाराणिचकुर्यादिसंसक्तंनवनाभद्रं॥ चतुरस्रमष्ट
धाविभज्यचतुःषष्टिपदंकृत्वामध्यकोष्ठचतुष्टयेपद्मंपीठंचसंपाद्यतदनंतरपंक्तौपद्मा
ग्रेनवीथींतदनंतरपंक्तौचतुर्दिक्षुपद्मसमानिचत्वारिद्वाराणिद्वारकोष्ठकमानेनकंगे
पकंठकपोलान्कुर्यात्॥इतिविभज्यब्रह्मस्थानात्सूत्रभ्रमणेत्र्यंगुलानिचत्वारित्यक्त्वानि
कृत्वादिक्षुविदिक्षुतत्संधिषुसंध्यंतरेषुचद्वात्रिंशत्सूत्राणिदत्वाटतीयवृत्तेसंध्यंतरस्थ
त्वाद्बहिःपार्श्वभ्रमेणषोडशार्धचंद्रान्कृत्वादिक्षुविदिक्ष्वर्धचंद्रद्वयमध्येचतुरैरष्टते

दलाग्राणि वृत्तीयवृत्ते दलसंधीन् द्वितीयसंवृत्ते केसराग्राणि प्रथमवृत्ते तद्दलमानेनापी
तां कर्णिकां तन्मध्ये नीलवर्णानि च बीजानि वीथीमूलमध्यायेषु शुक्लरक्तपीतकेसरजा
लं दलानि च प्रतिवारणाया सहस्रशुक्लवर्णानीति पद्मं निष्पादयेत्॥ तच्चान्युन्नतदलाग्रं
नुक्तिवामस्यतीच्छाग्रं दिक्पालानां मेयरायेविश्वेश्वराणां वा गोकर्णाद्यं गणानां मंड-
लायं अश्वत्थदलपत्रकं गौरीसरस्वत्यादीनां विधेयं॥ तत्र शालिपिष्टेन श्वेतं॥ हरिद्रयापी
तं दग्धसिंदुरधात्वादिना रक्तं दग्धयवादिना कृष्णं॥ शमीपत्रादीनां नीलं॥ तद्दर्णकार्थं ६२
विशेषकामो मुक्ता विद्रुमादिना एतद्देवरजः कुर्यात्॥ ॥इति मंडलरचना॥ अथ प्रतिष्ठा
यागे मंडलदेवतापूजा॥ यस्य देवस्य स्थापने यन्मंडलमुक्तं तत्तत्कर्तव्यं॥ मंडलविशेषा

नुक्तौ सर्वतोभद्रं मंडलानां प्रकृतिनां प्रकृतित्वात् तत्र सर्वस्यापि मंडलजातस्य मध्येष्टदलं
सकर्णिकं पद्मं भवति॥ तन्मध्ये हृते ब्रह्मजज्ञानमिति ब्रह्माणमावाह्य प्रतिष्ठाप्य॥ मंडल
स्य समंतात् स्वास्वासु दिक्षु लोकपालान् इंद्रादीन् ओंकारपूर्वकैर्नाममंत्रैर्नमोंतैः क्रमेण स्था
पयेत्॥ तत ईशानशक्रांतराले च वसून्॥ शक्राग्न्यंतराले रुद्रान्॥ अग्नियमांतराले चादित्या
न्॥ यमनिर्ऋत्यंतराले अश्विनौ॥ नैर्ऋतिवरुणांतराले विश्वान्देवान्॥ वरुणवाय्वंतरा
ले पितॄन्॥ वायुसोमांतराले नागान्॥ सोमेशान्यांतराले स्कंदं वृषं च॥ ततः पद्मस्येशान
दले दक्षं॥ पूर्वे विष्णुं॥ आग्नेये दुर्गां॥ दक्षिणे स्वधाकारां॥ नैर्ऋत्ये मृत्युं रोगं च॥ पश्चिमे
समुद्रान् सरितश्च॥ वायव्ये मरुतः॥ सौम्ये गणपतिं॥ मध्ये पृथिवीं॥ कर्णिकायां मेरुं॥ तदुप

रिस्थापनीयंदेवं। ततोमंडलबाह्येपूर्वादिक्रमेणदिक्पालायुधानि॥ वाहनानिच॥ ततोगौत
मभरद्वाजविश्वामित्रकश्यपजमदग्निवसिष्ठात्रीन्सप्तर्षीन्॥ ततश्चादित्यादीन्नवग्रहां
स्तद्बाह्ये॥ ऐंद्रींकौमारींब्राह्मींवाराहींचामुंडांवैष्णवींमाहेश्वरींवैनायकींचा॥ ततःस्थापयेत्
गंधादिनाप्रपूज्यमंडलंमनोज्ञैःसमंतात्प्रपूरयेद्दीपिकादिभिरुद्योत्यवस्त्रेणवेष्टयेत्॥
॥ ॥इतिमंडलपूजा॥ ॥अथाचार्यःस्वकुंडमागत्योपविश्यपरिसमूहनादिकंकृत्वाग्निमु
पसमाधायदक्षिणतोब्रह्माणंमुपवेश्यविधिनाज्जलेनविधिनामुपवेश्यप्रणीतांप्रपूर्या॥ ६२
ग्नेरुत्तरतःस्थापयतस्यात्तत्तरतःप्रासंस्थमर्थवत्पात्रासादनंकृत्वास्वगृह्योक्तविधिनापात्र
संस्कारंकृत्वासमिदादीन्युपकल्प्यतानिचस्थापयित्वाज्यंनिरुप्यचरुस्थाल्यांतंडुलान्प्रक्षि

प्यआज्यंचरुमधिश्रित्यपर्यग्निकृत्वास्रुवप्रतपनादिविधायजातसंस्कारहविर्षितद्रास्यआ
ज्योत्पवनादिपर्युक्षणांतंकृत्वातमग्निंकृत्वाकुंडसंख्ययाविभज्यप्रागादिकुंडेषुबहुत्वादि
भिःऋत्विग्भिःतत्रस्वगृह्योक्तविधिनास्वस्वकुंडेषुसंस्कृतेषुयथाविभागमग्नीन्स्थापयन्
ति॥ तेसर्वेऋत्विजश्चत्वर्थिकाकर्मसमाप्तिंयावज्जुह्वंति॥ ॥अथवास्तुरचनापूजाश्चोच्य
ते॥ ॥तद्यथा॥ प्रासादस्यमध्येईशानभागेवावेद्याईशानभागेनैऋतेवाद्विहस्तमेकहस्तं
वाचतुरस्रमष्टाष्टकपदंवास्तुमंडलंसद्धान्येनाक्षतैःशालिपिष्टेनवाप्रदक्षिणमालिख्य
बहिःपंक्तौकोणेष्वष्टार्धपदाःचतुर्विंशतिरेकपदाः॥ मध्येचचतुःपदोब्रह्मादिक्षुचत्वारश्च
तुष्पदाः॥ एवंपंचचत्वारिंशद्देवतापदानि॥ तद्बहिरष्टौचरक्यादिनामिति॥ तत्रशिखिनंब्र

त्वाग्नेयं चादिं च कृत्वा क्रमेण नाममंत्रैरावाहनादिभिः षोडशोपचारैः प्रपूजयेत्॥ ततईशा
नकोणादारभ्य विशेषबलिं दद्यात्॥ तद्यथा॥ घृताक्षतान् शिखिने॥ ओदनमुत्पलसहितं
पर्जन्याय॥ पीतध्वजं पीष्टकुंकुमयुतं जयंताय॥ पंचरत्नानि पिष्टकुलिशसहितानि इंद्राय
॥ धूम्रवर्णवितानपैष्टशक्तियुतं सूर्याय च॥ घृतगोधूमान्नं सत्याय॥ आममत्स्यामिषमि
श्रं भक्तं भृशाय॥ शष्कुलीमंतरिक्षाय॥ सक्तून्वायवे॥ लाजान्पूष्णे॥ चणकोदनं वितथा
य॥ मध्वन्नं गृहक्षताय॥ पिशितोदनं यमाय॥ गंधोदनं गंधर्वाय॥ मेषजिह्वान्नं भृंगराजाय॥ ६४
यवान्नं मृगाय॥ कृशरान्नं पितृभ्यः॥ पैष्टं दंतकाष्ठं कृत्वा बलिं च दौवारिकाय॥ अपूपा
न्सुग्रीवाय॥ पायसं पुष्पदंताय॥ कुशस्तंबं पद्मसहितं सुवर्णपात्रं च वरुणाय॥ सुरा

मसुराय॥ घृतोदनं शोषाय॥ यवान्नं पापयक्ष्मणे॥ घृतमोदकान् रोगाय॥ नागकेसरम
हये॥ भक्ष्यं मुख्याय॥ मुद्गोदनं भल्लाटाय॥ मधुपायसं सोमाय॥ शालिपिष्टं भुजंगाय
विलेपिकामदितये॥ पूरिकां दितये॥ पुनरंतरिक्षकोणादारभ्य॥ क्षीरमापाय॥ दध्याप
वत्साय॥ शर्करापायसमर्यम्णे॥ गुडरक्तपुष्पाणि सवित्रे॥ मोदकान्समरीचं कुशोदकं
सावित्राय॥ रक्तचंदनं विवस्वते॥ हरिद्रोदनं विबुधाधिपतये॥ घृतचंदनं इंद्रजयाय॥ घृ
तोदनं मित्राय॥ अपक्वमार्गं राजयक्ष्मणे॥ गुडपायसं रुद्राय॥ मांसानि सकुल्माषाणि
पृथ्वीधराय॥ पंचगव्यं यवतिलाक्षतहविश्चरुः अन्यमनोज्ञानि विविधानि बलीनि॥ वास्तो
र्बहिरीशानकोणे मांसोदनं घृतहविर्लोहितान्वितं चरक्यै॥ मांसोदनं स्कंदाय॥ मांसो

रनंहरिद्रोदनंचसरुधिरोदनंविदार्यै॥कुशरापूपानर्यम्णे॥दध्योदनंसरुधिरंमत्स्यखं
डंपितंरक्तंचपूतनायै॥मांसंसरुधिरंजंभकाय॥मत्स्यमांसंसुरासवंपायसयुक्तंपापरा
क्षस्यै॥रक्तान्नपित्तानिपिलिपिच्छाय॥ततोबाह्यतःपूर्वभागेगोमयोपलिप्तायांनुविगंधा
दिपूर्वंसार्वभौतिकंचबलिंदद्यात्॥तद्यथा॥ॐभूतेभ्योनमः॥ॐपितृभ्योनमः॥ॐराक्षसे
भ्योनमः॥ॐपिशाचेभ्योनमः॥ॐमातृभ्योनमः॥ॐगणेशेभ्योनमः॥ॐदिव्यंतरिक्षेभ्योनम
इति॥अक्षबल्यसंभवेसर्वासामपिवास्तुदेवतानांपायसेनसाज्येनतदभावेकुशपुष्पद हि ए
धिभक्तैश्चतारपिसर्वत्रबलिंदद्यात्॥ततआचम्यकुंडसमीपेगत्वावास्तोष्पतइतिमंत्रेण
चरुणाष्टोत्तरशतंजुहुयात्॥मधुसर्पिषायवैःकृष्णतिलैःक्षीरवृक्षसमिद्भिःघृतमध्वाक्ता॥

री भिस्तदभावेखादिरैभिर्वातदभावेअपामार्गीभिर्वाकुशमयीभिर्दूर्वामयीभिर्वा॥तथापंचभि
र्बिल्वफलैर्बिल्वबीजैर्वाहोमंकुर्यात्॥अथप्रणवाद्यैःस्वाहांतैर्वास्तुदेवतानाममंत्रैर्यथाश
क्तितिलैर्जुहुयात्॥ततोवास्तुमर्मसंधानायाघोरेणाष्टोत्तरशतंकृत्वादिग्बलिंदत्वारक्षोघ्न
पापमानसूक्तेनसूत्रेणमंडपंवेष्टयेत्॥ ॥अथकुंडादीशानभागेवेदिकायामादित्यादीन
ग्रहान्साधिपत्यधिदेवतान्स्थापयेत्॥तद्यथा॥मंडलेआदित्यादिदेवतास्थापनंकरि
ष्ये॥इतिसंकल्प्य॥पद्मासनःपद्मकरोद्विबाहुःपद्मद्युतिःसप्ततुरंगवाहनः॥दिवाकरो
लोकगुरुःकिरीटीमयिप्रसादंविदधातुदेवः॥एवंध्यात्वाआकृष्णेनेतिहिरण्यस्तूपःस
विताग्निष्टुप्॥ॐआकृष्णेन॥ॐभूर्भुवःस्वःकलिंगदेशोद्भवकाश्यपसगोत्रसूर्यइहा

गछइहतिष्टेतिमंडलमध्येस्थापयेत्॥ पंचवक्त्रोवृषारूढःप्रतिवक्त्रंत्रिलोचनः॥ कपालह
स्तःखट्वांगीचंद्रमौलिःसदाशिवः॥ त्रियंबकंवसिष्टोरुद्रोनुष्टुप्॥ ॐत्रियंबकं॥ ॐभूर्भुव
स्वःरुद्रइहागछइहतिष्टेतिसूर्यस्यदक्षिणपार्श्वेस्थापयेत्॥ पिंगभ्रूश्मश्रुकेशाक्षःपिं
गाक्षोजठरोरुणः॥ छागस्थःसाक्षसूत्रस्वसमार्चिःशक्तिधारणः॥ अग्निंदूतंमेधा
तिथिरग्निर्गायत्री॥ ॐअग्निंदूतंवृणीमहे॥ ॐभूर्भुवःस्वः अग्नेइहागछइहतिष्टेतिवा
मपार्श्वेस्थापयेत्॥ श्वेतांबरःश्वेतविभूषणाश्चश्वेतद्युतिर्दंडधरोद्विबाहुः॥ चंद्रोमृ ६६
तात्मावरदःकिरीटीश्रेयांसिमह्यंप्रददातुदेवः॥ आप्यायस्वगौतमःसोमोगायत्री
आप्यायस्व॥ ॐभूर्भुवःस्वःयमुनातीरोद्भवआत्रेयसगोत्रसोमइहागछइहतिष्टेति

मंडलाग्नेयांचंद्रस्थापनं॥ गौरीशंखेंदुवर्णाभांशर्वरीषनिषेविता॥ छत्रपद्मासनासीनां
साक्षसूत्रकमंडलुं वरादोद्यतरूपाद्यांसर्वमाल्यफलप्रियं॥ ध्यायेदितिशेषः॥ गौरीर्मि
मायेतिदीर्घतमाउमाजगती॥ ॐगौरीर्मिमाय॥ ॐभूर्भुवःस्वःउमेइहागछइहतिष्टे
तिसोमस्यदक्षिणपार्श्वे॥ स्त्रीवर्णाःकृष्णवर्णाश्चद्विभुजाःश्वेतवाससः॥ दधनाःपा
शकलशौकरयोमकरासनाः॥ अप्सुमेसिंधुद्वीपआपोगायत्री॥ ॐअप्सुमेसोमो
अब्रवीत्॥ ॐभूर्भुवःस्वःआपइहागछतइहतिष्टतेतिसोमस्यऐंवामभागेआपः
स्थापयेत्॥ रक्तांबरोरक्तवपुःकिरीटीचतुर्भुजोमेषगमोगदाभृत्॥ गदाधरःशक्ति
धरश्चशूलीमोमाममस्याद्वरदःप्रसांतः॥ अग्निर्मूर्धाविरूपांगारकोगायत्री॥ ॐअ

ग्निमूर्द्धा॥ ॐभूर्भुवःस्वःअवंतीसमुद्भवभरद्वाजसगोत्रभौमइहागच्छइहतिष्ठइतिमंडलद
क्षिणेभौमंस्थापयेत्॥ कुमारःषण्मुखःकार्यःशिखंडकविभूषणः॥ रक्तांबरधरःका
र्योमयूरवरवाहनः॥ यदक्रंदोमेधातिथिःस्कंदोगायत्री॥ ॐयदक्रंदः॥ ॐभूर्भुवःस्वः
स्कंदइहागच्छइहतिष्ठइतिभौमस्यदक्षिणपार्श्वेस्थापयेत्॥ शुक्लवर्णामहीपाकादि
व्यानरणभूषिता॥ चतुर्भुजासौम्यवपुश्चंचकोश्मसदृशांबरा॥ रत्नपात्रंसस्यपात्रंपा
त्रमोषधसंयुतं॥ पद्मंकरेचकर्तव्यंभुवोयादवनंदन॥ स्योनापृथिवीमेधातिथिर्भूमि ६९
र्गायत्री॥ ॐस्योनापृथिवी॥ ॐभूर्भुवःस्वःभूमेइहागच्छइहतिष्ठइतिभौमस्यवामभागे
स्थापयेत्॥ पीतांबरःपीतवपुःकिरीटीचतुर्भुजोदंडधरश्चहारी॥ वर्मासिध्रुकसोम

सुतःसदामेसिंहाधिरूढोवरदोबुधोस्तु॥ उद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप्॥ ॐउद्बु
ध्यध्वं॥ ॐभूर्भुवःस्वःमगधदेशोद्भवसोमसगोत्रबुधइहागच्छइहतिष्ठइतिमंडलेशा
न्यांबुधंस्थापयेत्॥ अथचक्रंगदामूर्ध्वेवामयोःकरयोःक्रमात्॥ ऊर्ध्वेशंखमधः
पद्मंगोविंदःकपिलांगकः॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ ॐइदंविष्णुः॥ ॐ
भूर्भुवःस्वःविष्णोइहागच्छइहतिष्ठइतिबुधस्यदक्षिणपार्श्वेस्थापयेत्॥ नारायण
श्चतुर्बाहुःशंखचक्रंतथापरे॥ दक्षिणेतुगदापद्मंनीलजीमूतसन्निभं॥ सह
स्रशीर्षानारायणोविष्णुरनुष्टुप्॥ ॐसहस्रशीर्षा॥ ॐभूर्भुवःस्वःविष्णोइहागच्छ
इहतिष्ठइतिबुधस्यवामभागेस्थापयेत्॥ ॐपीतांबरःपीतवपुःकिरीटीचतुर्भुजोदेव

गुरुः प्रसांतः॥ दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं॥ बृहस्पते गृत्सम
दो त्रिष्टुप्॥ ॐ बृहस्पते॥ ॐ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरसगोत्र बृहस्पते इहाग
च्छ इह तिष्ठ इति मंडलोत्तरे बृहस्पतिं स्थापयेत्॥ पद्मपद्मासनस्थश्च ब्रह्मा ध्येयश्चतु
र्भुजः॥ अक्षमालां स्रुवं बिभ्रत्पुस्तकं च कमंडलुं॥ ॐ ब्रह्मणा ते विश्वामित्र ब्रह्मा
त्रिष्टुप्॥ ॐ ब्रह्मणा ते युनज्मि हरी सखाया सधमाद आशू॥ स्थिरं रथं सुखमिंद्राधि
तिष्ठन्प्रजानन्विद्वाँ उपयाहि सोमं॥ ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इह तिष्ठ इति गुरोर्दक्षि दर्दि
णपार्श्वे स्थापयेत्॥ चतुर्दंतगजारूढो वज्रपाणिपुरंदरः॥ शचीपतिश्च ध्यातव्यो ना
नाभरणभूषितः॥ ईंद्रायेंदो कश्यप इंद्रो गायत्री॥ ॐ इंद्रायेंदो मरुत्वते पस्व मधुम

त्तमः॥ ऋतस्य योनिमासदं॥ ॐ भूर्भुवः स्वः इंद्र इहागच्छ इह तिष्ठ इति गुरोर्वामपार्श्वे श्वेतांब
रः श्वेतवपुः किरीटी च चतुर्भुजो दैत्यगुरुः प्रशांतः॥ तथाक्षसूत्रं च कमंडलुं च जटां च बिभ्रद्वर
दोस्तु मह्यं॥ शुक्रः पराशरश्शुक्रो द्विपदा विराट्॥ ॐ शुक्रः शुशुक्वां॥ ॐ भूर्भुवः स्वः भोजक
टदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छ इह तिष्ठ इति मंडलपूर्वे स्थापयेत्॥ चतुर्दंतगजारू
ढो वज्रपाणिपुरंदरः॥ शचीपतिश्च ध्यातव्यो नानाभरणभूषितः॥ इंद्रं वो मधुच्छंदा इंद्रो गा
यत्री॥ ॐ इंद्रं वो विश्वतस्परि॥ ॐ भूर्भुवः स्वः इंद्र इहागच्छ इह तिष्ठ इति शुक्रस्य दक्षिणपा
र्श्वे स्थापयेत्॥ इंद्राणि सर्वसिद्धार्था सर्वाभरणभूषिता॥ गर्ताक्षी क्षीणदेशा च क्षामा
कुक्षि भयंकरी॥ विवृतास्या च दंष्ट्राया सौ वंद्या कौशिके स्थिता॥ लेलिहाना विलक्ता

ज्वीज्वलत्केशाद्रिमंडिता॥ द्वीपिचर्मांबराकृशा चामुंडा मुंडमालिनी॥ जटिला वर्त्तुलाच्यता
चव्वर्बाहुषु बिभ्रती॥ कपालकर्त्तरीयाम्ये पाशांकुशं च वामतः॥ इंद्राणि त्वषाकपिरिंद्राणि
पंक्तिः॥ ॐ इंद्राणी मासु नारीषु॥ ॐ भूर्भुवः स्वः इंद्राणि इहागच्छ इह तिष्ठ इति शुक्रस्य वाम
पार्श्वे स्थापयेत्॥ नीलद्युतिः शूलधरः किरीटी गृध्रस्थितो बाणकरो धनुष्मान्॥ चतुर्भु
जः सूर्यसुतः प्रशांतो वरप्रदो मेस्तु स मंदगामी॥ शमग्निरिरिंबिरिः शनिरुल्लिका॥ ॐ
शमग्निर्मि॥ ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चर इहागच्छ इह ति ईर्षि
ष्ठ इति मंडले पश्चिमतः स्थापयेत्॥ महामहिषमारूढो धर्मराजश्चतुर्भुजः॥ दंडापद्मा
भयकरश्चर्मन्तश्चवरप्रदः॥ यमायं सोमं यमोनुष्टुप्॥ ॐ यमाय सोमं सुनुत॥ ॐ भू

र्भुवः स्वः यम इहागच्छ इह तिष्ठ इति शनैश्चरस्य दक्षिणपार्श्वे॥ यज्ञोपवीती हंसस्थ एकवक्त्रश्च
तुर्भुजः॥ स्रुवं स्रुक्स्रुवं च धत्ते कुंडिकां च प्रजापतिः॥ प्रजापते प्राजापत्यो हिरण्यगर्भः प्रजा
पतिस्त्रिष्टुप्॥ ॐ प्रजापते॥ ॐ भूर्भुवः स्वः प्रजापते इहागच्छ इह तिष्ठ इति शनैश्चरस्य वामपा
र्श्वे॥ नीलांबरो नीलवपुः किरीटी कपालवक्त्रः करवालशूली॥ चतुर्भुजश्चर्मधरस्तु राहुः
सिंहासनस्थो वरदोस्तु नित्यं॥ कयानो वामदेव राहुर्गायित्री॥ ॐ कयानः॥ बर्बरदेशस्थ राठि
नापुरोद्भव सिंहारूढ पैठीनसिसगोत्र राहो इहागच्छ इह तिष्ठ इति मंडले नैर्ऋत्ये राहुं स्थाप
येत्॥ यमं चैव प्रकुर्यात्तु लोहदंडं समन्वितं॥ महामहिषमारूढं मूठ पाशाकरे पदे॥ ब्रह्मजज्ञानं
विश्वामित्रः काल स्त्रिष्टुप्॥ ॐ ब्रह्मजज्ञानं॥ ॐ भूर्भुवः स्वः काल इहागच्छ इह तिष्ठ इति राहोर्द

दक्षिणपार्श्वे स्थापयेत्॥ सर्पा रक्तास्त्रिनेत्राश्च द्विभुजाः पीतवस्त्रकाः॥ फलकासिधरास्सत्तणाभा
स्वत्फलविभूषणा॥ आयंगौः सार्पराज्ञी सर्पगायत्री॥ ॐ आयंगौः पृश्निरक्रमीत्॥ ॐ भूर्भु
वः स्वः सर्पाः इहागच्छ इह तिष्ठेति राहोर्वामपार्श्वे स्थापयेत्॥ धूम्रो द्विबाहुः वरदो गदाभृद्
गृध्रासनस्थो विकृताननश्च॥ किरीटकेयूरविभूषितांगः सदास्तु मे केतुगणः प्रशांतः
केतुर्मधुच्छंदाः केतुर्गायत्री॥ ॐ केतुं कृण्वन्नकेतवे॥ ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव
कपोतवाहन जैमिनिसगोत्र केतो इहागच्छ इह तिष्ठेति मंडलवायव्ये केतुं स्थापयेत् ७०
उदिच्यवेशः स्वाकारो द्विभुजं सौम्यदर्शनं॥ पुस्तकालोकनपरं चित्रगुप्तं विचिंतयेत्
दक्षिणे लेखनी तस्य वामे पत्रं च कारयेत्॥ सचित्र चित्रं भरद्वाज सैश्च चित्रगुप्तस्त्रिष्टुप्॥

सचित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयोधां॥ चंद्रं रयिं पुरुवीरं बृहंतं चंद्र चंद्राभिर्गृण
ते युवस्व॥ ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इह तिष्ठेति केतोर्दक्षिणपार्श्वे स्थापयेत्॥ अक्ष
मालास्रुवं चैव पुस्तकं च कमंडलुं॥ ब्रह्माणं चिंतयेत्तत्र कुंकुमारुणविग्रहं॥ ब्रह्मयज्ञानं
वामदेवो ब्रह्मा त्रिष्टुप्॥ ॐ ब्रह्मजज्ञानं॥ ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इह तिष्ठेति केतो
र्वामपार्श्वे स्थापयेत्॥ पाशांकुशौ कल्पलतां विषाणं दधत्स्वदंडाहितबीजपूरः॥ रक्तस्त्रि
नेत्रो तरुणेंदुमौली हारोज्ज्वलो हस्तिमुखोवताद्वः॥ आतूनः कुसीद्वि विनायको गाय
त्री॥ ॐ आतूनइंद्रक्षुमंतं॥ ॐ भूर्भुवः स्वः विनायक इहागच्छ इह तिष्ठेति नैर्ऋते रुत्तरभा
गे स्थापयेत्॥ कात्यायनां कराग्रेरिकुलनयदां मौलिबद्धेंदुरेखां शंखं चक्रं कृपाणं

त्रिशिखमपिकरैरुद्वहंतीत्रिनेत्रां॥ सिंहस्कंधाधिरूढांत्रिभुवनमखिलंतेजसापूरयंतीध्या
येद्दुर्गांजयाख्यांत्रिदशपरिवृतांसेवितांसिद्धिकामैः॥ जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥
ॐजातवेदसे॥ ॐभूर्भुवःस्वःदुर्गेइहागच्छइहतिष्ठेतिशनेरुत्तरभागेस्थापयेत्॥ धावन्
हरिणपृष्ठस्थोध्वजधारिसमीरणः॥ वरदानकरोधूम्रवर्णःकार्योविजानता॥ क्राणाशि
शुस्त्रितोवायुरुष्णिक्॥ ॐक्राणाशिशुर्महीनांहिन्वन्नृतस्यदीधितिं॥ विश्वापरिप्रिभु
वदधद्वितां॥ ॐभूर्भुवःस्वःवायोइहागच्छइहतिष्ठेतिसूर्यस्योत्तरभागे॥ नीलोसखाभं ७२
गगनेतद्वर्णांबरधारिच॥ चंद्रार्कहस्तंध्यातव्यंद्विभुजंसौम्यदर्शनं॥ आदित्यस्यवत्स
आकाशोगायत्री॥ आदित्प्रत्नस्यरेतसोज्योतिःपश्यंतिवासरं॥ परोयदिध्यतेदिवा॥ ॐ

भूर्भुवःस्वःआकाशइहागच्छइहतिष्ठेतिराहोर्दक्षिणभागेस्थापयेत्॥ द्विभुजौदेवभिष
जौध्यातव्यौचारुलोचनौ॥ तयोरौषधयःकार्यौदिव्यौदक्षिणहस्तयोः॥ वामयोःपुस्तकौ
कार्यौदर्शनीयौतथैवच॥ एकस्यदक्षिणपार्श्वेवामेचान्यस्ययादव॥ नारीयुगंप्रकर्तव्यंसु
रूपंचारुदर्शनं॥ रक्तमांडकरेकार्यंचंद्रशुक्लांबरेतथा॥ एषोउषाप्रस्कण्वअश्विनौगाय
त्री॥ ॐएषोउषाअपूर्व्याव्युच्छतिप्रियादिवः॥ स्तुषेवामश्विनाबृहत्॥ अश्विनाविहाग
च्छतमत्र॥ तिष्ठतमितिकेतोर्दक्षिणेस्थापयेत्॥ अथदिक्पालाः॥ तत्रपूर्वस्यामिंद्रंच
तुर्दंतगजारूढोवज्रपाणिःपुरंदरः॥ शचीपतिश्चध्यातव्योनानाभरणभूषितः॥ इंद्रवाम
थुछंदाइंद्रोगायत्री॥ इंद्रंवोविश्वतस्परि॥ ॐभूर्भुवःस्वःपीतवर्णइंद्रइहागच्छइहतिष्ठ

तिईशादीनष्टलोकपालान्सूर्यादिमुखानावाह्यपूजयेत् ॥ पिंगभ्रूश्मश्रुकेशाक्षःपिंगाक्षो
गठरोरुणः ॥ छागस्थःसाक्षसूत्रस्यसप्तार्चिःशक्तिधारणः ॥ अग्निंदूतंमेधातिथिरग्नि
र्गायत्री ॥ अग्निंदूतंवृणीमहे ॥ भूर्भुवःस्वःरक्तवर्णअग्नेइहागच्छइहतिष्ठेतिआग्नेय्यां ॥ ई
षत्पीतोयमोध्येयोदंडहस्तोविजानता ॥ रक्तध्वजकृपाशभृत्कृष्णोमहिषस्थोविभूषितः
यमायसोमंयमोयमोनुष्टुप् ॥ ॐयमायसोमंसुनत ॥ ॐभूर्भुवःस्वःश्यामवर्णयमइहाग
च्छइहतिष्ठेतिदक्षिणस्यांदिशि ॥ रक्तदृक्यामश्चवृक्षकोनिर्ऋतिर्विकृताननः ॥ पुंस्थि ७२
तःखड्गहस्तश्चदिव्याभरणभूषितान् ॥ मोषूणःकण्वोनिर्ऋतिर्गायत्री ॥ मोषूणःपरा
परा ॥ ॐभूर्भुवःस्वःनीलवर्णनिर्ऋतेइहागच्छइहतिष्ठेतिनिर्ऋत्यांस्थापयेत् ॥ वरु

णःपाशहस्तश्चसोम्यप्रतीच्यांमकराश्रयः ॥ गौरवर्णोनिम्नगामीसर्वरत्नसमुद्भवः ॥ त्वन्नोअ
ग्नेवामदेवोवरुणस्त्रिष्टुप् ॥ ॐत्वन्नोअग्नेवरुणस्यविद्वान् ॥ ॐभूर्भुवःस्वःश्वेतवर्णवरुणइहा
गच्छइहतिष्ठेतिपश्चिमायां ॥ धावन्हरिणपृष्ठस्थोध्वजधारीसमीरणः ॥ वरदानकरोधूम्रव
र्णःकार्योविजानता ॥ तववायोव्यश्वोवायुर्गायत्री ॥ तववायवृतस्पते ॥ ॐभूर्भुवःस्वःधूम्र
वर्णवायोइहागच्छइहतिष्ठेतिवायव्यां ॥ दशाश्वरथगःसोमोगदापाणिर्वरप्रदः ॥ श्वेतः
श्वेतांबरधरोअत्रिनेत्रसमुद्भवः ॥ सोमोधेनुंगोतमःसोमोगायत्री ॥ ॐसोमोधेनुं ॥ ॐ
भूर्भुवःस्वःसुवर्णवर्णसोमइहागच्छइहतिष्ठेतिउत्तरस्यांदिशि ॥ सर्वोत्तरोत्रिनेत्रश्च
वृषभस्थस्त्रिशूलधृक् ॥ कपालपाणिश्चंद्रार्धभूषणःपरमेश्वरः ॥ तमीशानंगोतम

ईशानोजगती॥ ॐतमीशानंजगतः॥ ॐभूर्भुवःस्वः रक्तवर्णईशानइहागच्छइहतिष्ठेतिई
शान्यां॥ पंचवक्त्रंदशभुजंत्रिनेत्रंस्मितसुंदरं॥ कर्पूरगौरंचंद्रार्धशेखरंसविभूषितं॥ नी
लग्रीवंनागहारंव्याघ्रचर्मांबरावृतं॥ कमंडल्वक्षसूत्राहिपाशांकुशधरंहरं॥ त्र्यहंडदंड
डमरुखड्वांगाभयपात्रकं॥ अस्मेरुद्राप्रगाथोरुद्रस्त्रिष्टुप्॥ ॐअस्मेरुद्रा॥ ॐभूर्भुवः
स्वः रुद्रइहागच्छइहतिष्ठेति॥ आकाशे॥ ॥समवर्णोमहीशोक्तादिव्याभरणभूषिता॥
चतुर्भुजासौम्यवपुश्चंद्रांशुसदृशांबरा॥ रत्नपात्रंसस्यपात्रंपात्रमोषधसंयुतं॥ पद्मं ७२
करेचध्यातव्यंभुवोयादवनंदन॥ स्योनापृथिवीमेधातिथिर्भूमिर्गायत्री॥ ॐस्योनापृथि
वी॥ ॐभूर्भुवःस्वः भूमेइहागच्छइहतिष्ठेति॥ अथ॥ प्रसन्नवदनाःसौम्यावरदाःशांति

पाणयःपद्मासनस्थाद्विभुजाध्यातव्यावसवःसदा॥ अग्नेरुत्तरतईशानदक्षिणतः॥ उत्त
रोत्तरावसूनांस्थापनं॥ ॐध्रुवायनमः॥ ॐभूर्भुवःस्वः ध्रुवइहागच्छइहतिष्ठेतिस
र्वत्रऊहःकर्तव्यः॥ ॐअध्वरायनमः॥ ॐसोमायनमः॥ ३॥ ॐअपायनमः॥ ४॥ ॐअनलाय
नमः॥ ५॥ ॐअनिलायनमः॥ ६॥ ॐप्रत्यूषायनमः॥ ७॥ ॐप्रभासायनमः॥ ८॥ इंद्रेशानयोर्म
ध्ये आदित्यानांस्थापनं॥ पद्मासनस्थाद्विभुजाःपद्मगर्भांतिकांतिकाः॥ करादिस्कंध
पर्यंतंनीलपंकजधारिणः॥ अथःसंस्थितमेषादिराशयःशाक्तांघ्रिकाः॥ धात्राद्याद्वा
दशादित्यास्तेजोमंडलमध्यगाः॥ ॐधात्रेनमः॥ ॐभूर्भुवःस्वः धातः इहागच्छइहतिष्ठे
तिसर्वत्रऊहःकार्यः॥ ॐअर्यमणेनमः॥ २॥ ॐमित्रायनमः॥ ३॥ ॐवरुणायनमः॥ ४॥ ॐअं

शर्वेनमः॥५॥ॐभगायनमः॥६॥ॐइंद्रायनमः॥७॥ॐविवस्वतेनमः॥८॥ॐपूष्णेनमः॥९॥ॐप
र्जन्यायनमः॥१०॥ॐत्वष्ट्रेनमः॥११॥ॐविष्णवेनमः॥१२॥अथेशपश्चिमदिग्भागेएकादश
रुद्राणांस्थापनं॥रक्तवर्णास्त्रिनयनाश्चिंत्याश्चंद्रमौलयः॥ध्यातव्याजटिलाःसर्वेवर
दाबाणधनुर्धराः॥ॐवीरभद्रायनमः॥ॐभूर्भुवःस्वःवीरभद्रइहागच्छइहतिष्ठेतिस
र्वत्रोह्यः॥१॥ॐशंभवेनमः॥२॥ॐगौरीशायनमः॥३॥ॐअजैकपदेनमः॥४॥ॐअहिर्बु
ध्न्यायनमः॥५॥ॐपिनाकिनेनमः॥६॥ॐभुवनाधीश्वरायनमः॥७॥ॐकपालिनेनमः॥ ७४
८॥ॐस्थाणवेनमः॥९॥ॐभर्गायनमः॥१०॥ॐभगवतेनमः॥११॥अथेतेशरुद्रसोममध्येमा
तृस्थापनं॥पूज्याश्चित्रेर्थवाचर्याश्चरदामयपाणयः॥ॐगौर्यैनमः॥ॐभूर्भुवःस्वःगौरी

इहागच्छइहतिष्ठेतिसर्वत्रोह्यः॥१॥ॐपद्मायैनमः॥२॥ॐशच्यैनमः॥३॥ॐमेधायैनमः॥४॥ॐ
सावित्र्यैनमः॥५॥ॐविजयायैनमः॥६॥ॐजयायैनमः॥७॥ॐदेवसेनायैन०॥८॥ॐस्वधायै
न०॥९॥ॐस्वाहायैन०॥१०॥ॐमातृभ्योन०॥११॥ॐलोकमातृभ्योन०॥१२॥ॐधृतयेन०॥१३॥ॐपुष्ट्यै
न०॥१४॥ॐतुष्ट्यैन०॥१५॥ॐआत्मनःकुलदेवतायैन०॥१६॥कुबेरमरुतयोर्मध्येमरुतांस्था
पनं॥देवागणकोतपंचाशद्देवेंद्रसमतेजसः॥भ्रातरःपुरुरूतस्यमरुतःसूर्यतेजसः॥किरी
टहारकेयूरकटकादिविभूषिताः॥खड्गचर्मधरानित्यंशक्रस्यानुचराःसदा॥ॐआवहा
यनमः॥ॐभूर्भुवःस्वःआवहइहागच्छइहतिष्ठेतिइत्यूह्य॥१॥ॐप्रवहायन०॥२॥ॐउद्वहा
यन०॥३॥ॐसंवहायनमः॥४॥ॐविवहायन०॥५॥ॐपरावहायनमः॥६॥ॐपरिवहायनमः॥७॥

तत्रब्रह्माच्युतेशार्कवनस्पतीनांस्थापनं॥पद्मपत्रासनस्थश्चब्रह्माध्येयश्चतुर्मुखः
॥ब्रह्मजज्ञानंवामदेवोब्रह्मात्रिष्टुप्॥ॐब्रह्मजज्ञानं॥ॐभूर्भुवःस्वःब्रह्मन्इहागछइ
हतिष्टेतिस्थापयेत्॥१॥चदच्छिणंदछिणाधःकरादारभ्यनित्यशः॥विष्णुःकौमोदकीप
द्मशंखचक्रैरलंकृतः॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ॐइदंविष्णुर्विचक्रमे॥ॐभूर्भु
वःस्वःविष्णोइहागछइहतिष्टेतिस्थापयेत्॥२॥पंचवक्त्रोगजारूढःप्रतिवक्त्रंत्रिलो
चनः॥कपालशूलखट्वांगीचंद्रमौलिःसदाशिवः॥त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्॥ॐत्र्यं ७५
बकं॥ॐभूर्भुवःस्वःरुद्रइहागछइहतिष्टेतिस्थापयेत्॥३॥रविर्ध्येयःशुभःस्मश्रु
सिंदूरारुणसप्रभः॥पद्मासनःपद्मकरोभूषितोरसनाधरः॥आकृष्णेतिहिरण्यस्तूपः

सवितात्रिष्टुप्॥ॐआकृष्णेनरजसा॥ॐभूर्भुवःस्वःसूर्यइहागछेइहतिष्टेतिस्थापयेत्
॥४॥श्वेतांबरःश्वेतविभूषणाश्चश्वेतद्युतिर्दंडधरोद्विबाहुः॥चंद्रोमृतात्मावरदःकिरीटी
श्रेयांसिमह्यंप्रददातुदेवः॥आप्यायस्वगौतमःसोमोगायत्री॥ॐआप्यायस्व॥ॐभूर्भुवः
स्वःसोमइहागछइहतिष्टेतिस्थापयेत्॥५॥इतिग्रहमंडलदेवतास्थापयित्वायथाक्रमं
संपूज्यतेन्यइशानकोणेअक्षतपुंजोपरिदध्यक्षतविभूषितंसपल्लवंसरत्नंसवस्त्रंत्र्या
जिघ्रेतिप्रतिष्ठाप्यकेलशेतत्रतीर्थान्यावाह्यवरुणंविंन्यसेत्॥ततःआचार्यःस्वकुंडमे
त्यचर्वादिभिर्नवग्रहमखंविधायपूर्णाहुतिंचदद्यात्॥इतिप्रतिष्ठायागांगभूतावा
स्तुपूजाग्रहशांतिश्च॥॥अथाचार्यःस्नपनमंडपमागत्यस्नपनद्रव्यसंभृतिंकृत्वातत्र

मूलमंत्राग्निमंत्रैस्तेनपंचगव्येनतद्भूमिंवेदिकांचयंत्रंचसंप्रोक्ष्यतत्रदक्षिणवेदिकायांप्रकीर्णे
वालुकायांअक्षतैःस्वस्तिकमालिख्यतत्रसप्तधान्यकृताधारमुदगग्रंभद्रपीठंनिधाय
वेदिकायाःपश्चाद्वारिपूर्णान्पल्लववाननांस्त्रिसूत्रीवेष्टितान्षट्कलशान्मृत्तिकाभिर्गो
मयकषायगोमूत्रभस्मगंधोदकैःपूर्णयापरान्यैचदेवतासंज्ञांश्चचिन्हयित्वागंधोदके
नापूर्यतदनंतरंरक्षपतितदनंतरंकलशांचतान्सर्वानाजिघ्रेतिगंधादिनाधिवासयेत्
॥ अथोत्तरवेद्यांशाग्वदपरंभद्रपीठंनिधायतस्याःसमंतात्वारिपूर्णान्पल्लववाननांस्त्रिसू ७६
त्रीवेष्टितानष्टौकलशान्पूर्वादिक्रमेणक्षारोदकक्षीरदधिसर्पिःसुरेक्षुरसस्वादूदकगर्भो
दकान्नामभिःकृतचिन्हान्हिरण्यगर्भाद्यैरष्टभिर्मंत्रैर्विन्यसेत् । तथान्यांश्चवेद्याःपश्चा

तत्रद्रव्यनामांकितान्स्थापयेत् ॥ तद्यथा ॥ मृत्तिकोगोमयगोमूत्रभस्ममिलितपंचगव्यक्षी
रदधिघृतमधुशर्कराकलशाइतिदशशुद्धोदककलशाश्चत्रदशेति ॥ सूक्ष्मतंतुवस्त्रं ॥
सुगंधतैलं ॥ यवाद्युद्वर्तनचूर्णं ॥ सुगंधामलकं ॥ मांसिच ॥ शुद्धजलकलशद्वयपुनःशुद्धकर्पू
चामृतकलशाः ॥ पंचवारिकलशाः गंधोदककलशः पंचकलशायकलशः ॥ औषधिकलशः
पुष्पकलशः ॥ शांतिकलशः ॥ फलकलशः ॥ सुवर्णोदककलशः ॥ गोशृंगोदककलशः ॥ धान्य
कलशः ॥ सहस्रधाराकलशः ॥ सर्वौषधीकलशः ॥ पंचपल्लवकलशः ॥ रत्नकलशः ॥ तीर्थोदक
कलशः ॥ वत्समांसपल्लवोपेतादिक्पालकलशादश ॥ मंगलकलशाइत्येतान्षट्चत्वारिंश
त् ॥ आजिघ्रेतिप्रतिष्ठाप्यगंधपुष्पधूपैरधिवासयेत् ॥ तदंतेतीर्थोदककलशोतीर्थान्या

वाह्येत्॥ तद्यथा॥ काशीकुशस्थलीमायावंत्ययोध्यामधोःपुरी॥ शालग्रामंसरोकर्णनर्म
दाचसरस्वती॥ तीर्थान्येतानितीर्थस्मिन्विशंत्तब्रह्मशासनात्॥ ऊषारुरासरोजाक्षीपद्म
हस्ताशशिप्रभा॥ आगछंत्तुसरिज्येष्ठागंगापापप्रनाशिनि॥ नीलोत्पलदलश्यामापद्मह
स्तांबुजेक्षणा॥ आयात्तयमुनादेवीकूर्मयानस्थितासदा॥ प्राचीसरस्वतीपुण्यापयोष्णीगो
तमीतथा॥ नर्मदाचंद्रभागाचसरयूर्गंडकीतथा॥ जंबुकाचमातंगश्चकालिकासुशनातथा
॥वितस्ताचविपाशाचसमदाचपुनःपुना॥ गोदावरीमहावर्त्ताशर्कराचर्त्तमार्जुनी॥ कावेरी ७१
कौशिकीचैवद्दतीयाचमहानदी॥ विटंकाप्रतिकूलाचसोमनंदाचविकृवा॥ करतोया
वेत्रवतीरेणुकावेणुकाचया॥ त्वन्येयगंगावैतरणीकाश्मीरिह्लादिनीचया॥ ञ्चवनीच

चसवत्रासाकल्माषाशंसिनी॥ तथा॥ वसिष्टाचआपाप्याचसिंधुवत्यारुणीतथा॥ ताम्राचैवत्रि
संध्याचमंदाकिनीतथापरा॥ तैलकाशीचपराचंडउनीनकुलीतथा॥ निलगंधाचबोधच
पूर्णचंद्राशशिप्रभा॥ अमरेशंप्रभासंचनैमिकंपुष्करंतथा॥ आषाढिंडिंडिनारत्ननारन्ध
त्तिंबलाकुलं॥ हरिश्चंद्रंपरंगुह्यंगुह्यंमध्यमकेश्वरं॥ श्रीपर्वतिसमाख्यातंजलेश्वरमतःप
रं॥ आम्रातकेश्वरंचैवमहाकालंतथैवच॥ केदारमुत्तरंगुह्यंमहाभैरवमेवच॥ गयांचैवकुरु
क्षेत्रंगुह्यःकनकैखलंतथा॥ विमलंचंद्रहासंचमहेंद्रंभीममष्टकं॥ छागलांडंद्विरंडंचकर्को
टंमंडलेश्वरं॥ कालंजरंवनंचैवदेवदारुवनंतथा॥ शंकुकर्णंतयैवेहस्थलेश्वरमतःपरं॥
एतान्यष्टस्वतीर्थानिगुह्यंक्षेत्राणिसर्वतः॥ तानिसर्वाणिकुंभेस्मिन्विशंत्तब्रह्मसंश

नात्॥ ततःशुद्धोदककलशान्बिंबस्यस्नानोपकरणजातंचान्यत्समाहरेत्॥ अथाचार्योय
जमानमूर्त्तिपस्थपतिसुवासिनीभिःसहितःस्वस्त्यादिघोषेणकर्मकुटिंगत्वानुमिमुपलि
प्यतत्रविधिनाग्निंप्रतिष्ठाप्यप्रतिमानिर्माणेप्राणिवधादिदोषप्रायश्चित्तार्थंदुर्निमित्तोप
शमनायघृतेनतिलैर्वापापभक्षमंत्रेदेवमंत्रेचआज्याहुतिंकृत्वापूर्णांदत्वाप्रतिमांकुमारु
द्भिरव्यमक्षताज्याभ्यंगेनदेवस्यव्रणानंगंध्वलासितपुष्पैःसंपूज्यमृदागोमयेनगोमूत्रेणन
स्मनाक्षीरेणपृथक्पृथक्कलशांतरितेनस्नपयित्वान्यच्चशंखतूर्यादिघोषेणब्रह्मरथादि ७८
देवंमहामंडपंप्रादक्षिण्येनस्नानमंडपमानयेत्॥ तत्राचार्योदक्षिणवेद्यांनैर्ऋतकोणेनिरि
तिभद्रासनेप्राङ्मुखंदेवंनिवेशयेत्॥ अथशिल्पीपूर्वकल्पितंसरत्नंसहिरण्यंसरत्नंस

पल्लवंकलशंदेवस्यपुरस्तात्स्थापयित्वाकुमारुल्लीत्यादिनिमंत्रैःपूर्वोक्तैस्तीर्थान्यावाह्यगीत
वादित्रनिनादैर्देवंस्नपयेत्॥ अथयजमानःशिल्पिवर्गंतत्परिचारकांश्चवस्त्रालंकारणाद्यैः
पूजयित्वाक्षमध्वमितितान्ब्रूयात्॥ अथाचार्यःशंखदुंदुभिघंटानिनादैर्बहिर्निर्गत्यसिद्धा
र्थघृतपायसैस्त्र्यंबकमितिप्रागादिदिक्षुबलिंदत्वाचम्यदेवसमीपमागत्यत्रातारमिंद्रमि
त्याद्यैर्दशलोकपालमंत्रैर्मंडपांतर्दिक्षुरक्षांविधायदेवस्यपुरतश्चतुरोब्राह्मणानुपवेश्य
स्वस्तिवाचयित्वातेभ्योदक्षिणांदत्वाकर्मसिद्धिमाशास्यतेभ्यश्चाशिषोगृहीत्वादेवस्नप
नमारभेत्॥ तद्यथा॥ अग्निर्मूर्द्धेतिमृदा॥ यज्ञायज्ञेतिकषायैः॥ तत्सवितुरितिगोमूत्रेणजलां
तरितेन॥ गंधद्वारामितिगोमयेनजलांतरितेन॥ प्रसद्येतिभस्मना॥ तांसवितुरितिगंध

तोयेन ॥ ततः पंचकलशैः पंचदेवत्यैः स्नपयेत् ॥ नमः संभवायेति प्रथमेन ॥ ईशः सर्वविद्
त्तिद्वितीयेन ॥ यातेरुद्र शिवेति तृतीयेन ॥ विश्वोरराटमिति चतुर्थेन ॥ ब्रह्मजज्ञानमिति पंच
मेन ॥ संस्नाप्य शतं जीवेति द्रुवन्हितम् श्वेतपुष्पैः प्रपूज्याभिवस्त्रेति पीतवस्त्रेण छाद्य ॥ ततो द्वि
तीयवेद्यां नंदं करणेनिरिति भद्रासने निधाय स्तीर्णं बर्हिरिति प्रागग्रान् कुशानास्तीर्य तं
च शाश्वतं देवं प्रणवेन विन्यस्य उत्तराभिमुखो भूत्वा कुंकुमाक्तेन सूत्रेण लिंगस्य लक्षणं ॥
सूत्रयित्वा हिरण्यगर्भ इति पूर्वकल्पितं सुवर्णपात्रं ताम्रपात्रं चादाय तत्र मधुघृते कृत्वा ७९
मधुवाता घृतवतीति मंत्रद्वयेनाभिमंत्र्य ताभ्यां मध्वाक्तायां सुवर्णसलाकां गृहीत्वा ॥ चं
नमो भगवते रुद्राय शिवाय हरये नमः ॥ हिरण्यरेतसे विष्णो विश्वरूपाय ते नम इत्यनेन

मंत्रेण लिंगस्य लक्षणमुद्धरेत् ॥ तद्यथा ॥ लक्षणोद्धरणं कुर्यात् लिंगस्य तु समाहितः ॥ त्रिधा ॥
विभज्य पूजांशं लक्षणं स्यादिभागिकं रेखात्रयं च कर्तव्यं यवार्द्धांतरसंमितं ॥ न स्थूलं न कृशां त
न्नवक्रं छेदवर्जितं ॥ निम्नं यवप्रमाणेन ज्येष्टलिंगस्य कारयेत् ॥ श्लक्ष्णा ततश्च कर्तव्या सदा
मध्ये कनीयसी ॥ अष्टभागं ततः कृत्वा त्यक्त्वा भागत्रयं बुधः ॥ लंबयेन्मणिरेखां तु पार्श्वयोरुभ
योः समं ॥ भ्रामयेत्तु पंचभागोर्ध्वं कारयेत्संगमं ततः ॥ तावत्प्रलंबयेद्विद्वान् यावद्भागचतुष्टयं
॥ रेखयोः संगमं तद्वत् द्वौ भागौ शिष्टतस्तत ॥ लिंगस्य लक्षणोद्धारे ब्रह्मेशानजनार्दनाः ॥ द
क्षिणादिषु रेखासु विज्ञेयाः शक्तिमापु च ॥ ऊर्ध्वाधिः पद्मपुटयो रक्ष्णोर्दक्षिणवामयोः ॥ क्र
मात् ब्रह्मा हरी ज्ञेयौ तारज्योतिर्महेश्वरः ॥ एवमेतत्समाख्यातं समासल्लक्षणं मयेति ॥ स्व

यंत्रबाणलिंगसरिद्भवलोहरत्नचरुद्धिंगानांलक्षणोद्धारंनकुर्यात्॥ अथपूर्वविन्संकल्पंपरि
कल्पंप्रतिमायामुखंलिंगस्यचनेत्राणिसुवर्णशयानासिकासंन्निधौनेत्रमंत्रेसंलग्नया
चित्रंदेवानामित्यर्धर्चेनअग्निर्ज्योतिरित्याकुलेनेतिवाअपांगप्रांतयोःनीलाऊर्ध्वा
धःपद्मपुटपृथक्कृतंकल्पयेत्॥ ततोनेत्रमध्येत्रिभागेनकृत्तांकनीनिकांप्रकल्पयेत्॥
॥ततोमुहूर्तंयावत्देवस्यपुरतोनतिष्ठेत्॥ सुवर्णघृतपायसंदर्शयेत्॥ शिल्पीशस्त्रेणावे
खामुल्लेखयेत्॥ तामाचार्यमधुसर्पिर्भ्यामभ्यज्य इमंमेगंगेइतिमंत्रेणाभ्युक्ष्यपुनर्म्रदा ८०
द्यैःशिल्पीशस्त्रदोषनिवृत्त्यर्थंस्नपयेत्॥ अथप्रतिमाबद्धत्वेपुनस्तत्रपिंडकास्थानमेवा
चनिंपूर्वोक्तंस्नपनादिकंसंक्षेपतःप्रतिपुरुषेणनिष्पाद्यनेत्रज्योतिःप्रभृतितैनैवकार

येत्॥ ततःसुवर्णपात्रंशलाकांस्नानवस्त्राणिचप्रतिमाकर्त्रेशिल्पिनेदद्यात्॥ अथहियजमानः
सहिरण्यांगामाचार्यायदत्वान्यस्यांवेद्यांमद्रासनेनिधायाचार्यःकलशेनसमुद्रज्येष्ठाइ देवं २
तिस्नपनंकृत्वान्यच्चदूर्वादिकतान्शिरसिदत्वाप्रार्थयेत्॥ नमस्तेचैसुरेशानिप्रकृतेविश्वक
र्मणः॥ प्रभाविताशेषजगद्धात्रिधन्येनमोनमः॥ त्वयीसंपूज्ययामीशंनारायणमनामयं॥
रहिताशेषदोषैश्चऋद्धियुक्तासदानवेति॥ ततोदक्षिणहस्तेसितार्णपट्टसूत्रनिर्मितंत्व
चीवितस्तिमात्रंकौतुकंमूलमंत्रेणकनिक्रदित्यनेनवाबार्हस्पत्येनवाबध्नीयात्॥ सर्वस
त्वमयंशांतंपरंब्रह्मसनातनं॥ त्वामेवालंकरिष्यामित्वंवेद्यांभवतेनमइतिमंत्रेणचेति
॥अथकरिष्यमाणस्नपनेकलशस्यःशेषंवारिकलशांतरेधारयित्वाप्रतिमांतरपिंडिका

जातस्नपनायेति पुरुषांतरे ममिदं त्यात॥ ततश्च निःकलशैरिदमापइति प्रथमेन॥ आ
पोदेवीरिति द्वितीयेन॥ इमं मे गंगे इति तृतीयेन॥ तत्वायामीति चतुर्थेन॥ तत्तोमूत्रमीतिक्रा
मष्टपलमादायाग्निर्मूर्द्धेति मृत्तिकाकलशेन तं॥ समुद्रज्येष्ठा इति शुद्धोदकेन क्षालयि
त्वा॥ गंधद्वारामिति सप्तसंमितगोमयकलशेन॥ वरुणकलशोत्तंभनमसीति शुद्धोदके
न॥ तत्सवितुरिति द्वादशपलगोमूत्रकलशेन॥ आपोहिष्ठेति शुद्धोदकेन॥ प्रसद्येति मुष्टि
संमितभस्मकलशोदकेन॥ योवनइति शुद्धोदकेन॥ पयः पृथिव्यामिति त्रिपलात्रसंमित ठै२
पंचगव्यकुंभेन॥ देवीरापइति शुद्धोदकेन॥ आप्यायस्वेति षोडशपलक्षीरकुंभेन॥ तस्मा अरंगमि
ति शुद्धोदकेन॥ दधिक्राव्णइति विंशतिपलसंमितदधिकुंभेन॥ युंजानइति उदकेन॥ घृतव

तीति सप्तपलघृतकुंभेन॥ देवस्यत्वेति जलेन॥ मधुवाता इति त्रिपलमधुकुंभेन॥ आपो अस्मा
निति जलेन॥ आयंगौरिति त्रिपलशर्कराकलशेन॥ आपोहयद्धतीइति शुद्धोदकेन॥ पत्न्या
स्ययज्ञायेति सूक्ष्मतंतुवस्त्रेण संमार्ज्य सुगंधतैलेनाभ्यज्य द्रुपदादिवेति यवगोधूममशा
लिबिनवमसूरचूर्णेन देवमुद्वर्त्य यातेरुद्र शिवा तनूरिति देवस्य शिरसि सुगंधामलकेय
क्षकर्दमानुपं मांसी च दत्वा मानस्तोक इति प्रतद्विष्णुरिति कलशद्वयेन स्नापयित्वा अपा
मसोममिति पंचामृतेनायं राजा वरुणोनुमन्यतां विशेषो यथा॥ संतेपयांसि आप्यायस्व मदिंतमसो
मे विश्वतः पृथिवीति शीतोदकेन स्नानिरुत्तिनिः॥ अश्वत्थेसधिष्ठवइति पंचनिःक्षालयेत्
गंधद्वारामिति गंधोदकेन॥ यज्ञायज्ञेति पंचपल्लवकषायकलशेन॥ याओषधीरिति ओषधीक

लशेन॥ ओषधीःप्रतिमोदध्वमितिसितपुष्पसितोदककलशेन॥ शांतापृथिवीशांत्युदकेन॥
याःफलिनीरितिअष्टफलोदककलशेन॥ हिरण्यगर्भइतिसुवर्णोदकेन॥ हविष्मतीरिति
गोशृंगोदकेन॥ धान्यमसीतिधान्योदकेन॥ सहस्राक्षेणेतिसहस्रधाराकलशेन॥ यादिव्या
इतिसर्वौषधीजलेन॥ नमोस्तुसर्पेभ्यइतिपल्लवोदकेन॥ अष्टौव्यख्यदितिरत्नोदकेन॥ इमं
मेगंगेइतितीर्थोदकेन॥ स्नपयित्वाष्टभिःकुंभैःफलपुष्पमंगलमृत्तोयैःपूर्वकल्पितैःसमुद्र
संभवैस्नपयेत॥ कयानश्चित्रइतिक्षीरोदकेन॥ आप्यायस्वेतिक्षीरोदकेन॥ दधिक्राव्णइति ८१
दध्युदकेन॥ घृतवतीतिघृतोदकेन॥ पयःपृथिव्यामितिइक्षुरसोदकेन॥ देवंबर्हिरितिसु
रोदकेन॥ स्वादिष्टयेतिस्वादूदकेन॥ सरस्वतीयोन्यांगर्भमितिगर्भोदकेन॥ पुनर्दशभिःकलशैः

पल्लवान्वितैर्लोकपालाभिधैःस्नपयेत॥ त्रातारमितिकदंबपल्लवकुंभेन॥ त्वन्नोअग्नइतिशाल्म
लीपल्लवकुंभेन॥ सुगंनुःपंथामितिजंबूपल्लवेन॥ असुन्वंतमित्यशोकपल्लवेन॥ तत्त्वाया
मीतिप्लक्षपल्लवेन॥ आनोनियुद्भिरितिचूतपल्लवेन॥ वयंसोमेतिवटपल्लवेन॥ तमीशानमि
तिबिल्वपल्लवेन॥ नमोस्तुसर्पेभ्यइतिनागपल्लवेन॥ ब्रह्मजज्ञानमितिपालाशपल्लवेन॥ नाना
भेरीशंखतूर्यकाह्लादनादध्वनिभिःपुण्यस्त्रीमंगलगीतैर्ब्रह्मघोषैःषोडशभिरष्टभिश्चत्रिभि
रेकेणवामंगलकुंभेनगंधोदकेनस्नपयित्वान्यथारितशेषवारिणान्यसतिमाद्यंपुरुषेणस्न
पयित्वादेवंसितवस्त्रेणसुगंधिनापरिमृज्यदेवलिंगमंत्रैर्विश्वतश्चक्षुरित्याद्यैश्चसकली
कृत्यदेवमावाहयेत॥ ओएह्येहिभगवन्विष्णोलोकानुग्रहकारक॥ यज्ञभागंगृहाणेमंवासु

देवनमोस्तुते॥ हिरण्यवर्णेतिपाद्यमर्घं दत्वा॥ ततोविष्ण्वादित्याचमनीयं॥ त्र्यंबकमितिचंदनादिना
दिना विलिप्य॥ वेदाहमित्युपवीतं दत्वा॥ अग्निवस्त्रेणपरिधाप्यवेदाहमित्युत्तरीयं॥ इदंविष्णुरि
तिप्रपूजयेत॥ धूरसीतिधूपं॥ चंद्रमामनसइतिदीपं॥ अन्नपतइतिनैवेद्यं॥ आचमनीयंद
त्वातैलपात्रःस्नानवस्त्राशननैवेद्यादिकंशिल्पिनेदद्यात॥ इतिदेवस्नपनइतिविधिः॥
अथदेवंपुरुषसूक्तेनस्तुत्वाउत्तिष्ठोत्तिष्ठेतिदेवमुत्थाप्यरथेतिष्ठन्नितिरथमारोप्यआ
कृरजेतिचतूर्यनिनादेनपुरुषसूक्तंजपन्पुरस्यप्रासादस्यवाप्रदक्षिणेनरथमार्गा ८३
नुगामिनाकर्मकर्तृस्थपतिलोकान्हिरण्यवस्त्रादिनानीराज्यष्टत्वानुसारेणतत्रस्थाप
न॥ शनैःशनैःयागमंडपपश्चिमद्वारमानीयोत्तरमौर्यार्घयित्वाकनिक्रदादितिम

न्त्रमंत्रेणपुरुषसूक्तेनाकृष्णेनेतिवाप्रवेशयेत॥ वेद्याःपश्चिमभागेपीठेपूर्वमुखंदेवंनिधायार्घ
पाद्यादिकमन्नपतइतिमधुपर्कंकुर्यात॥ अथपूर्वापरोत्तरयाम्यास्थेषुप्रासादेषुवेदिकाया
अग्निमरुदीशाननैर्ऋतेषुकोणेषुचतुष्कलशविकारान्विकीर्यवेद्यांशय्यायांसारदारुजं
पट्टंवानिधायतदुपरितूलिकांक्षिप्त्वाउपधानद्वययुक्तांआस्तीर्यसदवस्त्रेणाच्छाद्यतदुपरि
स्वस्तिकमक्षतैःकृत्वाकुशान्प्रागग्रान्पुष्पाणिचविन्यस्यतस्याःपूर्वादिदिक्षुविष्णुमधुसू
दनत्रिविक्रमवामनान्स्वनामभिःपूजयेत॥ आग्नेयादिकोणेश्रीधरंहृषीकेशंपद्मनाभंदा
मोदरंचेति॥ अथशैवेन्यत्रवाशर्वादिमूर्त्तिशानिष्ठानमःशंभवायेतिशाकशिरसंशय्यायां
निवेश्यत्रिनिर्ईकूलपट्टैर्विचित्रैःकर्पासैर्वाछाद्यदेवस्यशिरोदिशोभूमौसवस्त्रकांचननिशाक

नश्मापोदेविरिति आपो अस्मानिति च प्रतिष्ठाप्यायस्वेति मधुसर्पिभ्यां देवमभ्यज्य यातेरुद्रे
ति तैलसर्षपैरुपलिप्य गंधपुष्पाद्यैरभ्यर्च्य बृहस्पते परीति सितं प्रतिसरं दद्यात्॥ अत्रावस
रे देवस्य दक्षिणे पाणौ पूर्वनिर्मितं बृहस्पते परिदीरिति मंत्रेण कंकणं बध्नीयादित्येके॥
ततो विश्वतश्चक्षुरिति देवस्य पादनाभिवक्षःशिरःस्वालंभनं॥ ततः इंद्रहुतैत्रं ददातीति द
क्षिणपार्श्वे छत्रधारणं॥ वातो वा मनो वा इति व्यजनं॥ त्रीणि पदेति चरणयोः पादुके॥ पार्श्वयोः
शांतिकुंभौ॥ भोजनासनासनदर्पणघंटादिकं भक्ष्यभोज्यमन्नपानं घृतमधुगुडहोपस्करजातं ८४
च अग्नित्वा सुसुगनोनुम इति देवस्य पुरतः परिकल्पयेत्॥ अथ भस्मदर्भैस्तिलैर्देवसमंतात्
रक्षणार्थं प्राकारत्रयं कृत्वा मंडपाद्बहिर्गत्वा प्रतिदिशं लोकपालेभ्यो गंधादिपूर्वकं बलिं दद्यात्

नृतेभ्यश्च त्र्यंबकमिति॥ अथ संक्षेपेण बलिदानाय मंत्रांतरं यथा॥ पूर्वदिग्वासिभ्यो दिक्पति
दिग्भूताधिपतिदिग्रुद्रदिङ्नारदिक्क्षेत्रपालेभ्यो नमः इत्येवं प्रतिदिशं बलिं दत्वा चम्यशय्या
स्थिते देवे होमं कुर्यात्॥ तद्यथा॥ ॐ पराय विष्णात्मने नमः स्वाहेति वैष्णवे॥ अन्यदेवतायागे पर
यशिवात्मने स्वाहेत्येवं मंत्रः कर्तव्यः॥ अनेन मंत्रेणाष्टोत्तरसहस्रशतमष्टाविंशतिरष्टौ वा ति
लैर्यवैर्वा प्रत्येकमाहुतीर्हुत्वा प्रतिमायां न्यासानारभेत्॥ तद्यथा॥ अ पादयोः॥ उ हृदये॥ म ल ला
टे॥ इति प्रणवन्यासः॥ भूः पादयोः॥ भुवः हृदये॥ स्वः ललाटे॥ इति व्याहृतीन्यासः॥ अ
तालुके॥ आ मुखे॥ इ दक्षिणनेत्रे॥ ई वामे॥ उ दक्षिणश्रवणे॥ ऊ वामे॥ ऋ दक्षिणभुजे॥ ॠ
वामे॥ ऌ दक्षिणनासापुटे॥ ॡ वामे॥ ए ऊर्ध्वदशनेषु॥ ऐ अधोदशनेषु॥ ओ ओष्ठे॥ औ अ

अधरे॥ अंं ललाटे॥ अः जिह्वायां॥ यलचिँ रचक्षुषोः॥ लनासिकायां॥ वदशनेषु॥ शश्रोत्रयोः॥
षउदरे॥ सकटिदेशे॥ हहृदये॥ क्षनाभ्यां॥ ललिंगे॥ पफबभमदक्षिणबाहौ॥ तथदधनवामे
टठडढणदक्षिणजंघायां॥ चछजझञवामायां॥ कखगघङसर्वांगुलीषु॥ इतिमातृकान्यासः
॥ ॥आदित्यायनमः॥ चंद्रायनमः॥ नेत्रयोः॥ अंगारकायनमः॥ उरसि॥ बुधायनमः॥ स्कंधे॥ बृ
हस्पतेनमः॥ जिह्वायां॥ शुक्रायनमः॥ लिंगे॥ शनैश्चरायनमो ललाटे॥ राहवेनमः पादयोः॥
केतुभ्योनमः केशेषु॥ रोहिणीभ्योनमः हृदये॥ मृगशिरसेनमः शिरसि॥ आर्द्रायैनमः केशे ८५
षु॥ पुनर्वसवेनमः ललाटे॥ पुष्यायनमो मुखे॥ आश्लेषाभ्योनमः नासायां॥ मघाभ्योनमः दश
नेषु॥ पूर्वफाल्गुनीभ्योनमो दक्षिणश्रोत्रे॥ उत्तराफाल्गुनीभ्योनमो वामे॥ हस्तायनमो हस्त

योः॥ चित्रायनमो दक्षिणभुजे॥ स्वात्यैनमो वामे॥ विशाखाभ्योनमः॥ अनुराधाभ्योनमः स्तनयोः॥
ज्येष्ठाभ्योनमो दक्षिणकुक्षौ॥ मूलायनमो वामकुक्षौ॥ पूर्वाषाढाभ्योनमः कटिपार्श्वयोः॥ उत्त
राषाढाभ्योनमो लिंगे॥ श्रवणधनिष्ठाभ्यांनमो वृषणयोः॥ शतभिषग्भ्योनमो नेत्रे॥ पूर्वाभाद्रपदा
उत्तराभाद्रपदाभ्योनमः ऊर्वोः॥ रेवतीअश्विनीभ्योनमः जंघयोः॥ भरणीकृत्तिकाभ्योनमः पाद
योः॥ ध्रुवायनमो नाभ्यां॥ सप्तऋषिभ्योनमः कंठे॥ मातृमंडलायनमः कटिदेशे॥ विष्णुपदेभ्यो
नमः पादयोः॥ नागवीथ्यैनमः॥ अंगवीथ्यैनमः॥ वनमालायां॥ ताराभ्योनमः रोमकूपेषु॥ अ
गस्त्यायनमः कौस्तुभे॥ ॥इतिग्रहादिन्यासः॥ ॥चैत्रायनमः शिरसि॥ वैशाखायनमो मुखे॥ ज्ये
ष्ठायनमो हृदये॥ आषाढायनमः श्रावणायनमः स्तनयोः॥ भाद्रपदायनमः उदरे॥ आश्विना

यनमककुद्मि॥ कार्त्तिकायनमः मार्गशीर्षायनमः ऊरुद्वये॥ पौषायनमः माघायनमः॥ जंघयोः॥ फाल्गु
नायनमः पादयोः॥ संवत्सरायनमः परिवत्सरायनमः॥ ईदावत्सरायनमः॥ अनुवत्सरायनमः॥
इतिदक्षिणाद्येषुबाहुषु॥ पर्वेभ्योनमः संधिषु॥ ऋतुभ्यो। नमः शिरोषु॥ अहोरात्रेभ्योनमोऽस्थि
षु॥ क्षणायैनमः लवायनमः कलायैनमः॥ रोमकूपेषु॥ कृतायनमोमुखे॥ त्रेतायनमोहृदये
द्वापरायनमोनितंबे॥ कलियुगायनमः पादयोः॥ मन्वंतरेभ्योनमः बाह्वोः॥ परायनमः परार्धाय
नमोजंघयोः॥ महाकालायनमः शरीरे॥ उदगनायनमः॥ दक्षिणायनायनमः पादयोः॥ विष्णु दृष्टि
वतेनमः इतिसर्वांगुलीषु॥ इतिकालन्यासः॥ ब्राह्मणानमोमुखे॥ क्षत्रियायनमोबाह्वोः॥ वैश्या
यनमोऊर्वोः॥ शूद्रायनमः पादयोः॥ शंकरजेनमः पादाग्रे॥ अनुलोमजेनमः सर्वांगसंधिषु

गोभ्योनमोमुखे॥ अजाभ्योनमः आविकाभ्योनमः हस्तयोः॥ ग्राम्यपशुभ्योनमः॥ आरण्यपशु
भ्योनमः ऊर्वोः॥ ॥इतिवर्णन्यासः॥ मेघेभ्योनमः केशेषु॥ अन्नेभ्योनमोरोमसु॥ नदीभ्योनमः स
र्वगात्रेषु॥ समुद्रेभ्योनमः कुक्षिदेशे॥ ॥इतितोयन्यासः॥ ऋग्वेदायनमः शिरसि॥ यजुर्वेदायनमो
दक्षिणभुजे॥ सामवेदायनमोवामे॥ सर्वेपिविशिष्टेभ्योनमोहृदये॥ ईतिहासपुराणेभ्योनमोजंघ
योः॥ अथर्वांगिरसेभ्योनमोनाभौ॥ कल्पसूत्रेभ्योनमोमानौदयोः॥ व्याकरणायनमोवक्त्रे॥ तर्के
भ्योनमः कंठे॥ मिमांसायैशनिरुक्तायैनमोहृदि॥ छंदःशास्त्रेभ्योनमः ज्योतिःशास्त्रेभ्योनमो
नेत्रयोः॥ गीतशास्त्रेभ्योनृत्यशास्त्रेभ्योनमः श्रोत्रयोः॥ आयुर्वेदायनमोदक्षिणभुजे॥ धनुर्वेदा
यनमोदक्षिणभुजे॥ योगशास्त्रेभ्योनमो~~मनसे~~हृदये॥ नीतिशास्त्रेभ्योनमः पादयोः॥ वश्य
वाम

तंत्राय नमः ओष्ठयोः ॥ इति विद्यान्यासः ॥ दिवे नमो मूर्ध्नि ॥ सूर्यलोकाय नमः ॥ चंद्रलोकाय नमः ॥ ने
त्रयोः ॥ अनिललोकाय नमो घ्राणे ॥ व्योम्ने नमो नाभ्यां ॥ समुद्रेभ्यो नमः बस्तिदेशे ॥ पृथिव्यै नमः पा
दयोः ॥ इति वैराजन्यासः ॥ हिरण्यगर्भाय नमः शिरसि ॥ कृष्णाय नमः केशेषु ॥ रुद्राय नमो ललाटे ॥ य
माय नमो भ्रुकुट्यां ॥ अश्विभ्यां नमः कर्णयोः ॥ वैश्वानराय नमो मुखे ॥ मरुद्भ्यो नमो घ्राणे ॥ वसु
भ्यो नमः कंठे ॥ रुद्रेभ्यो नमो दंतेषु ॥ सरस्वत्यै नमो जिह्वायां ॥ ईशाय नमो दक्षिणभुजे ॥ बलये नमो
वामे ॥ शक्राद्याय नमो दक्षिणस्तने ॥ विश्वकर्मणे नमो वामस्तने ॥ नारदाय नमो दक्षिणकुक्षौ ॥
अनंतादिभ्यो नागेभ्यो नमो वामकुक्षौ ॥ वरुणाय नमो हस्तयोः ॥ मित्राय नमः पादयोः ॥ विश्वेभ्यो
देवेभ्यो नमः ऊरुमध्ये ॥ पितृभ्यो नमः जानुदेशे ॥ यक्षेभ्यो नमो जंघयोः ॥ राक्षसेभ्यो नमो गुल्फयोः

पिशाचेभ्यो नमः असुरेभ्यो नमः पादयोः ॥ वसुभ्यो नमः पादांगुलीषु ॥ विद्याधरेभ्यो नमः पार्ष्ण्योः
ग्रहेभ्यो नमः पादतलयोः ॥ गुह्यकेभ्यो नमो गुदे ॥ पूतनादिभ्यो नमो नखे ॥ गंधर्वेभ्यो नमः ओष्ठ
योः ॥ कार्त्तिकेयाय नमः गणेशाय नमः कटिपार्श्वयोः ॥ इति देवयोनिन्यासः ॥ मत्स्याय नमो
मूर्ध्नि ॥ कूर्माय नमः पादयोः ॥ वराहाय नमो जंघयोः ॥ नरसिंहाय नमो ललाटे ॥ वामनाय
नमो मुखे ॥ परशुरामाय नमो हृदि ॥ रामाय नमो बाहुषु ॥ कृष्णाय नमो नाभ्यां ॥ बुद्धाय
नमो बुद्धौ ॥ कल्किने नमो जानुदेशे ॥ केशवाय नमः शिरसि ॥ नारायणाय नमो मुखे ॥ मा
धवाय नमो ग्रीवायां ॥ गोविंदाय नमो बाह्वोः ॥ विष्णवे नमो हृदये ॥ मधुसूदनाय नमः पृष्ठे
त्रिविक्रमाय नमः कुक्ष्यां ॥ वामनाय नमो जठरे ॥ श्रीधराय नमः हृषीकेशाय नमो जंघयोः

पद्मनाभाय नमो गुल्फयोः॥ दामोदराय नमः पादयोः॥ ॥ इति मूर्त्तिन्यासः॥ अश्वमेधाय नमो मू
र्ध्नि॥ नरमेधाय नमो ललाटे॥ राजसूयाय नमो मुखे॥ गोसवाय नमः कंठे॥ द्वादशाहाय नमो
हृदि॥ अहीनेभ्यो नमो नाभौ॥ सर्वजितेभ्यो नमो कक्ष्यां॥ सर्वमेधाय नमो वामकक्ष्यां॥ अग्नि
ष्टोमाय नमो लिंगे॥ अतिरात्राय नमो वृषणयोः॥ अप्तोर्यामाय नमः ऊर्वोः॥ षोडशिने नमो
जानुनोः॥ उक्थ्याय नमो दक्षिणजंघायां॥ वाजपेयाय नमो वामजंघायां॥ अत्यग्निष्टो
माय नमो दक्षिणबाहौ॥ चातुर्मास्येभ्यो नमो वामे॥ सौत्रामण्यै नमो हस्तेषु॥ पश्विष्ट्यै नमों ८८
गुलिषु॥ दर्शाय नमः पौर्णमासाय नमः नेत्रयोः॥ सर्वेष्टिभ्यो नमो रोमकूपेषु॥ स्वाहाकारा
य नमः वषट्काराय नमः स्तनयोः॥ पंचमहायज्ञेभ्यो नमः पदांगुलीषु॥ आहवनीयाय न

मो मुखे॥ दक्षिणाग्नये नमो नाभौ॥ गार्हपत्याय नमो नाभौ॥ वेद्यै नमः उदरे॥ प्रवर्ग्याय नमो
भूषणेषु॥ स्रुवेभ्यो नमः पादयोः॥ इध्मेभ्यो नमो बाहुषु॥ दर्भेभ्यो नमः केशेषु॥ इति क्र
तुन्यासः॥ ॥ अथ मूलमंत्रन्यासः॥ आयुधन्यासः॥ शक्तिन्यासः॥ अंगन्यासः॥ इति साधार
णः सर्वत्र ते च वैष्णवमधिकृत्योच्यंते॥ तद्यथा॥ धर्माय नमो मूर्ध्नि॥ ज्ञानाय नमो हृदि॥ वैराग्या
य नमो गुह्ये॥ ऐश्वर्याय नमः पादयोः॥ खड्गाय नमः शिरसि॥ शार्ङ्गाय नमो मस्तके॥ मुशलाय न
मो दक्षिणभुजे॥ हलाय नमो वामे॥ चक्राय नमो नाभ्यां॥ जठरे पृष्ठे च॥ शंखाय नमो लिंगे
वृषणे च॥ गदायै नमो जंघयोः॥ जानुनोश्च॥ पद्माय नमो गुल्फयोश्च॥ पादयोश्च॥ इत्यायुध
न्यासः॥ ॥ लक्ष्म्यै नमो ललाटे॥ सरस्वत्यै नमो मुखे॥ रत्यै नमो गुह्ये॥ प्रीत्यै नमः कंठे॥ कीर्त्यै न

मो दिक्षु ॥ शांत्यै नमो हृदये ॥ तुष्ट्यै नमो जठरे ॥ पुष्ट्यै नमः सर्वत्र ॥ इति शक्तिन्यासः ॥ मूलमंत्रस्य
हृदयं हृदये ॥ शिरः शिरसि ॥ शिखा शिखायां ॥ कवचं सर्वत्र ॥ नेत्रं नेत्रयोः ॥ करयोरस्त्रं ॥ दक्षिण
वामस्तनयोः ॥ श्रीवत्साय नमः ॥ उरसि कौस्तुभाय नमः ॥ कंठे वनमालायै नमः ॥ इत्यंगन्या
सः ॥ ॐ पादयोः ॥ नं जानुनोः ॥ मों गुह्ये ॥ नं नाभ्यां ॥ गं हृदये ॥ वं कंठे ॥ तें मुखे ॥ वां नेत्रयोः ॥ सुं ल
लाटे ॥ दें शिरसि ॥ वां दक्षिणपार्श्वे ॥ यं उदरे ॥ इति द्वादशाक्षरन्यासः ॥ इति चत्वारो न्यासः ॥ अ
थ प्रतिमायां जीवन्यासः ॥ तत्र नासारंध्रस्थानां द्वाभ्यां वरस्वनादाकुंचनप्रकारेण नाभिचक्रे ८९
तेजश्चानीय तत्तेजो हृत्पद्मानीय हृत्पद्मात्पंचतन्मात्ररूपेतं ऐश्वर्यादिगुणयुक्तं स्फुरद्र
श्मिसंकाशं मूर्धवक्त्रत्रयेनैव स्वदेहध्यानेन वाममनाड्या निःसार्य ब्रह्मरंध्रेण प्रतिमा

यां प्रविशच्चिंतयेत् ॥ तत्र ललाटे किंचित्स्थिरं कृत्वा घंटिकाद्वारमानयेत् ॥ तत्र स्थिरीकृत्य
तस्मात्तेजसी चक्षुरादीनि बुद्धींद्रियाणि वागादीनि कर्मेंद्रियाणि मनः सहितानि यथास्था
नं प्रविशंतीति चिंतयेत् ॥ पादांगुष्ठानि नासिकांतं प्राणं निवेशयेत् ॥ पादादिघंटिकांतम
पानं ॥ शरीरव्यापकत्वेन व्यापनं ॥ नाभौ हृदये शमानं ॥ सुषुम्णाब्रह्मरंध्रेण उदानं ॥ हृत्
पद्मदलाष्टकं ॥ तन्मध्ये कर्णिकायां व्यापिने पुरुषं प्रणवेन न्यसेत् ॥ ॐ मं जीवात्मने नमः
ॐ नं प्राणात्मने नमः ॥ शरीरव्यापकं न्यसेत् ॥ ॐ विं बुध्यात्मने नमः ॥ ॐ फं अहंकारात्मनेन
मः ॥ ॐ पं मन आत्मने नमः ॥ हृदये ॥ ॐ नं शब्दतन्मात्रात्मने नमः ॥ शिरसि ॥ ॐ धं स्पर्शतन्मा
त्रात्मने नमो वक्त्रे ॥ ॐ दं रूपतन्मात्रात्मने नमो हृदये ॥ ॐ थं रसतन्मात्रात्मने नमो हस्त

योः॥ ॐ तं गंधतन्मात्रात्मनेनमः पादयोः॥ ॐ लं श्रोत्रात्मनेनमः श्रोत्रयोः॥ ॐ ढं त्वगात्मनेन
मस्त्वचि॥ ॐ डं चक्षुरात्मनेनमः चक्षुषोः॥ ॐ ठं जिह्वात्मनेनमो जिह्वायां॥ ॐ टं घ्राणात्मने
नमो घ्राणे॥ ॐ ञं वागात्मनेनमो वाचि॥ ॐ रुं पाण्यात्मनेनमः पाण्योः॥ ॐ जं पादात्मनेनमः पा
दयोः॥ ॐ छं पाय्वात्मनेनमः पायोः॥ ॐ चं उपस्थात्मनेनमः उपस्थे॥ ॐ ङं पृथिव्यात्मनेनमः
पादयोः॥ ॐ घं अपात्मनेनमः वस्तौ॥ ॐ गं तेजआत्मनेनमो हृदये॥ ॐ खं प्राणात्मनेनमो
प्राणे॥ ॐ कं आकाशात्मनेनमः शिरसि॥ ॐ शं पुंडरीकायनमो हृदये॥ ॐ षं सूर्यात्मनेनमो
हृत्पुंडरीकमध्ये॥ ॐ सं सोमायनमस्तन्मध्ये॥ ॐ वं ब्रह्मात्मनेनमस्तन्मध्ये॥ ततो वं बीजेन स्वाभि
मतमूर्त्तिस्वमंत्रेण संयोज्यं॥ ॐ पुरुषात्मनेनमइति पुरुषभावमानिय ध्यात्वा॥ ॐ पं परायस

र्वात्मनेनमइति सर्वसाक्षिणं भावयित्वा॥ ॐ गं सर्वात्मनेनमइति सर्वतोमुखं॥ ॐ वं अनुग्र
हात्मनेनमइत्यनुग्रहकारकं॥ ॐ सर्वसंहृत्यात्मनेनमइति सर्वसंहृतिकारकं॥ ॐ जं स
र्वसंहरणात्मनेनमइति सर्वसंहरात्मकं॥ ॐ ठं कोपात्मनेनमइति सर्वसंयमकारकं
क्रमेण ध्यात्वा सेश्वरं तत्त्वत्रयन्यासः कर्त्तव्यः॥ तद्यथा॥ ॐ आत्मतत्त्वायनमः॥ ॐ आत्मत
त्त्वाधिपतये ब्रह्मणे नमः पादयोः॥ ॐ विद्यातत्त्वायनमः विद्यातत्त्वाधिपतये विष्णवे नमः हृ
दये॥ ॐ शिवतत्त्वायनमः शिवतत्त्वाधिपतये रुद्रायनमः शिरसि॥ ॥ इति श्रीत्रितत्त्वन्यासः॥
पृथिवीतत्त्वायनमः पादयोः॥ अपस्तत्त्वायनमो बस्तौ॥ तेजस्तत्त्वायनमो हृदये॥ वायुस्त
त्त्वायनमो घ्राणे॥ आकाशतत्त्वायनमः गंधतत्त्वायनमः पादयोः॥ रसतत्त्वायनमो बस्तौ

रूपतत्वायनमोहृदये।।स्पर्शतत्वायनमस्त्वचि।।शब्दतत्वायनमःशिरसि।।घ्राणतत्वायन
मोघ्राणे।।जिह्वातत्वायनमोजिह्वायां।।चक्षुतत्वायनमःचक्षुषोः।।त्वकतत्वायनमोत्व
क्षु।।रूपतत्वायनमोहृदये।।स्पर्शतत्वायनमस्त्वचि।।शब्दतत्वायनमःशिरसि।।घ्राण
तत्वायनमोघ्राणे।।जिह्वातत्वायनमोजिह्वायां।।चक्षुतत्वायनमःचक्षुषोः।।त्वकतत्
वायनमस्त्वकर्मणी।।श्रोत्रतत्वायनमःकर्णयोः।।पायुतत्वायनमोपायौ।।उपस्थ
त्वायनमःउपस्थे।।हस्ततत्वायनमोहस्तयोः।।पादतत्वायनमःपादयोः।।वाकतत्वाय ६१
नमोवाची।।मनस्तत्वायनमोहृदि।।बुद्धितत्वायनमः।।अहंकारतत्वायनमः।।सत्वाय
नमः।।रजसेनमः।।तमसेनमः।।पुरुषतत्वायनमःहृदये।।रागतत्वायनमः।।विद्यातत्वा

यनमः।।कलातत्वायनमः।।कालतत्वायनमः।।मायातत्वायनमः।।ईश्वरतत्वायनमः।।सदाशि
वतत्वायनमः।।शक्तितत्वायनमः।।शिवतत्वायनमः।।इतिषोडशन्यासः।।अथगायत्रीन्यासः
सूर्यस्यतत्पादांगुष्ठयोः।।सगुल्फयोः।।विजंघयो।।तुर्जान्वोः।।वऊर्वोः।।रेगुह्ये।।णिवृषणयोः
यंकटिदेशे।।भनाभौ।।र्गोजठरे।।देस्तनयोः।।वहृदये।।स्यकंठे।।धीवदने।।मतालुमध्ये।।हिना
सिकाग्रे।।धीचक्षुषोः।।योभ्रूमध्ये।।योललाटे।।नःपूर्वदिशि।।प्रदक्षिणदिशि।।चोपश्चिमदि
शि।।दउत्तरदिशि।।यात्मूर्ध्नि।।तत्सर्वत्र।।तत्सवितुर्हृदये।।वरेण्यंशिरसि।।भर्गोदेवशिखा
यां।।स्यधीमहीकवचे।।धियोयोनःनेत्रयोः।।प्रचोदयात्अस्त्रे।।इतिगायत्रीन्यासः।।अथमं
त्रन्यासः।।अग्निमीळइतिपादयोः।।इषेत्वेतिसव्योगुल्फयोः।।अग्नआयाहीतिजंघयोः

शन्नो देवीति जानुनोः ॥ बृहद्रथंतरे ऊर्वोः ॥ स्वस्तिन इति जठरे ॥ दीर्घायुत्वायेति हृदये ॥ श्रीश्च
ते इति कंठे ॥ त्रातारमिति वक्त्रे ॥ त्र्यंबकमिति स्तनयोः ॥ नेत्रयोश्च ॥ मूर्धानमिति शिरसि ॥ ॥
इति साधारणो न्यासो वैकल्पिकश्च ॥ ॥ अथ नारायणस्य मूर्तिन्यासः ॥ ॐ केशवाय नमः
शिरसि ॥ ॐ नारायणाय नमो मुखे ॥ ॐ माधवाय नमो ग्रीवायां ॥ ॐ गोविंदाय नमः कंठे ॥
ॐ विष्णवे नमः पृष्ठे ॥ ॐ मधुसूदनाय नमः कुक्षौ ॥ ॐ त्रिविक्रमाय नमः कट्यां ॥ ॐ वामना
य नमो जंघयोः ॥ ॐ श्रीधराय नमो वामगुल्फे ॥ ॐ हृषीकेशाय नमो दक्षिणे ॥ ॐ पद्मना १६
भाय नमः वामपादे ॥ ॐ दामोदराय नमो दक्षिणे ॥ इति नारायणस्य द्वादशाक्षरेण मू
र्तिन्यासः ॥ अथाष्टांगविष्णुमंत्रन्यासः ॥ ॐ ॐ हृदयाय नमः हृदये ॥ ॐ विष्णवे नमः

शिरसि ॥ ब्रह्मण्याय नमः शिखायां ॥ ध्रुवाय नमः कवचे ॥ चक्रिणे नमः अस्त्राय फट् ॥ अस्त्रं
हस्तयोः ॥ ॐ नवाय नमो गायत्रीं दक्षिणनेत्रे ॥ विजयाय नमः सावित्रीं वामनेत्रे ॥ चक्रिणे च
क्रिरूपाय नमः पिंगलास्त्रं दिक्षु ॥ इत्यष्टांगविष्णुमंत्रन्यासः ॥ अथ पुरुषसूक्तन्यासः ॥
सहस्रशीर्षेति पादयोर्न्यसेत् ॥ पुरुष एवेति जंघयोः ॥ एतावानिति जानुनोः ॥ त्रिपादूर्ध्व
इत्यूर्वोः ॥ तस्माद्विराडिति वृषणे ॥ तस्माद्यज्ञेति कट्यां ॥ तस्माद्यज्ञादिति नाभ्यां ॥ तस्मा
दश्वा इति हृदये ॥ तं यज्ञमिति स्तनयोः ॥ यत्पुरुषमिति बाह्वोः ॥ ब्राह्मणोस्येति गले ॥ चं
द्रमा मनस इति मुखे ॥ नाभ्या आसीदिति नासायां ॥ यत्पुरुषेणेति चक्षुषोः ॥ सप्तास्ये
ति कर्णयोः ॥ यज्ञेन यज्ञमिति शिरसि ॥ ॥ इति पुरुषसूक्तन्यासः ॥ अथ उत्तरनारायणन्या

सः॥ अग्निःसंभृतइतिहृदये॥ वेदाहमितिशिरसि॥ प्रजापतिरितिशिखायां॥ योदेवेभ्यइ
तिकवचे॥ रुचंब्राह्मंइतिनेत्रयोः॥ श्रीश्चतइत्यस्त्रे॥ इत्युत्तरनारायणन्यासः॥ अथशिव
स्यपंचब्रह्मन्यासः॥ तद्यथा॥ अंगुष्ठयोरीशानंतर्जन्योस्तत्पुरुषं॥ मध्यमयोरघोरं॥ अनामि
कयोर्वामदेवं॥ कनिष्ठयोःसद्योजातं॥ ततःकनिष्ठयोःहृदयं॥ अनामिकयोःशिरःसि॥
मध्यमयोःशिखा॥ तर्जन्योःकवचं॥ अंगुष्ठयोरस्त्रंविन्यस्यपरेणतेजसासंयोज्यकवचेना
वगुंठ्यसर्वकर्मसुनियोजयेत्॥ सर्वत्राचमनं॥ अनेनविधिनादेवस्यकरन्यासंविधायलिं ९२
गमुद्रांबध्वा॥ ॐईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिब्रह्म
शिवोमेअस्तुसदाशिवोंइतिईशानमुद्रांबध्वा॥ अंगुल्यग्रेरुद्रमुद्रयामूर्ध्नि॥ ॐतत्पुरुषाय

विद्महेमहादेवायधीमहि॥ तन्नोरुद्रःप्रचोदयात्॥ तथैवतत्पुरुषंतर्जन्यंगुष्ठयोगात्तत्पुरुषंमु
खे॥ ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यःइति
मध्यमांगुष्ठयोगेनहृद्यघोरं॥ ॐवामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकाला
यनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूत
दमनायनमोमनोन्मनायनमः॥ इतिअंगुष्ठानामिकायोगेनवामदेवंगुह्ये॥ ॐसद्योजातं
प्रपद्यामिसद्योजातायवैनमोनमः॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः॥ इतिक
निष्ठांगुष्ठयोगेनपादावारभ्यमस्तकांतंयावत्शरीरव्यापकत्वेनमूर्ध्निन्यस्तंसद्योजातमिति
ब्रह्मांगन्याविन्यस्यऊर्ध्वपूर्वदक्षिणोत्तरपश्चिमवक्त्रेषुवक्त्रंमन्यात ततोनमःकलान्यंन्यासे

शानःसर्वविद्यानांनमइतिशशिनींमूर्ध्नि॥ईश्वरःसर्वभूतानांब्रह्माधिपतिनयदांपूर्वमूर्ध्नि॥
ईतिकल्पितंचंडोर्वब्रह्मणोधिपतिर्ब्रह्मानमइतिईष्टांदक्षिणमूर्ध्नि॥शिवोमेअस्तुनमइति
मरीचिंउत्तरमूर्ध्नि॥सदाशिवोंनमइतिज्वालिनींपश्चिममूर्ध्नि॥एवमीशानस्यकलापंचकं
॥तत्पुरुषायविद्महेनमइतिशांतिंपूर्ववक्त्रे॥महादेवायधीमहीतिविद्यांदक्षिणवक्त्रे॥तन्नोरु
द्रइतिप्रतिष्ठामुत्तरवक्त्रे॥प्रचोदयादितिनिवृत्तिंपश्चिमवक्त्रे॥ईतितत्पुरुषकलाश्चतस्रः
अघोरेभ्योनमइतितमांहृदये॥अथघोरेभ्योनमइतिमोहायैग्रीवायां॥घोरह्ममायैस्कंधयोः ९४
घोरतरेभ्योरक्षायैनाभौ॥सर्वेभ्यःनिद्रायैकुक्षौ॥सर्वसर्वेभ्योमायायैपृष्ठे॥इत्यघोरकलाष्टकं
॥वामदेवायनमइतिरजांगुह्ये॥ज्येष्ठायनमइतिरक्षांलिंगे॥श्रेष्ठायनमइतिरतिंदक्षिणोरौ

रुद्रायनमइतिपाल्यांवामोरौ॥कालायनमइतिकामांदक्षिणजानुनी॥कलवीकरणायनमइति
संजीविनींवामजानौ॥बलविकरणायैप्रियायैदक्षिणजंघायां॥बलायबुध्यैवामजंघायां॥बलस्था
यायैदक्षिणस्फिजि॥प्रमथनायधात्रींवामस्फिजि॥सर्वभूतदमनायनमइतिभ्रामणींकक्ष्यां॥म
नोनमइतिशोषणींदक्षिणपार्श्वे॥उन्मनायनमइतिज्वरांवामपार्श्वे॥इतित्रयोदशकलाः॥सद्यो
जातंप्रपद्यामिनमइतिसिद्धिंदक्षिणपादे॥सद्योजातायवैनमइतिवामपादे॥भवेनमइतिदितिं
दक्षिणपाणौ॥अभवेनमइतिलक्ष्मींवामपाणौ॥नातिभवेनमइतिमेधांनासायां॥भवस्वमांन
मइतिकांतिंशिरसि॥भवनमइतिस्वधांदक्षिणबाहौ॥उद्भवायनमइतिप्रभांवामबाहौ॥ ॥
इतिसद्योजातकलाष्टकं॥ ॥इतिस्वस्वमुद्रयाशशिन्याद्यष्टत्रिंशत्कलान्यासंविधायविद्यादे

वंहंसंसंपाद्यहंसहंसेतिहृदयादिन्यासंकायत्॥ अथनृसिंहो॥ ॐनृसिंहउग्ररूपज्वलप्रज्वलप्रज्वल
स्वाहाइतिमंत्रः॥ नारसिंहीयदारक्षाथात्वधिवास्यानिशामगा॥ कृत्विमंवायसाचाद्दापश्चंदत्वाबलिं
हरेत्॥ एवंन्यासंकृत्वानिद्रामावाहयेत्॥ परमेष्टिनंनमस्कृत्यनिद्रामावाहयाम्यहं॥ मोहिनीस
र्वभूतानांमनोविभ्रमकारिणी॥ विरूपाक्षेशिवेशांतेआगच्छत्वंचमोहिनि॥ वासुदेवहितेकृत्ले
कृष्णांबरविभूषिते॥ आगच्छसहसाजन्स्तंस्तुतसंसारमोहनि॥ सुषुप्स्वसंहरेदेविकुमार्येकांत
मानसे॥ श्रमनिश्वासबाल्बेआगच्छभुवनेश्वरि॥ तमःसत्वरजोपेतेआगच्छत्वरचारिणि॥ म ९५
नोबुद्धिरहंकारसंहारस्त्वंसुरस्वति॥ शब्दस्पर्शश्चरूपंचरसोगंधश्चपंचमः॥ आगच्छशुद्धसंहि
यमोहपाशनिबंधिनि॥ भवस्योत्पत्तिहेतुर्भूस्त्वंयावदाभूतसंप्लवं॥ भुवःकल्यांतसंध्यायांवस

सेत्वंचराचरे॥ भोगिशय्यासुसुप्तस्यवासुदेवस्यशासने॥ त्वंप्रतिष्ठासिवैदेविसुनियानिसमुत्थिते
पितृदेवमनुष्याणांसयक्षोरगराक्षसां॥ पशुपक्षिमृगाणांचयोगमायाविवर्धिनी॥ वससेसर्वसि
त्वेषुमात्तेवहित्तकारिणी॥ एहिसंधिस्त्रिमूर्तिस्त्वंचक्षुन्यंस्थानगोचरे॥ विशनासापुटेदेविकं
ठेचोत्कंठिताविश॥ प्रतिनावयमांसर्वंमात्ववंदेविसुंदरी॥ इदमर्घ्यंमयादत्तंपूजेयंप्रतिगृह्यतां
उपघागादितिमंत्रोयंतस्याःपूजाविधेःस्मृतः॥ निद्राकलशोनिद्रांपूजयित्वालोकपालमातृके
देवं २ त्रपालभूतेभ्योबलिंदत्वास्थार्यमंडलेपूजयेत्॥ विष्णुश्चक्रद्वादशारचक्रे॥ तन्मध्येष्टदलेचक्रेमूल
मंत्रेणदेवंनिवेशयेत्॥ ॐहृंहृदयायनमइतिकर्णिकायांमध्येहृदयंपूजयेत्॥ विष्णवेनमइति
शिरःपूर्वपत्रे॥ ब्रह्मण्यायनमइतिशिखावायोदक्षिणे॥ ध्रुवायनमःकवचंपश्चिमे॥ चक्रिणेनमःफट्

अस्त्रमुत्तरे। शंभवायनमः इति गायत्रीमाग्नेये। विजयायनमः सावित्रीमीशानदले ज्योतिरूपायन
मो नैरृत्ये। चक्रिरूपायनमः पिंगलास्त्रं वायव्ये॥ इति गर्भविवरणं। ॥ आरासुपूर्वादिक्रमेणाकेश
वाद्याद्वादशमूर्त्तिं पूजयेत्॥ इति द्वितीयावरणं। शंखादितः षङ्गायनमः। गदायैनमः। चक्रायैनमः। शां
खायनमः। पद्मायनमः। हलायनमः। मुशलायनमः। शार्ङ्गायनमः इति तृतीयावरणं। एतैरेवमंत्रैर्वि
न्यस्य गंधादिना पूजनं। अथ मूर्त्तीशाः शैववैष्णवादेरन्यत्रेत्या। पृथिवीमूर्त्तयेनमः। पृथिवीमूर्त्त्यधी
पतये शर्वायनमः। अग्निमूर्त्तयेनमः। अग्निमूर्त्त्यधिपतये पशुपतयेनमः। यजमानमूर्त्तयेनमः। य ९६
जमानमूर्त्त्यधिपतये महादेवायनमः। खमूर्त्तयेनमः। खमूर्त्त्यधिपतये भीमायनमः। इति मूर्त्तीर्मू
र्त्तिपांश्च संपूजयेत्॥ ॥ अथ वैष्णवे पंचैव मूर्त्तय इति चेत्तदा शंखादिमध्यांतं पृथिवीमूर्त्तयेनमः। पृ

थिवीमूर्त्त्यधिपतये वासुदेवायनमः। जलमूर्त्तयेनमः। जलमूर्त्त्यधिपतये शंकर्षणायनमः। अग्नि
मूर्त्तयेनमः। अग्निमूर्त्त्यधिपतये प्रद्युम्नायनमः। वायुमूर्त्तयेनमः। वायुमूर्त्त्यधिपतये अनिरुद्धायनमः
खमूर्त्तयेनमः। खमूर्त्त्यधिपतये नारायणायनमः। ॥ शैवे पंचमूर्त्तिपक्षे मूर्त्तिपा ब्रह्मविष्णुरुद्रेश्वरस
दाशिवाः। लोकपालाश्च सर्वत्र पूजनीयाः। एवं मंडले पूजां निर्वर्त्य आचार्य कुंडांतिकमागत्य हिरण्य
गर्भ इति मंत्रेण यथाक्रमं पलाशोदुंबराश्वत्थ अपामार्ग शमी समिधां प्रत्येकं द्वादशसहस्राणि षट्
सहस्राणि त्री एयष्टसहस्रं अष्टशतं वा संख्याय शांतिके पौष्टिके मंत्रैर्यथाविभागं कुर्याद्दाचा
र्यः कृत्विक्सहितो वा। शन्नोवातः। शन्न इन्द्राग्नी। शन्नोदेवीरिति शांतिकामंत्रैः। पुष्टिर्नरएवाः। ग
यस्फानः। त्र्यंबकमिति पौष्टिकाः। ॥ अथ पूर्वकुंडे अग्निमीळ इति पलाशसमिधामष्टसहस्रमष्ट

सहस्रमष्टशतंवातिलैर्वामूर्त्तिपाःकुर्युः॥ईषेत्वेतिदक्षिणे॥अग्नआयाहीतिपश्चिमे॥शन्नोदेवी
रित्युत्तरे॥यदाष्टौकुंडानितदाप्रणवैर्नवौषडंतैर्नाग्नेयकुंडे॥गायत्र्यादशप्रणवयुक्तयानैर्ऋते॥गा
तवेदसइतिवायव्ये॥नमोब्रह्मणेनमइतिईशानकुंडे॥सहस्रांतेशतांतेवापूर्णाहुतिंमूर्त्तिपाःकुर्याद्
तद्यथा॥अन्येनस्रुचमाज्यपूर्णांपुष्करोपरिअधोमुखंस्रुवंकृत्वातदग्रेपुष्करंदत्वावामदक्षिणहस्ता
भ्यांसंहतौन्यांशंखवत्संलग्नौतौउभौसमादायसमपादःसमुत्थायोर्ध्वकायोनान्यातिर्यग्विषम
यस्रुगग्रेदत्तदृष्टिर्मूर्द्ध्नादिवइतिमंत्रमुच्चार्यवामस्तनांतंस्रुग्मूलमानीयआनुदिग्नोयवप्रमा ७
णधारयासमस्तमाज्यंवह्निंप्रापयेत्॥यांचयथाभवतीतिपूर्णाहुतिंसर्वत्रदद्यादिति॥आहु
तिसंपातंशांतिकलशेकुंडसमीपस्थेचनयेदिति॥अष्टसुपूर्वादिकुंडेष्वष्टानांमूर्तीनांमूर्त्ति

पानांलोकपालानांचैकैकंतत्तन्मंत्रेणचिन्त्यस्याभ्यर्चिताभ्योदेवताभ्यःप्रतिदैवतमष्टसहस्रमष्टशतंवा
खदिरपलाशोदुंबरप्लक्षवटापामार्गाश्वत्थशमीसमिद्भिर्घृतेनतिलैर्वामूर्त्तिपाहोमंकुर्युः॥सहस्रांते
शतांतेवापूर्णवत्पूर्णाहुतिंदद्युः॥तेषांमंत्राः॥स्योनापृथिवीतिपृथिवीमूर्त्तेः॥अघोरेभ्यइतिपृथि
वीमूर्त्तिपतेःशार्वस्य॥इन्द्रायेंदोइतीन्द्रस्य॥अग्निंदूतमित्यग्निमूर्त्तेः॥यःपशूनामित्यग्निमूर्त्तिपतेः
पशुपतये॥अग्नआयाहीत्यग्नेः॥यआसीहिवीरेतियजमानमूर्त्तेः॥तमिंद्रंजोहवीमीतियजमा
नमूर्त्तिपतेरुग्रस्य॥यमायसोममितिसोमस्य॥उदुत्यमितिसूर्यमूर्त्तेः॥आवोराजानमितिसूर्य
मूर्त्तिपतेरुद्रस्य॥अस्तुन्वस्यमितिनैर्ऋतस्य॥आपोहिष्ठेतिजलमूर्त्तेः॥विभूषन्नितिजलमूर्त्ति
पतेर्भवस्य॥इमंमेइतिवरुणस्य॥वातआवात्वितिवायुमूर्त्तेः॥तमीशानमितिवायुमूर्त्तिपतेरी

शानस्य॥ आयोनियुद्भिरितिवायोः॥ वयंसोमेतिसोममूर्त्तेः॥ इदंतंसुनेतिसोममूर्त्तिपतेर्महादेवस्य॥ अ
भित्वंदेवमितिकुबेरस्य॥ आदित्यत्नस्येतिखमूर्त्तेः॥ म्हगोनभीमइतिखमूर्त्तिपतेर्भीमस्य॥ अनित्वा
देवसवितरितिशानस्य॥ महाव्याहृतिभिश्चतिलैर्यवैर्व्रीह्याज्यसंयुक्तैरग्न्येनचरुणा च॥ अथाचर्यः
स्थाप्यदेवलिंगकेनमंत्रेणसहस्रसंख्याकमष्टोत्तरशतसंख्याकंवाघृतेनतिलैर्वाहोमंविधायपूर्णां
दत्वादेवस्यदक्षिणकरेहोमंनिवेश्यप्रपूर्वकुंडेघृतस्याष्टाकृतिर्मूलमंत्रेणकृत्वादेवस्यपादौस्पृ
शेत्॥ याम्यकुंडेहस्तेनदधिकृत्वादेवस्यनाभिं॥ वारुणकुंडेक्षीरंकृत्वादेवस्यहृदयं॥ सौम्यकुंडेमधु
नाष्टाहुतीःकृत्वादेवस्यमूर्द्धानं॥ वारुणकुंडेघृतादिचतुष्टयंमेलयित्वाहुत्वातेनैवद्रव्यजातेनपू
र्णाहुतिंकृत्वादेवस्यसर्वांगंस्पृशेत्॥ एवंप्रतिमान्यासादिकंकृत्वानुप्रतिमाजातंकूर्मशिला

ब्रह्मशिलापिंडिकावाहनादिचानीयतत्तन्मंत्रेणवाह्यपरिवारदेवांश्चप्रतिमायाःवामपार्श्वेतानिस
वीण्यधिवासयेत्॥ तानिमधुघृतेनाभ्यज्यशुद्धवारिणाप्रक्षाल्यस्नपनशेषवारिणाउक्तेनकुंभविधा
नेनप्रतिमावत्स्नापयित्वागंधपुष्पाद्यैःपूजयित्वावस्त्रेणाच्छाद्यप्रधानप्रतिमापिंडिकायाःस्वमंत्र
ॐ न्यासंकुर्यात्स्थापयस्तदा॥ ॐ घं टं फ्रं क्ष्मैं नमः॥ एतानिपंचाक्षराणिहृच्छिरःशिखाकवचनेत्रसं
ज्ञकानिकुंफडंतोवासमुदायइतिपिंडिकायांपंचांगानिन्यस्यतत्रत्रयमूर्त्तिमूर्त्तिपांश्चपूर्ववद्विन्
यसेत्॥ तदान्यांमंत्राभ्यांअधिवासयेत्॥ ॐ ह्रीं श्रीं क्लीं कः परबलेणसर्वारोधायनमः॥ ॐ ह्रीं श्रीं क्लीं
दिव्यतेजोधारिणिसुभगेनमइति॥ अथप्रासादेपिनूतनश्चेत्तस्यापिअस्मिन्नवसरेअधिवासय
त॥ तद्यथा॥ पंचगव्याद्यानीयायतनकारीतिपदमस्तैःकृत्वातेषुपदेषुसप्तधान्यपुंजान्कृत्वाव

रिपूरस्तीनिकाशीतिकलशानाहृत्यतत्रतत्रनवनवकानांमध्यमंमध्यमंकोष्ठंज्ञात्वातेषुनवकलशान्
मध्यपूर्वादिक्रमेणाग्निप्रेतिविंन्यसेत् ।तत्रशम्युडुंबराश्वत्थचंपकाशोकपलाशमाम्रन्यग्रोधदंबाम्र
बिल्वार्जुनतरुसंभवपल्लवद्वादशकंसोमायवनस्पत्यंतउतायनमइतिमध्यकुंभेनिक्षिपेत् ।ततः
पद्मकरोचनादूर्वांकुरदभींपेंजलश्वेतसर्षपसीतरक्तचंदनजातिकुसुमकुंदनंद्यावर्त्तमितिदशकं
पूर्वे ।यवव्रीहितिलसुवर्णरजतसमुद्रगामिनीनदीकूलमृत्तिकान्मध्यसंस्थगोमयमितिसप्तक
माग्नेय्ये ।सहदेवीविष्णुक्रांतानंगराजमहौषधीशमीपंगाशतावरीगुडूचीश्यामाकमित्यष्टकंया ९९
म्ये ।कदलीफलनारिकेलबिल्वनारिंगमातुलिंगबदरामलकचूतमितिफलाष्टकंनैर्ऋते ।मंत्र
साधितंपंचगव्यंवारुणे ।शम्युडुंबराश्वत्थन्यग्रोधपलाशादिकषायपंचकंवायव्ये ।शंखपुष्पीसह

देवीबलाशतावरीकुमारीगडूचीवचाव्याघ्रीतिमंगल्यमूलाष्टकंसौम्ये ।वल्मीकादिसप्तमृत्तिकाईशा
नकुंभेनिक्षिप्यहिरण्यवर्णांहरिणीमितिकुंभानृचाभिमंत्र्यशेषान्गंधोदकपूरितान्मध्यमादिक
लशानासमंतात्पूर्वादिक्रमेणाष्टावष्टौविन्यस्यमूलमंत्रेणाभिमंत्र्यसूत्रेणावेष्ट्यांतर्बहिरधस्तादू
र्ध्वंचप्रासादंपंचगव्येनसंप्रोक्ष्य ।मूर्द्धानंदिवइतिवल्मीकमृदा ।विलिप्यसमुद्रज्येष्ठाईतीईशानदि
कस्थेनमृत्तिकाकुंभेनस्नपयेत् ।यज्ञायज्ञेतिवायव्यस्थेनकषायकुंभेनपयःपृथिव्यामितिवारुणस्थे
नपंचगव्यकुंभेन ।याःफलिनीरितिनैर्ऋतफलकुंभेन ।हंसःशुचिषदितिसौम्यस्थमूलकुंभेन ।विष्णो
रराटमितिपूर्वकुंभेन ।सोमंराजानमितिवह्निस्थकुंभेन ।विश्वतश्चक्षुरितियाम्यकुंभेन ।नमोस्तु
सर्पेभ्यइतिमध्यमकुंभेन ।इदमापःप्रवहतेत्यष्टाभिःपूर्वादिक्रमेणप्रासादंसशिखरंस्नपयेत् ।तत्र

थैकाशीतिकलशानामसंभवस्तदादेव्यायकर्मणोऽर्घ्यमितिगंधोदपूरितेनैककलशेनसंप्रोक्ष्यास्त्र
त्रेणावेष्ट्यस्नापयित्वादेवस्वरूपंप्रासादंध्यात्वापताकाध्वजैःसमंतात्शोभयित्वागंधाद्यैःपूजयित्वा
सर्वदेवमयंवास्तुपुरुषंसर्वाधारंतस्याधस्तात्देवंसंचिंत्यपूज्यमंत्रेणप्रासादमधिवासयेत्॥ तद्य
था॥ ॐ ह्रीं सर्वदेवमयाचिंत्यसर्वरत्नोज्वलाकृते॥ यावच्चंद्रश्चसूर्यश्चतावदत्रस्थिरोभवइत्यधिवा
स्य॥ पिंडिकावाहनपरिवारपरिवारदेवतानांतत्तन्मंत्रैरष्टाविंशतिसंख्याकंहोमंप्रत्येकंतिलैःक
त्वामूलमंत्रेणचरुणाष्टोत्तरशतंकृत्वागंगायमुनागोदावरीसरस्वत्याश्चतस्रोधेनुर्मंडपस्यद १००
क्षिणद्वारेउदङ्मुखीःस्थापयित्वासंपूज्यविष्णुगायत्र्याऽऽध्यातत्क्षीरेणरुद्रगायत्र्याचरुंश्रप
यित्वातथैवदेवायनिवेद्यमंडपस्योत्तरभागेचादशब्राह्मणान्विष्णुभक्तांस्तत्पायसेनभोजयेत्॥
न

विष्णुर्मेप्रीयतामित्यन्यात्र॥ अथाचार्यायगौस्त्रौधेनुर्दद्यादृत्विग्भ्योवस्त्रांगुलीयकादिदत्वाचाथरा
त्रौजागरणंगीतवादित्रप्रेक्षणीयादिनाकुर्यादितिप्रासादाधिवासनं॥ ॥अथज्येष्टमध्यमकनि
ष्टानांप्रतिमानांसप्तरात्रंपंचरात्रंत्रिरात्रमेकरात्रंसद्योवाबल्यंतमधिवासनंविदध्यात्॥ अने
कदिननिर्वर्त्ये अधिवासनकर्माणि॥ होमानष्टोसहस्राणिविदधीरंपृथक्पृथक्॥ तस्मिन्नेकाहनिर्व
र्त्येक्रियदिष्टोत्तरंशतं॥ देशिकोमूर्तिपैःकुर्याद्यावत्कार्यंसमाप्यते॥ संध्यासुतिसृषुदेयोबलिर्मंत्रैर्य
थोदितैः॥ आचार्यदक्षिणांदद्यादृत्विग्भ्यश्चस्वशक्तितः॥ भोजनंचततोन्येभ्योदेयंवित्तानुसारतः॥
विनाधिवासनंयस्तुकृतोपिनफलप्रदः॥ ॥इतिसर्वदेवप्रासादाधिवासनविधिः॥ ॥अथाधिवा
सनानंतरंप्रातराचार्यःस्नात्वानैत्यकंकर्मनिर्वर्त्ययागमंडपमेत्यमूर्तिपान्वितोद्वारस्थान्देवा

न्पूर्ववत्संपूज्यपश्चिमद्वारेणमंडपंप्रविश्यवास्तुमंडलयोर्देवान्संपूज्य॥अथकुंडमागत्यमूलमंत्रेण
मूर्त्तिमूर्त्तिपतिलोकपालमंत्रैश्चपतिदैवतम्अष्टशतंपूर्णांतिंकृत्वामूर्त्तिधरैःसार्द्धंअधिवासितांकूर्म
शिलांब्रह्मशिलांपिंडिकांचआतारमितिप्रहीत्वाशांतिघोषेणप्रदक्षिणंप्रासादमानीयास्त्रमंत्रेणसंता
तीयेनवाविघ्नोत्सारणंअर्घ्यपुष्पोदकधारयाप्रदक्षिणंप्रासादगर्भमभ्युक्ष्यदर्भेणमहांइन्द्रइतिसमुल्लि
ख्यपुनरस्त्रपूतेनवारिणासर्वतःप्रोक्ष्यद्वारमध्यंगर्भमध्यंचोक्तसूत्रसंपातेनसंसाध्ययवेनयवार्द्धे
नवेशानीमुत्तरांवादिशमाश्रित्यसंस्नातांप्रणवेनकूर्मशिलांपंचरत्नोपरिनिधायतद्वक्त्रेणसौवर्णं १०१
कूर्मंद्वारसंमुखमुपधायतदुपरिरत्नानिन्यस्यषड्विंशजर्त्तयुतांपंचचत्वारिंशकृत्तियुतांवाब्रह्मशि
लामधिवासितांनिदध्यात्॥ॐनमोव्यापिनिस्थिरेअचलेध्रुवेह्रींलंस्वाहेतिमंत्रेणगंधादिनासंपूज्य॥

प्रार्थयेत्॥त्वमेवपरमाशक्तिस्त्वमेवासनधारिकाशिवास्त्वयात्वयोदेविस्थातव्यमिहसर्वदातद्यैतत्स्थैर्यं
सर्वगतंस्मरन्सकलमध्यानंतद्रूपंविचिंतयेत्॥ॐतत्वाध्वनेनमः॥पदाध्वनेनमः॥वर्णाध्वनेनमः॥मंत्राध्व
नेनमः॥भुवनाध्वनेनमः॥कलाध्वनेनमः॥पुण्याहवाचनंकृत्वामूलमंत्रेणाष्टोत्तरशतंकृत्वाब्रह्मशिला
गर्त्तेषुप्रागादिषुवास्वावरणान्संस्तुवर्णेनहस्तेनरत्नन्यासंवक्ष्यमाणमंत्रैःकुर्यात्॥अथार्चास्थापने
चक्ररहितेब्रह्मशिलोपरिसचक्रांपिंडिकांपूर्वपश्चिमाननेप्रासादेसौम्यप्राणालांदक्षिणोत्तराननेपू
र्वप्रणालांपिंडिकांध्रुवसूक्तेनतिधायदेवतायाश्रितान्मंत्रान्पिंडिकायांविन्यसेत्॥ततत्रनारायण
णश्चेतस्थाप्यःश्रीश्चतश्रीरसीश्रीनिधनंश्रीपत्यादीन्रुद्रस्तदारुद्रस्तद्रापोह्निष्ठागौरीर्मिमायज्जातवेद
सइत्यादीन्॥ब्रह्माचेज्ञायज्यादीन्॥सूर्यस्त्रिदेषोउषाउषस्तच्चित्रंप्रत्कत्रदर्शीत्यादीन्मंत्रान्विन्य

स्तत्त्वन्यासं कुर्यात्॥ आत्मतत्त्वाय नमः॥ आत्मतत्त्वाधिपत्यै क्रियाशक्त्यै नमः॥ विद्यातत्त्वाय नमः
॥ विद्यातत्त्वाधिपत्यै ज्ञानशक्त्यै नमः॥ शिवतत्त्वाय नमः॥ शिवतत्त्वाधिपत्यै इच्छाशक्त्यै नमः॥ प-
तितत्त्वं पूर्ववत्त्स्मूर्त्तिमूर्त्तिपलोकपालान्विन्यसेत्॥ अथाधारशक्त्यै नमः इति पिंडिकायां न्यासं कृत्वा
ततोनंतासनादिवह्नितत्त्वांतं पीठपूजां निर्वर्त्य आसनशाक्तीर्नवभागादिमध्यांतं निजनाममंत्रैर्वि-
न्यस्यान्यचेतऽपरि पिंडिकां शक्तिरूपिणीं सर्वाभरणभूषितां देवसंयोगगामिनीं मनसाध्यात्वादे
वनार्यालिंगकेनसूक्तेन विन्यस्य देवीं प्रार्थयेत्॥ सर्वदेवमयीशानी त्रैलोक्याह्लादकारिणी॥ त्वां प्र १०२
प तिष्ठामि यामयत्र मंदिरेस्मिन्निमिति॥ यावच्चंद्रश्च सूर्यश्च यावदेषा वसुंधरा॥ तावत्त्वं देवि देवेशि
मंदिरेस्मिन्स्थिराभव॥ पुत्रानायुष्मतो लक्ष्मी। मत्ततो मजरामृता॥ अनयं सर्वंभूतेभ्यः कर्तुर्नि

त्यं विधेहि मे॥ विजयं नृपतेः सर्वलोकानां हे ममैव च॥ सुभिक्षं सर्वकालीनं कुरु देवि नमोनमः इति॥
अथ तस्यां मातृकान्यासं कुर्यादिति॥ तद्यथा॥ पूर्णवंश्चने तदाद्यषोडशस्वरान्॥ तेषां परितो व्यंज
नानि॥ अथ पिंडिकाश्वभ्रेषु रत्नादिन्यासं पूर्वादिमध्यांतं सव्यक्रमेण कुर्यात्॥ तद्यथा॥ बाह्यपरिधौय
वव्रीहिनिष्पावप्रियंगुतिलमासनिवारमुद्गसिद्धार्थकान्॥ वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परा
गचंद्रकांतेंद्रनीलपद्मरागान्॥ मनःशिलाहरितालाभ्रकस्यामांजनकसीससौराष्ट्रीहेममाक्षीवना
गैरिकपारदान्॥ हिरण्यरजततामायसत्रपूसीसककांस्यारकूटतीक्ष्णलोहानि॥ एतन्नवकचतुष्ट
यस्यासंभवे शालिस्रुक्तिहरितालसुवर्णानि न्यासविधौप्रतिद्रव्यं योज्यानीति नारदोक्तं॥ इति मत्स्योक्त
रत्नादिन्यासं कुर्यात्॥ बाह्यपरिधिं मध्यपरिधिं चक्षाभ्यंतरतोभ्यंतरतः प्रत्येकं प्रागादिदिशानांतं तद्यथा॥ वज्रमौ-

क्तिकंवैडूर्यंशंखस्फटिकपुष्परागेंद्रनीलमहानीलान् ॥ तालकमनःशिलाभ्रकनीलांजनसौराष्ट्रीक
सीसस्वर्णमाक्षिकगैरिकान् ॥ गोधूमयवतिलमुद्गनीवारश्यामाकसर्षपव्रीहीन् ॥ ४ ॥ हिरण्यरजतता
म्रआयसत्रपुसीसकांस्यरीतिकान् ॥ ४ ॥ श्वेतचंदनरक्तचंदनागरुकागर्जुनोशीरवैलवीसहदेवीलक्ष्म
णाश्चेति ॥ ५ ॥ तत्ररत्नानामभावेवज्रं ॥ धातूनामभावेहरितालं ॥ लोहानामभावेसुवर्णं ॥ बीजानामभा
वेयवान् ॥ औषधीनामभावेसहदेवींविन्यसेदेतैर्मंत्रैः ॥ ६ ॥ इंद्रस्तुसहस्राक्षोयःसर्वदेवाधिपोमहा
न् ॥ वज्रहस्तोमहासत्वस्तस्मैनित्यंनमोनमः ॥ १ ॥ आग्नेयःपुरुषोरक्तःसर्वदेवमयोऽव्ययः ॥ धूम्रकेतु १०२
रजोध्यक्षस्तस्मैनित्यंनमोनमः ॥ २ ॥ यमश्चोत्पलवर्णाभःकिरीटीदंडधृक्सदा ॥ लोकसाक्षीविशु
द्धात्मातस्मैनित्यंनमोनमः ॥ ३ ॥ नैऋत्यस्तुपुमान्कृष्णःसर्वरक्षोधिपोमहान् ॥ खड्गहस्तोमहासत्व

स्तस्मैनित्यंनमोनमः ॥ ४ ॥ वरुणःसर्वलोकेषुपुरुषोनिम्नगाधिपः ॥ पाशहस्तोमहाबाहुस्तस्मैनित्यं
नमोनमः ॥ ५ ॥ वायुश्चसर्ववर्णोयंसर्वगंधवहःशुभः ॥ पुरुषोध्वजहस्तश्चतस्मैनित्यंनमोनमः ॥ ६ ॥ गौ
रोयस्तुपुमान्सौम्यःसर्वौषधिसमन्वितः ॥ नक्षत्राणांपतिःसोमस्तस्मैनित्यंनमोनमः ॥ ७ ॥ ईशानःपु
रुषःशुक्लःसर्वदेवाधिपोमहान् ॥ शूलहस्तोविरूपाक्षस्तस्मैनित्यंनमोनमः ॥ ८ ॥ पद्मपाणिश्चतुर्मू
र्तिर्वेदवासःपितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः ॥ ९ ॥ योसावनंतरूपेणब्रह्मांडं
सचराचरं ॥ पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः ॥ १० ॥ इतिन्यस्त्वानांरत्नादिनामालभनमेतैर्मं
त्रैर्नवभिरष्टभिर्वामंत्रक्रमेणकुर्यात् ॥ त्रातारमिंद्र ॥ अग्निंदूतमित्यग्निं ॥ यमायत्वेतियमं ॥ एषतेनि
र्ऋतेपंचनद्यःसरस्वती ॥ तववायवृतस्पते ॥ सोमंराजानं ॥ अभित्वाशूरनोनुमः ॥ ब्रह्मजज्ञानं ॥ न

मोस्तुसर्पेभ्यइतिच॥एवंरत्नादिन्यासेकृतेपृथिवीमेरुकूर्मवाहनानिसौवर्णानिद्वारेन्मुखानिपादं
चतस्मिन्श्वभ्रेनिधायगुग्गुलुरसेनरत्नादिकंस्थिरीकृत्यमधुपायसेनश्वभ्रमवलिप्यशुक्लव
स्त्रेणाच्छाद्यहूंकवचेनावगुंठ्यअस्त्रमंत्रेणसंरक्ष्यगृहंवैप्रतिष्ठेतिप्रासादमवसिंच्येंद्रस्त्वासहंसा
हिस्त्वंसहइत्यादिभिर्दशभिर्मंत्रैर्लोकपालेभ्योबलिंदत्वाचामेत्॥एवंपिंडिकांप्रतिष्ठाप्यप्रासादा
द्बहिःसमंतात्पंचगव्येनप्रासाददक्षिण्येनैवंसंप्रोक्ष्यदर्भपिंजूलैःसंमार्ज्यहोमार्थमुद्दिश्याष्टौ
स्थंडिलानिचतुरस्राणिवितस्तित्रयसंमितानिपूर्वादिदिक्षुकृत्वावारिपूर्णान्सपुष्पफलपत्रा १०४
सपल्लवान्सूत्रवेष्टितान्कलशानष्टाक्षरेणस्थंडिलानामीशानभागेषुविन्यस्याभिमंत्र्यस्थंडिले
षुपंचभूसंस्कृतमग्निंप्रणीयपालाशसमिधमाज्याक्तमूलाग्राणांप्रतिस्थंडिलमष्टोत्तरसहस्रं

तदर्धमष्टशतंवादेवस्यमूलमंत्रेणकृत्वाआज्येनविष्णुगायत्र्याअष्टोत्तरशतमष्टाविंशतिमष्टौवाकृत्वाआ
चार्यस्ताम्रपात्रेअष्टदिक्संस्थेभ्यःकुंभेभ्यस्तोयमुपसंहृत्यमूलमंत्रेणशतकृत्वोभिमंत्र्यप्रतिमासमी
पंगत्वासर्वतीर्थमयमिदंजलमितिध्यायन्देवमूर्ध्निनिक्षिपेत्॥नरसिंहेनहुंफडंतेनदेवस्यदिग्बंधं
कृत्वामूर्तिपैर्युक्तःशंखतूर्यनिनादेनदेवंप्रार्थयेत्॥उंप्रबुध्यस्वमहाभागदेवदेवजगत्पते॥मेघश्या
मगदापाणेप्रबुध्यकमलेक्षण॥प्रबुद्धभूधरानंतवासुदेवनमोस्तुते॥इति॥तोयक्षीरकुशाग्रतिलतं
डुलयवसिद्धार्थकपुष्पाणिशंखेकृत्वाशंखमुद्रयादेवायार्घ्यंदत्वाउत्तिष्ठब्रह्मणस्पतइतिउत्थाप्य
रथोतिष्ठन्नितिरथमारोप्यदेवस्यपुरतआचार्यःपृष्ठतोयजमानःपुत्रकलत्रबंधुयुतःपार्श्वयोर्मूर्तिपा
लास्तूर्यघोषेणस्वस्तिमइतिशांतिपाठेनमंगलपाठेनचपुनस्तस्यैवप्रासाददक्षिणामेत्यप्रासादादिपरिभ्रा

न्यप्रासादमानीयरथाद्देवतार्यभद्रासनेद्वारसंमुखंलिंगंकृत्वार्घंदत्वामधुपर्केणपूजयित्वाप्रासादंप्रवे
शयेत्॥ द्वारेणद्वारबंधनद्वारदेशेनतद्विना॥ द्वारबंधोशिखास्कन्धेतदूर्ध्वेनाथतत्पुते॥ वर्जयेद्वारसं
स्पर्शंद्वारेचैवमहेश्वरं॥ देवगृहसमारंभेकोणेनापिप्रवेशयेत्॥ अयमेवविधिर्ज्ञेयोव्यक्तलिंगेचसर्व
था॥ गृहप्रवेशनंद्वारंलोकेरपिसमीहितं॥ अपरद्वारप्रवेशेनविघ्नोत्रकथ्यतेयथा॥ तत्कर्तुश्चविनाशो
तिमतःशांतिंसमाचरेत्॥ श्रीरामादिदोषदुष्टस्यापद्वारेणैवनिर्गतिं॥ एतल्लिंगविशायं॥ अथविष्ण्वाद्यर्चातद्वय
यास्वस्वेशरीरेणैवदेवमतोदेवाइतिप्रासादंप्रवेश्यपिंडिकासमीपेभद्रपीठेद्वारसंमुखंनिधायार्घमधुपर्का १०५
भ्यामभ्यर्च्यदेवस्यत्वेतिपिंडिकामालभ्यपूजयेत्॥ एतस्मिन्नवसरेवारत्नन्यासोवक्ष्यंतोभवतीत्येके॥ त
तोमूर्तिपैर्यजमानेनान्वितोदेशिकोदेवंपिंडिकायांस्थापयेत्॥ तद्यथा॥ सुमुहूर्तेसुलग्नेशुभांसेपु

ण्याहमस्त्वित्युक्त्वास्वयंपरमात्मानंसृष्टिसंहारकारकंसर्वैश्वर्ययुक्तंजगदीश्वरंभावयन्पिंडिका
याःपद्ममपसार्यसौवर्णंपिंडंस्वमंत्रेन्यासोक्तद्रव्ययुक्तंक्रमेणस्वमंत्रेनिधाय॥ प्रधानपुरुषोयावद्यावच्चंद्र
दिवाकरौ॥ तावत्त्वमनयाशक्त्यायुक्तोत्रैवस्थिरोभवेत्युक्त्वाकूर्मासीतिकूर्चाद्यैरितिसूक्तेनदेवमवक्रम
दिग्मुखंकिंचिदीशानाश्रितमुत्तराश्रितंवापिंडिकायाःस्वमंत्रेनिधायततःस्थिरोभवशाम्यतोभवेत्युक्त्वा
पिंडिकालिंगांतरंवालुकासीसकादिभिर्निबिडंपूरयित्वापुनर्नचालयेत्॥ ततोविश्वतश्चक्षुरित्युक्त्वा
देवस्यमस्तकेदक्षिणहस्तंदत्वापरमसद्भावंदेवनिष्कलंध्यायन्जपेद्दैवतंसामरुद्रसूक्तंच॥ ततःप्रति
माचित्स्थाप्यातदादेवस्यमंत्रांतरोक्तंतद्रूपंनानाभरणभूषितंध्यायन्प्रातिष्ठिकान्मंत्रान्जपेत्॥ तत्र
विष्णोः॥ अतसीपुष्पसंकाशंशंखचक्रगदाधरं॥ संस्थापयामिदेवेशंदेवोभूत्वाजनार्दनः॥ रुद्रस्य॥ अ

हंसं च दशबाहुं च चंद्रार्धकृतशेखरं ॥ गणेशं वृषभस्थं च स्थापयामि त्रिलोचनं ॥ अथ ब्रह्मणः ॥ ऋषिभिः सं
स्तुतं देवं चतुर्वक्त्रं जटाजरं ॥ पितामहं महाप्राज्ञं स्थापयाम्यंबुजोद्भवं ॥ अथ सूर्यस्य ॥ सहस्रकिरणं शां
तमप्सरोगणसेवितं ॥ पद्महस्तं महाबाहुं स्थापयामि दिवाकरं ॥ दैविकोश्चैतत्तल्लिंगान्देवस्य रुद्रयं
स्तुशावज्जपन् ॥ तद्यथा ॥ पुरुषसूक्तं विष्णोः रुद्रस्य रौद्रं ब्रह्मणो ब्राह्मं ॥ सूर्यस्य सौरं ॥ अन्येषां देवा
नां तल्लिंगान्मंत्रान्जपित्वा सव्याहृतिं सप्रणवां सशिरस्कां च गायत्रीं प्राणसूक्तं च जपित्वा सान्निध्यं
च कुर्यात् ॥ ॐ नमस्ते त्यक्तसंगाय संतोषपरमात्मने ॥ ज्ञानविज्ञानरूपाय ब्रह्मतेजानुशासिने ॥ गुणा १०६
तिक्रांतवेगाय पुरुषाय महात्मने ॥ अव्यक्ताय पुराणाय विष्णो संनिहितो भव ॥ भगवन्देवदेवेश त्वं
पिता सर्वदेहिनां ॥ त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमं ॥ त्वमिंद्रः पावकश्चैव यमो निर्ऋतिरेव च

वरुणो मारुतः सोम ईशानः प्रतिमुरव्ययः ॥ येन रूपेण भगवंस्त्वया व्याप्तं चराचरं ॥ तेन रूपेण देवेश अर्चा
याः सन्निधौ भव ॥ सर्वमंत्रादिसंयुक्तो लोकानुग्रहकाम्यया ॥ अत्रार्चायां महादेव भव सन्निधिमान्सदा
॥ सूर्याचंद्रमसौ यावत् यावत्तिष्ठति मेदिनी ॥ तावद्यात्र देवेश स्थातव्यं स्वेच्छया प्रभो ॥ यावच्चंद्रोयमः सू
र्यस्तिष्ठस्य प्रतिघातिनः ॥ तावदत्र देवेश स्थेयं सर्वानुकंपयेति ॥ ततः स्थापितदेवं प्रधानं कृत्वा तस्य
परितो वान्यान्देवान्तत्परिवारत्वेन स्थापयेत् ॥ तद्यथा ॥ नंदी महाकाल वृषभ भृंगिरीटि स्कंद उमा विना
यक विष्णु ब्रह्मादयः तेन्द्राग्नियमनिर्ऋति वरुण वायु सोमेशाना अप्सरोगणगंधर्वगुह्यकविद्याधरा
दीन् ॥ रुद्रस्य यदा ब्रह्मा स्थाप्यते तदा विष्ण्वादयः परिवारदेवताः ॥ यदा विष्णुस्तदा ब्रह्मादयः ॥ यदा रु
द्रस्तदा ब्रह्मविष्ण्वादयः ॥ सर्वविनायकदुर्गादीनां परिवारकल्पनं ॥ ततः कुंडे प्रसंगान्निष्ठं कुर्यात् ॥ तद्यथा

पूर्वकुंडे हृदयमंत्रेणाज्येन विंशत्याहुतीः। दक्षिणकुंडे शिरोमंत्रेण। पश्चिमे शिखामंत्रेण। उत्तरे क
वचमंत्रेण। आचार्यकुंडे नेत्रमंत्रेण। पुनः पूर्वकुंडे अस्त्रमंत्रेणेति। षडंगमंत्राणां होमो ऽधिकांगा
नीयेषां तानि पूर्वकुंडे होतव्यानि। ततः मायास्तत्र तत्रावयवे विन्यसेदथ मूलमंत्रेण शतं हुत्वा प्रति
माहृदये जीवमूर्तिं विन्यसेत्। आयुधमंत्रेणायुधानि कोणकुंडे। तदभावे पूर्वकुंडे होमयित्वा तत्त
त्स्थाने विन्यसेत्। अन्यान्यधिकानि यानि तान्याग्नेयकुंडे पूर्वकुंडे वा। तथाभूषणवाहनमिमंत्रैर्देवस्य
क्षिप्य षट्कुंडेषु हुत्वा तत्तत्स्थाने निवेशनीया। प्रणवाद्या नाममंत्राः स्वाहांता होमे नमोंतान्यास १७
कर्मणि। तीति सर्वत्र ज्ञातव्यं। एवं देवं प्रतिष्ठाप्य प्रार्थयेत्। लोकानुग्रहहेत्वर्थं स्थिरीभव सुखासन
सान्निध्यं हि सदा देव प्रत्यहं परिवर्त्तय। मानहृत्तुर्जां विरोधो ऽस्मिन् यजमानः समृध्यतां। संपादयन्

तथा राष्ट्रं सर्वोपद्रववर्जितं। हेमोमहद्दिमतुलं सुखमक्षयमस्तु तां। इति संप्रार्थ्य विधिना देवं सांग
मर्चयेत्। ततो बहिर्निर्गत्य द्वारपालादीन्निजनाममंत्रैः स्थापयेत्। विष्णुश्चेच्चंडप्रचंडादीन्। शिवश्चेन्नंदि
महाकालादीन्। सूर्यश्चेद्दंडिपिंगलादीन्। ततो ध्यानेन प्रासादपुरुषाकृतिं स्थापयेत्। तत्र प्रासादस्य
प्रवक्ष्यामि रूपं ध्यानेयथा भवेत्। पादौ पादशिलास्तस्य जंघा पादौ ह्युदिच्यते। गर्भश्चैवोदरं ज्ञेयं कटिश्च
कटिमेखला। स्तंभास्तु बाहवो ज्ञेया घंटा जिह्वा प्रकीर्तिता। दीपः प्राणोस्य विज्ञेयः स्तवपानो जलनि
र्गमः। ब्रह्मस्थानं भवेत्तस्य तन्नाभिः परिकीर्तिता। हृत्पद्मं पिंडिका ज्ञेया प्रतिमा जीव उच्यते। पादस्था
रस्त्वहंकारो ज्योतिश्चैव स्तच्चक्षुरुच्यते। तदूर्ध्वं प्रकृतिस्तस्य प्रतिमा पुरुषः स्मृतः। तलकुंभास्तथा
धारं तस्य ध्वजनं स्मृतं। शुकनासा नवन्नासा गवाक्षः कर्ण उच्यते। कपोतपालिः स्कंधोस्य ग्रीवा चा

मत्तवारिकः॥ कलशस्तुशिरोज्ञेयंमज्जाहस्तरसंहितं। मेदश्चैववसुधांविंद्यात्प्रलेपोमांसमुच्यते। अस्थी
नित्वसलास्तस्यस्नायुःकीलादयःस्मृताः। चक्षुषिशिखरास्तस्यध्वजान्केशाःप्रकीर्तिताः। एवंपुरुषरूपं
तंध्यात्वाचमनसासुधीः। प्रासादंपूजयेसम्यग्गंधपुष्पादिभिःशुभैः। सूत्रेणवेष्टयेद्देवंवासस्तत्परिकि
ल्पते। प्रासादमेवमभ्यर्च्यवाहनंचाग्रमंडपेस्थापयेत्। पुनरिंद्रादीन्निजगदिक्षुचवेश्मसु। दिकु
रादैःपुरायस्यदेवस्यात्परिकल्प्यते। आयतनस्यसा। कथ्यतेविपरीताद्दिक्तुस्यादशुभावहा। तत्रै
दीशाविकोविष्णोरामाग्नेयीरुद्रस्यवल्लभः। अयाचीकृतमातृणांगणानांमंत्रकस्यच। चंडकाल्याःपि १०५
तृणांचनिर्ऋतिनिर्ऋतीमता। वरुणांनोधिसरितांपतीचायतनस्यदिक्। वायुर्गणफणींद्राणांग
जानामस्यमारुती। यक्षोमार्कंडसोमानांसौम्येशानिशिवस्यतु। द्वारस्यदक्षिणेवामेक्रमाद्वैश्रव

णाश्रियोः। मध्यदिक्षुभगवतस्यसर्वजंतुसुखावहं। उक्तस्यायतनादेवादृष्टादृष्टफलप्रदाः। शतंपंचाश
दथवाविंशत्यष्टोत्तरंक्रमात्। नाममंत्रैरथैतेषांउत्तरादिदिक्क्रमात्पुनेत्। गर्भगेयैहंपुनःप्राप्यविस्तारं
विधिनार्चयेत्। अर्घाद्यैरुपचारैस्तुपक्वैतैरर्चयेत्सुधीः। अथशिवस्यप्राधानत्वात्तस्यावाहनादि
पूजा यथा। यस्यसिंहारयेयुक्ताव्याघ्राश्चतास्तथोरगाः। ऋषयोलोकपालाश्चदेवस्कंदस्तथावृषः। प्रि
यागणमातरश्चसोमोविष्णुःपितामहः। नागायक्षाःसगंधर्वायेचदिव्यानभश्चराः। तमहंत्र्यक्षमी
शानंशिवंरुद्रमुमापतिं। आवाहयामिसगणंसपत्नीकंवृषध्वजमिति। आगच्छभगवन्रुद्रानुग्र
हायशिवोभव। शाश्वतोभवपूजांमेगृहाणत्वंनमोनमः। ॐस्वागतमनुस्वागतंभगवतेनमोनमः
सोमायसगणायसपरिवारायप्रतिगृह्णातुभगवान्मंत्रपूतमिदमर्घ्यपाद्यमिदमाचमनीयंच। य

दासनंब्रह्मणानिहितंनमोनमः॥ स्वाहेति॥ आगछेत्यादिकामंत्राःसोमायपदवर्जिताः॥ ऊहेनसर्वसा
धारणाः॥ एवंसंपूज्यप्रणम्यब्रह्मघोषेणस्नापयेत्॥ दधिक्राव्णेतिदध्ना॥ आप्यायस्वेतिक्षीरेणघृत
वतीतिघृतेन॥ मधुवाताइत्तिमधुना॥ आयंगौरितिशर्करया॥ एषुपंचसुप्रतिस्नानंगंधोदकेनक्षा
लयेत्॥ ओषधीःप्रतिमोदध्वमितिपुष्पोदकेन॥ गंधद्वारामितिगंधोदकेन॥ शांतिकलशसंस्रवैस्नप
यित्वागंधाद्यैरुपचारैःपूजयित्वादेवंध्यायन्जपेत्॥ यज्जाग्रतोदूरमुदैति॥ ततोविराडजायत॥ सहस्र
शीर्षेति॥ अभित्वाशूरनोनुमः॥ पुरुषएवेदं॥ त्रिपादूर्ध्वः॥ येनेदं॥ नत्वावां॥ अन्यइत्येतान्मंत्रान्स्वस्ति १०९ मेरु
प्रतिष्ठासुचतुःकृत्वोजपेत्॥ प्रतिपद्ययिमाद्भिर्देवस्यपादौनाभिवक्त्रःशिरस्थानालभेत्॥ ततोलिंगंमं
त्रैःप्रार्थयेत्॥ भगवन्देवदेवेशधर्मकामार्थमोक्षदा॥ विद्याविद्येश्वरैरुद्रैगणैश्चलोकपालकैः॥ दे

वदानवगंधर्वैर्यक्षैश्चकिंनरैःसह॥ अस्मिन्लिंगेमहादेवसर्वदावससेप्रभो॥ पुंसामनुग्रहार्थायष्ठश्रियां
स्वेछयाप्रभो॥ परावरेणभावेनस्थातव्यंसर्वदात्वया॥ सर्वविघ्नहरःपुंसांसर्वदुःखहरःसदा॥ सर्वदाय
जमानस्यइछासंपत्करोभव॥ नमस्तेसर्वधर्माय संतोषविजितात्मने॥ ज्ञानविज्ञानरूपायब्रह्मते
जोभिशालिने॥ नमस्तेशुद्धदेहायपुरुषायमहात्मने॥ स्थापनानांमूर्तिपानांशिल्पिनांचविभोःसदा
॥ग्रामदेशनृपाणांचशांतिर्भवतुसर्वदा॥ पूजकाराधकानांचभक्तानांभक्तवत्सल॥ सर्वेषांचजगन्ना
थइछासिद्धिप्रदोभव॥ चंद्रार्कावनिपर्यंतंलिंगेस्मिन्परमेश्वर॥ स्थातव्यमुमयासार्द्धंसर्वलोकानुकं
पया॥ यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी॥ तावत्त्वयात्रदेवेशस्थातव्यंस्वेछयाप्रभो॥ अथविशो
स्तु ततः॥ सहस्रशीर्षेत्यादिभिर्मंत्रैःषोडशोपचारैःपूजनंकृत्वावैदिकैःसूक्तैःपौराणिकैःमंत्रैःस्तोत्रैर्वा

स्कृत्वाञ्जलिमस्वेत्फलकादेवंप्रार्थयेत् । तत्रशिवस्य । ज्ञानतोऽज्ञानतोवापिनगवंन्यत्कृतंमया । तत्सर्वंपूर्णमेवा
स्कृत्वत्प्रसादान्महेश्वर । अथविष्णोःप्रार्थनं । ज्ञानतोऽज्ञानतोवापिशास्त्रोक्तंनकृतंहियत् । तत्सर्वंपूर्णमे
वास्कृतत्प्रसादादधोक्षजः । अथकर्तृनामयुक्तंदेवस्यनामविदध्यात् । तद्यथा । नारायणस्यामुकस्वा
मी अमुकनारायणोवा । अथशिवस्यामुकेश्वरः । अथभानोरमुकादित्यः देवीनाममुकेश्वरीत्यादि । ग
णपतेरमुकविनायकः । अथनैमित्तिकदोषप्रायश्चित्तमुच्यते । स्थाप्यमानदेवप्रतिमालिंगंवायांदिप्राप्नु
याप्नयेतत्तद्दिगीशमंत्रेणसमिधोमीधंपालाशानांवातिलैर्वाष्टोत्तरशतसंख्याकंपूर्णांतंहोमंकुर्यात् । ११०
तत्रइंद्रायेंद्रो । अग्निर्दूतं । आयंगौः । असुन्वंतं । इमंमे । प्राणाशिशुः । अभित्यंदेवं । आवोराजानमितिमं
त्रायथासंख्येन । आचार्यदक्षिणाश्वक्रमेणगजोमेषोमहिषोजःशुक्तिमुक्ताफलंसवस्त्रयुग्मकामधे

नुष्टेषभस्तदनावेसुवर्णप्रतिकृतिर्गोवाराजतोवावृषभएवेति । तत्तल्लाप्यमानेदेवेप्राद्यौस्थानेचपर्यांतं ।
स्फुटितेवामूलमंत्रेणाष्टोत्तरशतमघोरेणवाशांत्यर्थंकृत्वासप्तप्रतिष्ठाकृतीर्जुहोति । ॐशिवायक्षि
रानवस्वाहा । ॐशिवायप्रमेयायनवस्वाहा । ॐशिवायादिबोधेनवस्वाहा । शिवायसर्वगोनवस्वाहा । शि ना२
वायनित्योनवस्वाहा । शिवायविनाशोनवस्वाहा । शिवायाच्युतोनवस्वाहेति । अथसर्वशांत्यर्थंत्र
परमष्टोत्तरशतमघोरेणदत्वास्विष्टकृतंकृत्वासर्वप्रायश्चित्तहोमंविधाय । मूर्धानंदिवःसप्ततेअग्नइत्या
दिपुनस्त्वेतिपूर्णाहुतीकृत्वाईशानकोणेबलिंदत्वाचमृत्कृतेश्वत्थकंकृत्वातन्मध्येष्टदलंपद्मंस्वस्तिकं
वाविधायतदुपरिभद्रासनंसीतवस्त्रोत्तरंविधायतत्रयजमानंपत्नीपुत्रबांधवादियुतंउपवेश्यहोमो
त्सर्गंकारयित्वाशांतिकलशोदकेनाचार्योमूर्तिपान्वितोदेवस्यत्वेति आथर्वणसाम्नाभिषिंचयेत् ।

अन्यैरपिवैदिकैःपुराणोक्तैश्चसुरास्त्वामभिषिंचंत्वित्यादिमंत्रैर्यजमानमभिषिंचेत् । अथाचार्यपू
जोच्यते । तद्यथा । यजमानःसितांबरैस्तैश्चतुरस्रमंडलंकृत्वातस्यमध्येपद्मंचतत्रपीठंविन्यस्यसि
तवस्त्रेणचाच्छाद्यगंधपुष्पैरभ्यर्च्यतत्रशम्भुरूपमाचार्यंसमुपवेश्यविष्टरपाद्यार्घाचमनीयैरर्चयि
त्वानवंवस्त्रोत्तमंवस्त्रयुग्मंपरिधाप्यचंदनागुरुकुसुमैरनुलिप्यततोदक्षिणहस्तेसौवर्णमंगुलीय
कंविन्यस्यपुष्पैःप्रपूज्यहारकंकणकेयूरकुंडलादिभिर्भूषणैर्यथासंभवंभूषयित्वादेवशास्त्रावशि
त्वापुष्पांजलिंतन्मूर्ध्निन्यस्यार्घंदत्वाभक्तिश्रद्धायुक्तोवित्तशाठ्यविवर्जितोदक्षिणामाचार्यायदद्या ११२
त् । तद्यथा । ग्राममश्वंदासीदासंव्यजनचामरछत्रवितानयानासनशयनानिवस्त्राणिगोसहस्र
मर्धंतदर्धंतदर्धंवावृषमेकादशकंपंचैकंवावित्तानुसारेणसर्वाःसालंकृताःसंनिधिकृत्यप्रधानग

व्याःपुच्छंआचार्यहस्तेदत्वादेशकालगोत्रनामानिस्मृत्वाकरेसहिरण्यंजलमादायप्रयोगमुच्चा
रयेत् । तद्यथा । देवताप्रीत्यर्थंइमांदक्षिणांअन्यमहमाचार्यायसंप्रददेइत्यभिधायआचार्यक
रेस्वकरेणसतिलाक्षतजलंप्रदत्तंनिक्षिपेत् । ततोऽर्घंदत्वाशिरसाप्रणम्यविज्ञापयेत् । तद्यथा
भगवन्सर्वधर्मज्ञशिवधर्मपरायण । सर्वशास्त्रार्थतत्त्वज्ञशिवशास्त्रविशारद । अनादिजन्मसं
तानेऽस्मिन्नप्रमेयेभवार्णवे । अद्यमेसुकृतंजन्मअद्यमेसफलंधनं । अद्यमेजननोच्छित्तिरद्यमेपरमंप
दं । मोचितोऽहंत्वयानाथदुश्छेद्याद्भवबंधनात् । संजातोऽहंत्वयायस्मादप्रमेयाद्भवार्णवात् । मुक्तोऽहंमहा
संसारात्संपन्नोऽहंभवात्तिकं । ज्ञानतोऽज्ञानतोवापियन्न्यूनंचेत्कृतंमया । तत्सर्वंपूर्णमेवास्तुत्वत्प्रसा
दात्क्षमस्वमे । आचार्योऽक्षतफलसहितंयजमानायाशिषंददाति । तद्यथा । समस्तजगदुत्पत्ति

स्थित्यनुग्रहकारकः। शिवःसानुचरःस्ताद्वःसर्वदासर्वकामदः। इत्यंहीनंतुयत्किंचित्त्विधिहीनंतु
यत्किंचित्। तत्सर्वंपूर्णमेवास्तुप्रसादात्कारणस्यतु। स्थापकस्यमूर्त्तिपानांवर्णिनांशिल्पिनांत
था। सराष्ट्रपार्थिवानांचशांतिर्भवतुसर्वदा। भृत्यपुत्रकलत्रैश्चस्वमित्रैर्बंधुबांधवैः। कारणस्यप्रसा
देनसर्वलोकेश्वरोभव। अथयष्टुमानंआचार्यंप्रणम्यरुद्रमश्वेतिक्षमापयेत्। अथस्थापकमूर्त्तिशिल्
पिनःपरिकर्मिणश्च स्वभृत्यादींश्चनीःशाद्यंमतयादक्षिणयार्चयेत्। एकहस्तादिलिंगानांआयामां
गुलसंख्यया। ज्येष्ठंमध्यंकनिष्ठंवादद्यादाचार्यदक्षिणां। आयामांगुलसंख्याकेस्तत्पादोनैस्तद ११२
र्धितैः। निष्कैर्गाधैंतिकेलेयंप्रत्येकंदक्षिणात्रयं। मध्यमेषुत्रिलिंगेषुतदायामांगुलैःसमा। मध्यात्
तद्विगुणज्येष्ठात्तत्पादोनकनीयसी। त्रिषूत्तमेषुलिंगेषुतदायामांगुलैःक्रमात्। त्रिचतुःपंचगुणि णि

तैर्दक्षिणात्रितयंमतं। ममाघ्यैर्रत्नलिंगस्यबाणसिद्धार्थकस्यच। सर्वप्रादेशयोग्यस्यात्वात्वासा
द्यांसेनदक्षिणा। मणिलिंगेगुलायामेज्येष्ठानिष्कार्धतोमता। तत्पादोनामितामध्यातदर्धेनकनीय
सी। प्रतिमानांतुसर्वासांसामान्योक्तविधिःस्मृतः। एकद्वित्रिगुणंज्ञेयंहिनाद्यंदक्षिणात्रयं उत्तमा
र्धेमुक्तिपानांतत्पादोनंचशिल्पिनः। देवलंचतदर्धंचजपिनांचतथाविधां॥ शिल्पिनोपीतरेषांच
पादोनिजपिदक्षिणा। तद्विधाकर्मिणामन्यलिंगादीनांयथार्हतः। ततोर्पितात्मनेतस्मैप्रक्षीभूता
ययज्विने। गुरुःसम्मूर्त्तिपोदद्यात्साक्षतांपरमाशिषं। समस्तजगदुत्पत्तिस्थित्यनुग्रहकारकः। शि
वःसानुचरःस्ताद्वःसर्वदासर्वकामदः। इतिदत्त्वाशिषंयज्वानत्वाहमापयेद्गुरुं। भगवन्सर्वधर्मज्ञ
सर्वधर्मप्रकाशकः। त्वद्यमेसफलंजन्मयत्संसारमहार्णवात्। उद्धृतोभवतानाथस्त्वकेशितस्त्वंहम

स्वमे॥ ततः प्रभृत्यसौ कर्त्ता पुत्रदारस्वयंबंधुभिः॥ आज्ञाकारी भवेन्नित्यं भूयः पुण्यफलेहया॥ इत्या
चार्यपूजाविधिः॥ अथ प्रथमेहनि मधुकुंकुमेन कपिलाज्ययुतेन देवं लेपयित्वा गंधाद्यैः पूजयेत्॥
द्वितीयेहनि हरिद्रासिद्धार्थकचूर्णेन कपिलाज्यघृतेनेति सर्वलेपस्वयं विशेषेण ज्ञातव्यं॥ तृतीयेहनि
पिष्टसितचंदनयवचूर्णेन॥ चतुर्थे मनःशिलाप्रियंगुचूर्णेन॥ पंचमे कुलांजनतिलचूर्णेन॥ षष्ठे रक्तचंद
नपद्मकेसरचूर्णेन॥ सप्तमे गोरोचंदननागकेसरचूर्णेन॥ सद्योधिवासे सर्वैर्देवं लेपयेत्॥ शिवस्यत्वप
द्य प्रतिष्ठोत्तरकालं सप्तदिनपर्यंतं उक्तलेपानुक्रमात्क्रियंते तदा तस्याष्टमेहनि स्नपनपूजादिभिर्महो १२३
त्सवः कर्त्तव्यः॥ अथ प्रतिमानां पूर्वोक्तं लेपत्रयं क्रमेण कृत्वा शेषलेपांश्चतुर्थेहनि युगपत्कुर्यात्॥ तथा
दिनपरिहृयमन्नपानादिभिर्महोत्सवः कर्त्तव्यः त्रिसंध्यं बलिदानं च॥ तथाचार्यो मूर्त्तिपैः सह प्रत्यहं

होमं कुर्यात्॥ पंचोपनिषन्मंत्रैः समिद्भिराज्येन चार्यः सहस्रसंख्यया प्रतिकुंडशतं पूर्णाहुतिं हुत्वा स
ऋत्विजः शांतिहोमं च कुर्युः॥ अथवा द्वितीयदिवसे प्रतिकुंडे शतं शतं तन्मंत्रैर्हुत्वा प्रायश्चित्तार्थं
मघोरेण जुहुयात्॥ अथ तृतीयदिवसे शांतिहोममेव कुर्यादिति॥ ॥इति श्रीरघुसूरिसूनुत्रिविक्र
मसूरिविरचितायां प्रतिष्ठापद्धतौ सर्वदेवप्रतिष्ठाविधिः॥ ॥अथ चतुर्थीकर्मोच्यते॥ तच्चतुर्थेहर
नि द्वितीये द्विवा कुर्यात्॥ तत्राचार्यः प्रातः कृतनैत्यकविधिर्यजमानमूर्त्तिपद्वारपालान्वितो मंडपमा
गत्य महास्नानसंभारं देवस्यालंकरणादिकमाहृत्य पश्चिमद्वारेण प्रविश्य वेद्याः प्रदक्षिणं गत्वा दक्षि
णत उदङ्मुख उपविश्य पुण्याहादिकलशपूजांतं कर्म निर्वर्त्य कुंडांतिकं गत्वा स्थापितदेवत्यं चरुं
श्रपयित्वा कुंडादीशानभागे संपातोदकधारणार्थं कलशं संस्थाप्य ततदेवं संपूज्याज्यभागाविष्टा

पंचब्रह्मभिः सांगैः सहस्रसंख्यया जुहुयात्॥ अथ लिंगाज्येन तिलैर्वा स्वस्वकुंडेषु शतसंख्ययाहु
त्वा पूर्णाहुतिं दत्त्वा पत्नीमंत्रेण च जुहुयुरिति शिवस्य चतुर्थं कर्म॥ अथाचार्योन्येषां देवानां पूर्ववच्चरुं
श्रपयित्वा स्वमंत्रैः पत्नीमंत्रैश्च सहस्रसंख्यया होमं कुर्यात्॥ देवीनां पुनर्निजमंत्रैरेव जुहुयात्॥
अथर्त्विजः प्रतिकुंडमाज्येन शतं शतं हुत्वा पूर्णां दत्त्वा शांतितोयेन प्रतिमां सिक्त्वा निर्माल्यमपनीय
देवमावाह्य पूजयित्वा देवं स्नपयेदेकाशीति घटैः पूर्वकल्पितैः॥ अथवा देवं मत्स्योक्तविधिना स्नापये
त्॥ तथाहि॥ दध्यक्षतकुशाग्रैश्च क्षीरदूर्वामधुयवसिद्धार्थकपुष्पफलजलान्वितमर्घपात्रमासाद्य॥ गजा ११४
वरस्थ्यावल्मीकवराहविघ्नताख्यागारतीर्थह्रदगोमंडलमृत्तिकाः कुंभेषु प्रक्षिप्य॥ अथ शन्नोदे
वीरापो हिष्ठेति तिसृभिर्गृहीत्वा पंचगव्यं मंत्रसाधितं पृथक् पंचामृतं च कलशसहस्रं तदर्थं

तस्याप्यर्धमष्टोत्तरशतं चतुःषष्टिर्द्वात्रिंशतं षोडशाष्टौ चतुरो वा कलशान्सौवर्णान्राजता
न्ताम्रान्रीतिकांश्च मयान्कांस्यान्पार्थिवान्वौषधीपुष्पफलादिकं तेषु परिकल्प्य तथ्यतासीति
मृत्तिकां प्रक्षिप्य ततः समुद्रं व इति देवायार्घ्यं दत्त्वा स्नापयेत्॥ तद्यथा॥ पंचनद्य इति पंचगव्येन॥ द
धिक्राव्ण इति दध्ना॥ आप्यायस्वेति क्षीरेण॥ तेजोसीति घृतेन॥ मधुवाता इति मधुना॥ स्वादुः पवस्वे
ति शर्करया॥ सरस्वत्यै नैष्कर्ज्येनेति पुष्पोदकेन॥ हिरण्याक्षतैरिति रत्नोदकेन॥ देवस्य त्वेति कुशां
नसा॥ अग्न आयाहीति फलोदकेन॥ तत्सवितुरिति गंधोदकेन॥ ओषधयः प्रतिमोदध्वमिति सहदेव्या
श्रीबलातिबलाशंखपुष्पीवचासींहीसुवर्चलोदकेन॥ या ओषधीरिति यवगोधूमनीवारतिलश्यामा
कशालिप्रियंगुव्रीहिकलशोदकेन॥ समुद्रज्येष्ठा इति पूर्वकल्पितशिशितज्जलरकुंभेन॥ वसोः

पवित्रमितिसहस्रधाराकलशेन ॥ अथमंत्रगृहीतंवारिगंधपुष्पाक्षतयुतैः पूर्वकल्पितैःसहस्रादिसं।
ख्यैस्तल्लिंगमंत्रैरक्तस्त्रीवास्नापयेत् ॥ अथस्वस्तिनइतिमृन्मयैर्गोमयमयैरुन्नयमयैर्वास्वस्तिकपद्म
शंखोत्पलकलशश्रीवत्सदर्पणनंद्यावर्तैःसुपुष्पाक्षतैर्नूतनवंशपात्रस्थितैर्देवंपरिहरेत् ॥ अथांधस्त्वं
धोवइतिपंचवर्णसूत्रेणनिराज्यबलिंहरेत् ॥ आकृष्णेनेतिपंचवर्णैरजोभिश्चमुंचंतुमासपथ्यादिति।
कोत्तरकंविलुच्य ॥ सुगंधेनवाससादेवंपरिक्षिप्यपंचनद्यइति ॥ आचमनीयंदद्यान्मंत्रेण ॥ यथा ॥ मं
दाकिन्यास्तुयद्वारिसर्वपापहरंशुभं ॥ तदिदंकल्पितंदेवसम्यगाचम्यतांत्वयेति ॥ वेदसूक्तसमायुक्ते २२५
यजुःसामसमन्विते ॥ सर्ववर्णप्रदेदेववाससीतेविनिर्मिते ॥ तिवस्त्रयुग्मदानमंत्रः ॥ शरीरंतेनजाना
मिचेष्टांनैवचनैवच ॥ मयानिवेदितंभक्त्याचंदनंप्रतिगृह्यतां ॥ चंदनंकुंकुमंकर्पूरयुतं ॥ मणिमुक्ताप्र

वालाद्यैःस्वर्णपुष्पैर्मयाकृतां ॥ पूजांत्वंदेवदेवेशप्रसादाद्भवतस्त्वतिपुष्पाणि ॥ वनस्पतिरसोद्भूतो गं
धाढ्यो गंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतामिति ॥ सतां ॥ इतिधूपं ॥ त्वंचंद्रसूर्यरवि
विष्णुस्त्वंरत्नानिहुताशनः ॥ त्वमेवसर्वज्योतींषिदीपोयंप्रतिगृह्यतामिति ॥ चत्वारिंशतात्र्यशीत्यावा
दीपैरारार्त्रिकं ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं ॥ भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां ॥ नै
वेद्यं ॥ सर्वभूषायतेनमइतिकंकणादिभूषणानिदत्वा ॥ पूर्वकृतहोमंनिवेद्यप्रार्थयेत् ॥ यन्मयाभक्ति
युक्तेनपत्रंपुष्पंफलंजलं ॥ आवेदितंचनैवेद्यंतद्गृहाणानुकंपया ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंज
नार्दन ॥ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ॥ एवंदेवंसंप्रार्थ्यनृत्यगेयवाद्यंकारयित्वाअष्टोत्तरसह
स्त्रंमूलमंत्रेणआज्यंहुत्वांगानांदशांशेनस्विष्टकृदादिपूर्णांतंकृत्वाब्राह्मणान्स्वस्तिवाचयित्वादि

गीशाभ्यो बलिं दत्वाचम्य देवं गृहगमनाय विज्ञापयेत्॥ इति चतुर्थीकर्मविधिः॥ अथ शैवप्रतिष्ठोच्यते
तद्यथा॥ सा च चतुर्थीकर्मदिवसे दिवसांतरे वा कर्तव्या॥ तत्र चंडेशं ध्यात्वा लिंगमूर्द्धि पिंडिकायां वेशा
नदिक्कोवापीठके वा संस्थाप्य वक्ष्यमाणमंत्रैर्गंधाद्यैर्भूषणांतैरुपचारैः पूजयेत्॥ अथ वाजगतावा
प्यत ईशान्यां दिशि प्रासादगर्भद्विमानेन चंडेशगृहे पूर्ववत्कल्पिते पीठन्यासं पूर्वादि विधाय ध्यानपूर्वं
स्थाप्य निजमंत्रैः पूजयेत्॥ तद्यथा॥ ॐ चंडासनाय नमः॥ ॐ चंडमूर्तये नमः॥ ॐ धुनिचंडेश्वराय हुं
फट् स्वाहा इत्यनेनावाह्य॥ ॐ चंडहृदयाय हुं फट् नमः॥ ॐ चंडशिरसे हुं फट् नमः॥ ॐ चंडशिखा ११६
यै हुं फट् नमः॥ ॐ चंडकवचाय हुं फट् नमः॥ ॐ चंडनेत्रत्रयाय हुं फट् नमः॥ ॐ चंडास्त्राय हुं।
फट् नमः॥ हस्तयोरस्त्रं॥ ॐ चं सद्योजाताय हुं फट् नमः॥ ॐ चिं वामदेवाय हुं फट् नमः॥ ॐ चुं त

अघोराय हुं फट् नमः॥ ॐ चें तत्पुरुषाय हुं फट् नमः॥ ॐ चों ईशानाय हुं फट् नमः॥ रुद्राग्नेः प्रभ
वं चंडं कृष्णाभं भयानकं॥ शूलचंडधरं रौद्रं चतुर्वक्त्रं चतुर्भुजं॥ मुखे॥ कीर्णमहाज्वालं रक्तशाद
शलोचनं॥ जटामुकुटखंडेंदुमंडितं फणिकंकणं॥ व्यालयज्ञोपवीतं च साक्षसूत्रकमंडलुं॥ श्वेत
पद्मासनासीनं भक्तिप्रकर्तिनाशनं॥ एवं ध्यायं पूर्वोक्तमंत्रैर्गंधाद्यैः पूजयित्वा जपं कृत्वा तस्मै निवे
द्य विज्ञापयेत्॥ ज्ञानतोऽज्ञानतो वापि यन्न्यूनमधिकं कृतं॥ तत्सर्वं पूर्णमेवास्तु सुप्रीतो भव सर्वदा॥
सर्वमेव क्रियाकांडं मया चंड तवाज्ञया॥ न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे॥ यावत्तिष्ठति लो
के स्मिन् देवदेवो महेश्वरः॥ तावत्कालं त्वया देव स्थातव्यं शिवसन्निधौ॥ लेह्यचोष्यान्नपानादि तां
बूलं स्रग्विलेपनं॥ निर्माल्यं भोजनं तुभ्यं प्रदत्तं तु शिवाज्ञयेति॥ प्रणम्य पश्चाद्दिग्बलिं दत्वान्ते

श्चतानिबोधयेत्॥यावत्कालंमहादेवोलिंगमाश्रित्यतिष्ठति॥तावत्कालंत्वंसर्वार्थंपूज्यप्रतिष्ठस रुद्रा
वदा॥यत्रचंडोधिकृतस्तत्रैतत्कार्यंनान्यत्रशिवे॥तदुक्तंबाणलिंगेचलोहेचसिद्धलिंगेस्वयंभुवि॥
प्रतिमासुचसर्वासुनचंडोधिकृतोभवेत्॥ततोमंडपमागत्याचार्यःशेषंकर्मनिर्वर्त्यचतुष्कंशालि
तंडुलैरक्षतैर्वृत्कृत्वातदुपरिपीठंसितवस्त्राच्छादितंनिधायतत्रोपविष्टंयजमानंपत्नीपुत्रबंधुबां
धवादियुतंपूर्ववत्कलशैश्चतुर्भिर्द्विर्भ्यामेकेनवाम्रपत्रान्वितैराचार्योभिषिंचेत्॥देवस्यत्वेतिय
शासेनिर्षिंचामीतिशन्नोदेवीरित्याथर्वणसाम्नासुरास्त्वेत्यादिभिश्चमंत्रैः॥अथमहाजलाशयंगत्वा ११७
कृतावभृथस्नानोयजमानोमंडपमागत्यतदंतरक्षतैःपंकजंकृत्वातदुपरिपीठेगुरुमुपवेश्यदेववत्सं
पूज्यवित्तशाठ्यंविनाभूमिहिरण्यवस्त्रादिदक्षिणांतस्मैदद्याद्यथासंतोषमायाति॥मूर्तिपान्स्थापिनो

देवज्ञंशिल्पिनमन्यान्ब्राह्मणान्स्वशक्त्यासंपूज्यकृतांजलिराचार्यंप्रार्थयेत्॥भगवन्सर्वधर्मज्ञःसर्व
धर्मपरायण॥अद्यमेसफलंजन्मयत्नंसारमहार्णवात्॥उद्धृतोहंत्वयानाथक्लेशितस्त्वंक्षमस्वमे
यदत्रसन्मुखीभूयखेदितोभगवन्मया॥क्षमस्वनाथतत्सर्वंकारुण्याम्बुनिधेममेतिकृतविज्ञाप्यःना
कर्त्रेगुरुःसम्पूर्तिफलंसफलांसाक्षतांपरमासिसंदद्यात्॥तद्यथा॥समस्तजगदुत्पत्तिस्थित्यनुग्रहका
रक॥शिवस्त्वानुगृह्णातुसर्वदासर्वकामदइति॥अथयजमानःसहिरण्यांगांसोपस्करांयागमं
डपेत्राचार्यायदत्वास्थानमंडपंसोपस्करंशिल्पिनेसमर्प्य॥अथाचार्यादीन्प्रणम्यक्षमध्वमितिस्तु
त्वादेवंमंगलसद्वैस्तूर्यघोषैराजमार्गेणगृहंगत्वाब्राह्मणाननाथादीन्भोजयेत्॥॥इतिश्रीरघु
सूरिसुतत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौचंडप्रतिष्ठाविधिः॥॥अथध्वजारोपोनिरू

प्यते ॥ तत्र कालनिर्णयो यथा ॥ देवप्रतिष्ठानंतरं तद्दिने वा महास्नानानंतरं तद्दिने वा प्रासाद
स्य कलशप्रतिष्ठानंतरं तद्दिने वा ततोप्यनंतरं षण्मासे संवत्सरे वा ध्वजारोपः कर्त्तव्यः ॥ प्रासाद्विगुणं
सार्द्धं तत्समं तत्र लंबनीयः ॥ पटो द्विहस्तविस्तारो भूमिस्पृक् ॥ अथवा दैर्घ्ये षोडशभागविस्तारस्त
दर्द्धस्तस्याप्यर्द्धे वा दंडाद्दैर्घ्यं लंबीतो दंडमानो वा लिखितवाहनो भवति ॥ वर्णविभागेन च श्वेतो रक्तः पीतः
कृष्णश्चेति ॥ ध्वजस्य दंडस्य दैर्घ्यं दशहस्तो नवहस्तो वा सर्वथा दारुदोषविवर्जितो भवति ॥ पूर्वेद्युर्मंडपकुंडवे
दितोरणादि कृत्वा बल्वरणादि कर्म कृत्वोत्तरवेदिकायामेकाशीतिकलशैः पूर्वकल्पितैः कलश ११९
स्नपनविधिना ध्वजस्तंभदंडं सुवर्णादिनिर्मितं देववाहनं च स्नपयित्वा लक्षणोद्धारकर्म कृत्वा वि
धायान्यत्सर्वं देवताप्रतिष्ठावत्कार्यं गंधाद्यैः पूजयित्वाधिवासनमंडपमानीय वेद्यां शय्यायां कुश

संस्तरे स्तंभं दंडं च विन्यस्य काश्यपाद्यां ध्वजं च प्रक्षिप्तं पूर्ववत्तत्त्वन्यासं कुर्यात् ॥ तद्यथा ॥ आत्मतत्त्वं स्तंभे
॥ विद्यातत्त्वं दंडे ॥ शिवतत्त्वं ध्वजे ॥ सद्योजातादिपंचकं दंडे निष्कलं शिवं शांगं ध्वजे निवेश्य ॥ पलाशोदुंब
राश्वत्थशम्यपामार्गसमिद्दधिक्षीरघृततिलैर्देवमंत्रेणाष्टाहुतिभिर्वा होमं कुर्यात् ॥ मूर्तिमूर्तिपलो
कपालेभ्यश्च होमं कृत्वा पूर्ववद्दिग्बलिं कृत्वाधिवासयेत् ॥ शंखतूर्यमृदंगाद्यैः स्तोत्रपाठैर्वेदपारा
यणैर्वा रात्रौ जागरणं कुर्यात् ॥ लाजासक्तुमिश्रं कुमुदादिभ्यः सपरिवारेभ्यो बलिं विकिरेत् ॥ इत्यधि
वासनं ॥ अथ स्थापननिर्णयः ॥ तत्र पृष्ठदेशे नैर्ऋतभागे मारुते वैशाने वा शिखरस्य पंचमांशेन च त्र
येन तृतीयेन वा ध्वजस्तंभाधारं मस्तकार्द्धेन वा कृत्वा तत्रोक्तमंत्रैरत्नादिन्यासं कृत्वा बलिं दत्वाचम्य ।
वास्तुहोमं कृत्वा शंखतूर्यादिघोषेण ध्वजस्तंभदंडमुत्थाप्य प्रासादनिकटमानीय ॥ दंडे षडंगानि ध्व

जेलोकपालानस्त्रशोविन्यसेत्॥ शांतिरस्त्रशिवंचास्त्रखानस्यास्यमंतथा। प्राणिनःसुखिनःसंतु

राजाचविजयीभवेत्। यावच्चंद्रश्चसूर्यश्चतावदाचस्थिरोभव। दुरितंयत्समंतानांसत्क्रियाद्धुनोतुसा

प्रजाहानियदुर्भिक्षंमाभूज्जगतीसर्वदा। त्वत्प्रसादात्तुतत्सर्वंश्रुनेमेवनमोनमइतिस्थापयित्वामूलमं

त्रेणसास्त्रंसांगंपूजयेत्। तथा। ॐघस्फुरघोरघोरतरतनुरूपचटप्रचटकहकहवमबधातयहुं

फट्अस्त्रायनमः। ॐघस्फुरहुंफट्हृदयायनमः। ॐघोरघोरतरहुंफट्शिरसेनमः। ॐतनुरू

पहुंफट्शिखायैनमः। ॐचटप्रचटहुंफट्कवचायनमः। ॐकहकहवमबधातयहुंफट्अस्त्रायफ ११९

शैवे नमः। ध्वजदंडेसंयोज्येशासादेअघोरंपाशुपतंशैवंवामहास्त्रंविन्यसेत्। तत्रगंधादिब्रह्मशिरसादद्या

त्। ॐपरमेश्वरायपरायब्रह्मशिरसायनमः। ॐसर्वयोगाधिकृतायनिधादिपतयेनमः। इतिविद्याधि

पेनगंधं। ज्योतिरूपायैरुद्रायैनमइतिदीपं। गोघ्नपुरुहूतायनमइतिनैवेद्यं। ॐश्रथरपाशुपतायन

मइतिविद्यांगानिचबलिकर्माणिरुद्राफडंतेनमंत्रसमूहेनवानिर्वर्त्यस्वरूपंध्यायेत्। सूर्यकोटिस

हस्राभंप्रलयांबुदनिस्वनं। प्रदीप्तदशनप्रोतंप्रकाशमुखकंधरं। व्यहंतडिद्द्युताजिह्वंप्रदीप्तरमश्रु

मूर्द्धजं। सर्पोपवीतंश्लासिशक्तिमुद्गरधारिणं। चतुर्भुजंचतुर्वक्त्रंस्फुरच्चंद्रार्धशेखरं। देवदानवदै

त्यानांदर्पितानांविमर्दकमिति। ध्वजाग्रेदेवतालिंगसूचनायदेवतावाहनप्रकारोयथा। सौवर्णोरजतो

रत्नमयोमणिमयोश्ममयोदारुमयोवावर्णकैर्लिखितोवाकर्तव्यः। विष्णोर्ध्वजेगरुत्मानीश्वरस्य ध्व

वृषभोब्रह्मणोहंसोजलाधिपतेःक्रौंचःशक्रस्यकुंजरोयमस्यमहिषः। कामस्यमकरः। सूर्यस्य

अश्वःधर्मेदुर्गायांसिंहोगौर्यांगोधागणेशस्यमूषकोधनस्यदेनरोवायोर्मृगोग्नेर्मेषः। कौमारे

सरस्वत्याइंसोयस्यदेवस्ययद्गृहंतंतस्यध्वजेधिवासितंपूजितंबंधनीयं। ततईशानदिग्भागेहतेमंड
लेकृत्वाकुंभंविन्यस्यपार्श्वेमहाध्वजंलंबमानंप्रासादवेष्टनप्रमाणंवस्त्रयुगंजंगृहीत्वायजमा
नस्संलग्ननार्यःपुत्रगोत्रजादिभिःस्त्रिःसकृद्वाप्रासादस्यप्रदक्षिणांविधायसर्पाग्रकेदेववेष्टयेत्
तस्यफलश्रुतिः। यावंतस्तंतवस्तस्यध्वजस्यवरवर्णिनि। तावद्वर्षसहस्राणिकर्तास्वर्गेमहीय
ते। यावत्पदानिकुरुतेध्वजेप्राणीप्रदक्षिणं। तावद्वर्षसहस्राणिकर्तुर्भोगानुजःफलं। अथोचा
र्यःकुंडसमीपमागत्यप्रायश्चित्तहोमंविदध्यात्। अथयजमानोवभृथस्नानंकृत्वाचार्यादिभ्यो १२०
दक्षिणांदत्वाक्षमस्वेति। विसर्जयेत्। यथाविधूयतेपोतरज्जुःप्रासादमस्तके। तथाकर्तास्यजे
त्पापंसप्तजन्मार्जितंक्षणात्। यत्रैतत्क्रियतेराष्ट्रेध्वजयष्टिनिवेशनं। नाकालमृत्युस्तत्रास्ति

नावृष्टिःपापकृत्क्वापि। नोपसर्गभयंतत्रनापिरोगोनविभ्रमः। विपरीतानमंतत्रनराणामपिन्वय
सां। स्वकालवर्षपर्जन्यःसुभिक्षंविजयीन्नृपः। शांतानिसर्वभूतानिपयस्विन्यःपयोभृतः। कृत
घ्नोब्रह्महागोघ्नोहत्याध्वजनिवेशनं। प्राप्नोतिपापनिर्मुक्तिंकर्तुर्मोक्षःकुलद्वयं। प्रतिमालिंगवे
दीनांयावंतःपरमाणवः। तावद्वर्षसहस्राणिकर्तुर्भोगानुजःफलं। कृतेमहाध्वजारोपेह्तत्रापि
चालिताश्चये। शिखिनोनायकान्तत्यान्ततिमान्प्रोपितारयेत्। येषांप्रतानांचकर्माणियांतियो
गंशिवालये। कृत्वाणमपिदारुणितापिकुर्वनसंशयः। इतिध्वजारोपणविधिः। अथचला
र्चानांप्रतिष्ठानारदबोधायनादिप्रोक्ताप्रपंच्यते। तत्रकालनिर्णयोयथा। उदगयनेशुक्लपक्षेपु
ण्याहेनक्षत्रेपुण्यवारेनदीतीरेरम्यवनेपुरस्ताआस्तेदेवगृहेवाप्राच्यामुदीच्यांप्रागुदीच्यांवासमं

भूमिभागं कृत्वा षोडशहस्तं द्वादशहस्तं वा मंडपं पूर्ववत् कृत्वा तत्राग्नेयकोणे चतुरस्रमेकहस्तं कुं
डं प्राच्यां दिशि हस्तद्वयमितां वेदिं चतुरस्रामीशाने स्नपनोपकरणस्थानं ॥ नैर्ऋते वास्तुस्थापनं ॥
मंडपमध्ये यथोक्तमंडलस्थापनं ॥ तदुत्तरतः स्वस्तिकोपरि शय्यास्थापनमेवं मंडपं विरचय्य ॥ पूर्वे
द्युः पुण्याहवाचनं मातृपूजनं कृत्वा चतुरो ब्राह्मणान्वृत्वा द्वारपूजादि पूर्ववास्तुपूजांतं कृत्वा कुं
डसमीपमेत्याग्निं प्रतिष्ठाप्यान्वाधानं कृत्वा गोपयसि नीवारचरुं स्थाप्य देवदेवत्यं श्रपयित्वाज्य
भागाविष्ट्वा पलाशादीष्टसमिधां प्रत्येकमष्टसहस्रं लोकपालमंत्रैः प्रतिदैवतं याहुतिं निर्वर्ज्य १२१
कुर्यात् ॥ तावत्संख्याकमाज्यहोमं स्थाप्यदेवलिंगकेन मंत्रेण समिति तिलनीवारचर्वाज्यानां प्रति
द्रव्यं दशदशाहुतीर्हुत्वाग्निर्यजुर्भिरित्यनुवाकेन दशाज्याहुतिं हुत्वा स्विष्टकृतं चरुशेषेण

हुत्वाष्टोत्तरसहस्रमष्टशतं वा स्थाप्यदेवतामंत्रजपं कुर्यात् ॥ अथ यजमान आचार्यं वरं दत्वा ब्राह्मण
गंधाद्यैः संपूज्य पुण्याहं वाचयित्वा शंखडिंडिमशब्देनाचार्यमुपवेशयेत् ॥ पयः पृथिव्यामिति पंचग
व्येन ॥ आप्यायस्वेति क्षीरेण दधिक्राव्ण इति दध्ना ॥ तेजोसीति पुराणेन घृतेन ॥ मधुवाता इति मधुना
आयं गौरिति शर्करया ॥ शन्नो देवीरिति सर्वकलशेन संस्नापनमस्कृत्य श्रीखंडाद्यैर्देवमनुलि
प्य स्वर्णोष्णोदकेन प्रक्षाल्य चतुर्भिः कलशैः समुद्रज्येष्ठा इति चतुर्भिर्मंत्रैरन्यैश्च कलशलिंगैरा कलशे
ष्वित्यादिकैरभिषिंच्य देवं मंडपे निवेश्याष्टौ कलशान् वारिपूर्णान् स्थापयित्वा पूर्वादिक्रमेण संगम
वराहोत्खातवल्मीकादिमृदः प्रथमे विकिरेत् ॥ अश्मंतकलचर्जुनचूतादिपल्लवान् द्वितीये ॥
शेषेषु क्रमेण कुशखंडानि ॥ शांत्युदकं ॥ प्रस्रवणोदकं ॥ गंधोदकमच्छतान् पुष्पाणि निक्षिपेत् ॥ अथा

चार्यैर्ब्राह्मणान्वितःस्थापनक्रमेणतानुद्धृत्यस्नापयेत्॥ आपोहिष्ठामयोभुवइतितिसृभिर्हिरण्यव
र्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइतिचैतेनानुवाकेनस्नापयित्वाहतेवाससीपरि
धाप्योपवीतंचदत्वागंधपुष्पधूपदीपैःसंपूज्याष्टभिःप्रदीपैःपिष्टमयैर्नीराजनंकृत्वाहिरण्मयींग
र्भइत्याद्यष्टभिः॥ हिरण्यशलाकामादायचित्रंदेवानामित्यर्धर्चेनदेवनेत्रोन्मीलनंकृत्वाअंजंति
त्वामध्वरेदेवयंतइत्यंजनेनांजयेत्॥ मधुघृतशर्कराभिर्देवस्यत्वेतिपुनरंजये॥ तद्वाथैकोपिनाति
ष्ठेत्॥ ततोमध्वाज्यादर्शादिशीघ्रंदर्शयेत्॥ अथदर्भेष्वासीनोदर्भान्धारयमाणःपुरुषसूक्तेनसा १२२
मिधेनीकल्पेनदेवमनुसंशेत्॥ अथवैणमयेपात्रेप्रक्षिप्यान्नंपंचवर्णान्वितंदेवस्यनिराजनंब्रा
ह्मणेननिराज्यबलिंनमोऽमृताधिपतयेदितिशूलधरायोमापतयेसर्वविद्याधिपतयेरुद्रायनमःशिव

मार्गहितंकर्मास्तुस्वाहेत्यभिधायबलिमनवेक्षमाणोदद्यात्॥ ततःप्रत्यागत्यःशुद्धोहस्तपादौप्रक्षा
ल्याचामेतविप्रश्चैवदेवगाहेत्॥ आचार्यमंडलदेवताःषोडशोपचारैःश्चंदनादिभिःपूर्ववत्पूजयेत्॥ अ
थाचार्यः॥ स्थाप्यदेवतल्लिंगकैर्मंत्रेणवाह्यकर्णिकायांप्रतिष्ठाप्यगंधाद्यैःसंपूज्यकुंडसमीपमाग
त्यमंडलदेवतानांनाममंत्रैर्दशदशतिलाहुतीर्हुत्वापूर्वकल्पितशय्यायांब्राह्मणैःसहप्रतिमारो
प्यपुरुषसूक्तोत्तरनारायणेनोपतिष्ठेत्॥ ततःसृष्टिक्रमेणप्रतिमायांतत्वन्यासंकुर्यात्॥ तद्यथा॥ पु
रुषात्मनेनमः॥ प्राणात्मनेनमइतिशरीरव्यापकंन्यसेत्॥ प्रकृतितत्वायनमोहृदि॥ रसतत्वायबस्तौ
॥ गंधतत्वायपादयोः॥ श्रोत्रतत्वायकर्णयोः॥ त्वक्तत्वायसर्वशरीरे॥ चक्षुस्तत्वायचक्षुषोः॥ जिह्वात
त्वायजिह्वायां॥ घ्राणतत्वायघ्राणे॥ वाक्तत्वायवाचि॥ पाणितत्वायपाण्योः॥ पादतत्वायपादयोः॥

पायुतत्वायपायौ॥उपस्थतत्वायोपस्थे॥पृथिवीतत्वायपादयोः॥अप्तत्वायवस्तौ॥तेजस्तत्वायहृदि॥
वायुतत्वायघ्राणे॥आकाशतत्वायशिरसि॥रजस्तत्वायतमस्तत्वायसत्वतत्वायदेहतत्वायन
मइति चतुष्टयंदेहे॥एवंन्यासंकृत्वापुरुषसूक्तन्यासंविधायान्यच्चाधिवासयेत्॥ततोमंडपरा
प्रयोरंतरालेनगंतव्यमितिप्रैषंविधायमंडलदेवतानामुपाहारंनिवेदयेत्॥तत्रसर्वान्नंब्रह्मणे॥
घृतान्नमुदकाग्निधारितमिंद्राय॥आज्यान्नमग्नये॥मांसान्नंयमाय॥कृष्णव्रीहिजमन्नंपुराणस
पिशायुतंनैर्ऋतये॥नवनीतोदनंवरुणाय॥यवोदनंवायवे॥शेषंगवंसोमाय॥गावेधूकमीशानाय १२३
अशक्तौपायसंवासर्वेभ्यः॥ततःशय्याप्रदेशकृत्तशेषंनैवारंचरुंप्रतिष्ठाप्यतेनदिग्बलिंदत्वागीत
वाद्यादिनारात्रिमतिवाहयेत्॥इतिचलार्चानामधिवासनं॥अथप्रातःतेपुरोदयात्देवमुत्थाप्य

पुरुषेणनारायणेनोपस्थायनमस्तस्मैघृतेचरुंश्रपयित्वाआज्येनाभिघार्यनमस्तस्मैकृत्वामूलमंत्रे
णाष्टोत्तरंकृत्वावदग्नानिजुहोति॥तद्यथा॥अग्नयेस्वाहा॥सोमायस्वाहा॥धन्वंतरयेस्वाहा॥कुह्वै॥अ
नुमत्यै॥प्रजापतयेस्वाहा॥परमेष्ठिने॥ब्रह्मणे॥अग्नये॥सोमाय॥अग्नयेन्नादाय॥अग्नयेन्नपतये
प्रजापतये॥विश्वेभ्योदेवेभ्यः॥सर्वेभ्योदेवेभ्यः॥सर्वेभ्योभूतेभ्यः॥भूर्भुवःस्वः॥अग्नयेस्विष्टकृतेस्वा
हेतिततोजयाप्रभृतिधेनुवरदानांतंसमापयेत्॥अथोदितेसूर्येमेरोरभिमुखंदेवंवेद्यांकृत्वासर्व
रत्नऔषधीपुष्पमूलफलऔषधीरितिदर्शयित्वाताम्रपात्रेशांतितोयमादायमूलमंत्रेणशतवा
रमभिमंत्र्याचार्यःसिरसिदेवमासिच्योत्तिष्ठब्रह्मणस्पतइत्युत्थाप्यविश्वतश्चक्षुरित्युपस्थायध्या
नेनदेवस्यादस्तात्ब्रह्मशिलांप्रकल्प्यध्यानेनवरत्नादिन्यासंकुर्यात्॥अथाचार्योदेवस्यपुरस्ताद्दर्भे

आसीनो दर्भान्धारयमाणो ऽञ्जलिं बध्वा जपेत् ॥ तद्यथा ॥ ॐ ब्रह्मणे नमो विष्णवे नमो रुद्राय नमः इंद्राय नमो
ऽग्नये नमो यमाय नमो नैरृतये नमो वरुणाय नमो वायवे नमः सोमाय नमः ईशानाय नमो वसुभ्यो
नमो रुद्रेभ्यो नमो आदित्येभ्यो नमः अश्विभ्यां नमो मरुद्भ्यो नमः कुबेराय नमो गंगादिभ्यो महनदी
भ्यो नमो ऽग्नीसोमाभ्यां नमः इंद्राग्निभ्यां नमो द्यावापृथिवीभ्यां नमो धन्वंतरे नमः सर्वेसाय नमो विश्वेभ्यो
देवेभ्यो नमो ब्रह्मणे नमः इति जप्त्वा ॥ अथ नवैः कलशैः पञ्चकषायसर्वौषधीर्निधाय यजमानस्य पुर
तः संस्थाप्य कुंभमुखे हस्तं दत्वा अष्टवते मंत्रैरभिमंत्र्य तीर्थन्यावाह्य देवस्य पुरतो यजमानमभिषिं १२४
चेत् ॥ अथाचार्यः स्नुमेन ऽग्रे देवमंत्रं जप्त्वा अष्टकस्त्रेण तल्लिंगमंत्रेण पुरुषसूक्तेन गायत्र्या व्याहृति
निर्देवं प्रतिष्ठाप्य निष्कलसकलं धारयेत् ॥ पृथिवीं पिंडिकायां ध्यात्वा मृत्तिकामाकाशं ततस्तेजो राशिं

रूप्यते ॥ शुभतिथिवारयोगकरणनक्षत्रे पुण्याहे तत्र जीर्णादिदोषदुष्टानां देवपिंडिकावाहनप्रभृतिप्रा
साद ध्वजदंडकलशादीनां जीर्णोद्धारं कुर्वाणः सुखं फलं लभते ॥ तत्र दक्षिणस्यामीशान्यां वा दिशि स्व
वित्तप्रमितिमेकद्वारं सर्वतः ॥ प्रछन्नं तोरणं पताकाद्यालंकृतं वेदिकाद्यं [illegible]तं मंडपं विधाय यजमानः
स्वगृहे नांदीमुखं कृत्वा आचार्यमृत्विजश्च वृत्वा माल्यवस्त्रकनकाद्यैः पूजयेत् ॥ अथाचार्यो मंडपमा
गत्य द्वारपूजादिकं शिवकुंभपूजादि तत्कर्म कृत्वा वेद्यां वास्तुमंडलं निर्माय तयोर्देवस्थापनं विधाय
भूमौ वालुकानिर्मिते स्थंडिले पीठे वा प्रणवेनासनं दत्वा ॐ व्यापकेश्वर एह्येहि नमः ॥ ॐ व्यापकेश्वर १२५
हृदयाय नमः ॥ ॐ व्यापकेश्वर शिरसे स्वाहा ॥ ॐ व्यापकेश्वर शिखायै वषट् ॥ ॐ व्यापकेश्वर कवचाय हुं ॥
ॐ व्यापकेश्वर नेत्रत्रयाय वषट् ॥ ॐ व्यापकेश्वर अस्त्राय फट् ॥ एवमंगसहितेनाममनिमंत्रैर्नगर्वतेशि

करचरणाद्यवयवैर्युतं चतुर्भुजं परमात्मज्योतिःस्वरूपं सर्वाभरणभूषितं नानारत्नकिरीटोज्वलं सह
स्रार्कसमप्रभं देवदेवेशं शंखचक्राद्यायुधधरं तं निजवाहनाधिरूपेतं स्वरूपं प्रतिमायां ध्यात्वा निजहृत्क
मलमध्ये सर्वलोकसाक्षिणं क्षेत्रज्ञमणीयांसं ध्यात्वा परमेष्ठिना तमादाय प्रतिमां हृदि पूर्ववद्वि
न्यस्य प्रणवेन निरुध्य संजीवं ध्यात्वा मूर्त्तिविंगानि विन्यस्य पार्श्वतः परिवारं स्वेषु स्थानेषु ॥ ततस्तत्रस्थि
त्वा देवाय मुद्रां संदर्श्य मूलमंत्रमष्टोत्तरशतं जप्त्वा पुरुषसूक्तेन स्तुत्वा प्रणम्याचम्य ब्राह्मणान्स्व
स्तिवाचयित्वा तेभ्यो दक्षिणां दापयेत् ॥ अथ यजमान आचार्यस्य दक्षिणां समर्प्य नमस्कृत्य ब्राह्म
णान्भोजयित्वा सर्वयज्ञफलं प्राप्नोति ॥ दीर्घायुर्भवति स्वर्गलोके चिरं सुखमनुभूय मर्त्यलोके सर्व
कामसमृद्धिमान्भवति ॥ ततो ह्ययं सुखं च लभते ॥ इति चलार्चाप्रतिष्ठाविधिः ॥ अथ जीर्णोद्धारविधि

वं पूजयेत् ॥ देवतांतरैर्द्वारे पुनः पुनः पूर्ववन्मूलमंत्रेण तं तमर्चयेत् ॥ अथाघोरेणाष्टोत्तरशतं जपं कृ
त्वा सौवर्णेन पद्मेन पुनर्देवं प्रपूज्य स्थंडिले पूर्वोक्तलक्षणे कुंडे वह्निं लिखित्वा रक्ते वाग्निं प्रतिष्ठाप्य सं
हारक्रमेण मूर्तिमूर्तिपतिमंत्रतर्पणं कृत्वाघोरेण घृतसर्षपैः सह स्वं कृत्वा पूर्णां दत्त्वा वास्तुपू
जां विधाय देवं प्रणम्य विसृज्य बहिर्निर्गत्य दिग्बलिं दत्त्वा घृतपायसेन पंच शिवलिंगिनो भोजयेत्
॥ अर्कैरंगाघकरणे अष्टौ ब्राह्मणान् ॥ तेभ्यो यथाशक्ति दक्षिणां दत्त्वा स्वस्तिवाचयित्वा जीर्णं देवं प्रणवे
न संस्नाप्य संपूज्याचम्य कृतशकलीकरणः स्थंडिलस्थं देवं विन्यस्य पूर्ववत्संपूज्य मंडपदेवताहोमं कृ
त्वा पूर्णाहुतिं च देवाय विनिवेद्य देवस्य जीर्णदोषं श्रापयेत् ॥ तद्यथा ॥ दुष्टलिंगमिदं शंभो शांतिरु
रणस्य चेत् ॥ रुचिस्त्वविधिनाशस्य गाधितिष्ठतमां शिव ॥ जीर्णभग्नमिदं देवं सर्वदोषावहं नृणां ॥ अस्यो

द्वारे कृते शांतिः शास्त्रेस्मिन्कथिता त्वया । जीर्णोद्धारविधानं च नृपराष्ट्रहितावहं । तदस्त्राधिष्ठितां देवश्रो
ष्ठ्रामितवाज्ञया । एवं कुर्वीत ज्ञानेन लब्धानुज्ञः कुंडांतिकं गत्वाह्नीराज्यमधुदूर्वाभिः क्षीरवृक्षस
मिद्भिः पालाशीभिर्वा मूलमंत्रेणाष्टोत्तरसहस्रं अष्टोत्तरशतं वा कृत्वांगानां दशांशेन । ततो लिंग
चालनार्थं सहस्रं कृत्वा पुनरपि मया संस्थापनं कर्त्तव्यमिति प्रतिज्ञाय शतं पूर्वोक्तैर्द्रव्यैः पायसेन
वा जुहुयात् । ततः सौवर्णपुष्पसहस्रेण स्थंडिले देवपूजनं कुर्यात् । पूजां देवाय निवेद्य मंत्रवर्ज्जं
पुनः संपूज्य लब्धानुज्ञः सहायशिल्पियुतो जीर्णलिंगसमीपं गत्वा अर्घं दत्वा मंगलगीतादिनि १२६
स्वनेन प्रणवेन देवं संस्नाप्य संपूज्य तत्रस्थमंत्रं स्थापयेत् । लिंगरूपं समागत्य येनेदं समधिष्ठि
तं । यायात्तं स्थमितं स्थानं संत्यज्य वै नशिवाज्ञया । अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता । शिवे
न सह संतिष्ठेत्वित्युक्त्वा लिंगस्थं पिशाचादि शिवास्त्रेण सर्षपैः संताड्यार्घ्यदानेन विसर्जयेत् । अ
यास्त्राभिः मंत्रिततोयेन लिंगमवसिच्य ततः स्थंडिले पाशुपतास्त्रेण लिंगं ब्रह्मादिभागत्रयेण स
हस्रं सहस्रे शांतिकं मनसा कुशैस्संप्रोक्ष्य कुशैः संस्पृश्य पूर्ववद्धोमयेत् । दारुजमपि होमसंख्य
जपेन संस्कुर्यात् । एवं कृत्वा विलोमेनार्घं दत्वा मूर्त्तिमूर्त्तिपितत्वतत्वाधिपक्रियाशक्तिपीठमंत्रा
न्मूर्त्तौ च मूर्त्यादिमां ज्ञानज्ञानशक्त्या सह न्यासक्रमेण शिवं शांगं विसर्जयेत् । सति चंडेश्वरे चंडे
राष्ट्रनृपयोः शांतिरस्त्वित्युक्त्वाघोरेण यजमानहस्ते हेममयं कंकणं बध्वा हेमेन खनित्रेणास्त्र
मंत्रितेनैशान्यां नादिसमेतात् श्वभ्रमपशाच्य खनित्वा लिंगमूलं सब्रह्मशिलं शोधयित्वा हेमया
श्युक्तया बालरज्वा शिलादिकं शिरवामंत्रेण बध्वा । अथ पाशुपतेन वृषभस्य वृषनयोर्वा केकृ

देशेगोवालरज्जुंनियुज्यप्रतिमाच्छेदनंतत्प्रतिपत्तिदेशेनयेत्॥ प्रतिमायांतुवृषभंविनाचार्यःशिल्पि-
भिःसहोद्धरेत्॥ अथतत्प्रतिपत्तिरुच्यते॥ लिंगंशिलान्वितंप्रतिमापिंडिकागरुडवृषभव्योमादिकं
चापन्नेत्॥ शैलरत्नोत्थमपिलिंगंचतत्स्थंनिर्माल्यमादायचंडायनिवेद्यरथमारोप्यतरुच्छायापर्यं
तदेशेष्ठतन्मूलेअगाधनदीह्रदेवावामदेवेननिक्षिपेत्॥ दारुजंचेद्ग्रामाउत्तरतोनीत्वामधुना
न्यज्याघोरेणशिववह्निनानिर्दहेत्॥ अथरत्नजंलिंगंदग्धंसयदिस्वकांतिंनजहातितदातदेव
पूर्ववत्स्थापयेत्॥ सुवर्णादिलोहमयंतदेवसज्जंकृत्वास्थापयेत्॥ अनेनैवविधिनाचूलकंध्वजा १२२
दिकंविसर्जयेत्॥ प्रासादेजीर्णोद्धारेप्रासादमंत्रान्खड्गेच्छुरिकायांवासंयोज्यलिंगवत्संरक्ष्यप्रासाद
निष्पत्तिपर्यंतंखड्गादिकंपूजयेत्॥ प्रासादेनिष्पन्नेखड्गान्मंत्रान्समाकृष्यसमुदायेनयथास्थानं

प्रतिष्ठाकालेमंत्रन्यासःकर्तव्यः॥ एवंजीर्णादिकमुद्धृत्यतत्प्रतिपत्तिंकृत्वागत्यस्थंडिलेशिवंसंपूज्य
विधायमंडलदेवतातर्पणंकृत्वापुष्टार्थंशतंकृत्वादिक्पतिवास्तुहोमंचकृत्वास्त्रमंत्रेणप्रासादरक्ष-
क्षांविधायसहस्रमस्त्रेणाष्टोत्तरशतंवाकृत्वापूर्णांदत्वाशिवायनिवेद्य॥ अघोरेणत्रिमध्वक्तैस्तिलैः
सहस्रंसर्वशांतयेकृत्वाशिवायनिवेद्य॥ जानुभ्यामवनींगत्वाकुर्यादिमंत्रणंविभोः॥ भगवन्भूतन
व्येशलोकनाथजगत्पते॥ जीर्णलिंगसमुद्धारःकृतस्तवाज्ञया॥ अग्निनादारुजंभस्मदग्धं
क्षिप्तंशैलादिकंजले॥ प्रायश्चित्तायदेवेशअघोरास्त्रेणतर्पितं॥ ज्ञानतोज्ञानतोवापियथोक्तंनकृ-
तंयदि॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वर॥ कर्तुरास्तःप्रजानांचशांतिर्भवतुसर्वदा॥ अस्माकं
शिल्पिनांचैवसुप्रीतोभवसर्वदा॥ अथाहृतपुष्पफलंचंदनहस्तोयजमानोदेवंप्रार्थयेत्॥ गोवि

प्रशिल्पिनृपाणामाचार्यस्य च यज्वनः ॥ शांतिर्भवतु देवेश अच्छिद्रं जायतामिदं ॥ तच्छ्रुत्वानुज्ञास्ततो देवम
र्घ्यं दत्वा विसर्जयेत् ॥ ततः कृताभिषेको यजमानो दक्षिणाभिराचार्यादीन्पूजयेत् ॥ वृषभं वृषभौ वा रव
नित्रे हैमं पाशौ पुनराचार्याय दत्वा विसर्जयेत् ॥ लिंगं तन्मानं तत्रैव विधिवत्स्थापयेद्गुरुः ॥ असुरैर्मु
निभिर्देवैस्तत्त्वविद्भिः प्रतिष्ठितं ॥ जीर्णं वाप्यथवा भग्नं विधिनानेन चालयेत् ॥ एष एव विधिः कार्यो जी
र्णोद्धारसमुद्धृतौ ॥ खड्गमंडपगर्णे न्यस्य कारयेन्मंदिरांतरं ॥ संकोचे मरणं प्रोक्तं विस्तारे तु धनक्ष
यः ॥ तत्स्वयं श्रेष्ठद्रव्यं वा तत्कार्यं तिल्यमाणकौ ॥ प्रासादप्रतिमायां जीर्णोद्धारविशेषः ॥ तत्रैवेशानभा १२९
गे सोमेशानांतरे वा प्रत्यग्द्वारं नवं गृहं कारयित्वा पंचगव्येनाभ्युक्ष्य समलंकृत्य तत्र यथास्थानं पादशि
लान्यासोक्तरीत्या रत्नन्यासं विधायासनं परिकल्प्य मूलाचार्यं जानुमात्रं वा ह्यतदारूर्तिंक्त

त्वा पूर्ववत्संस्थाप्य कृत्वा घोरेति मंत्रेण प्रतिष्ठाप्य स्थिरीकृत्य गंधाद्यैः समभ्यर्च्य ॥ अथ जीर्णेशप्रासादगर्भगे
हं प्रविश्य कुंभनिरुदकैः प्रक्षाल्य प्रतिमामभ्यर्च्य कुंभे स्थंडिले वा जीर्णप्रतिमास्थतत्त्वानि सृष्टिमार्गेण
कृत्वा पुनः संहारक्रमेण कृत्वा ॥ अथ मूर्त्यामपि सृष्टिसंहारवर्त्मना तत्त्वानि ध्यात्वा लोहमयं पात्रं गंध
वारिणा पूर्य गंधवारिणाभ्यर्च्य ध्यानेन तत्र तत्त्वानि विन्यस्य समस्तेंद्रिययुक्तं सूक्ष्मदेहान्वितं मूल
संज्ञकं देवं नियोज्य तमेवं विज्ञापयेत् ॥ तद्यथा ॥ त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ ॥ वासं कुरु
सुरश्रेष्ठ तावत्त्वं चान्यके गृहे ॥ वसस्व केशं सहितं देहमूर्तिं वितत्पूर्ववत् ॥ यावत्कारयते भक्तः कुरु तस्य
च वांछितं ॥ निर्माणविषये कालावधिं कुर्यात् ॥ तद्यथा ॥ अर्वाङ्मासात्षण्मासाद्वा स्वशक्त्यनुरूपतः
पर्यालोच्यैतावतीह काले देवत्वत्कार्यं करोम्यहमिति यजमानो विज्ञापयेत् ॥ अंतं त्वद्भुत्तं देवपार्श्वे

विधायतल्लोहपात्रंतद्देवशिरसिसंस्थाप्यदिग्बलिंदत्वाचम्पततःप्रनृत्यवलंबित्तंनवतरंप्रासादंप्रति
थ मांचकुर्यात्॥ अनिषन्नयोस्तयोसहयजमानआचार्यःप्रतिष्ठायोग्यकालमनवेक्षमाणःश्चनेह
निपूर्ववित्प्रतिष्ठायागमारभ्यप्रतिमायाःशय्यायांमंत्रन्यासारंभंयावत्सर्वंनिष्पाद्याथलोहपात्र्योध्या
नेनमंत्रादिकमादायशयनस्यपूर्वविद्यथाप्रदेशंतत्रयोजयेत्॥ अथोत्तरंकर्मप्राग्वत्समर्थंकृ
त्वायागंसमापयेदिति॥ ॥इतिश्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायांप्रतिष्ठापद्धतौजीर्णो
द्धारविधिः॥ ॥अथवापीकूपदीर्घिकापुष्करिणीनामुद्यापनविधिर्व्याख्यास्यामः॥तत्रकालनिर्ण १२९
योयथा॥उदगयनआपूर्यमाणपक्षेपुण्याहेस्थिरनक्षत्रयोगेतडागस्यकार्तिकेमासिजलप्रधा
नत्वात्प्रतिष्ठाकर्तव्या॥तत्रादौतडागस्यपालशीर्षेवाप्यादीनांपुनःपश्चिमदिग्भागेतद्दक्षिणे

पूर्वेशानोत्तराणामन्यतमोवोदक्प्रवणेनातिदूरेनातिसमीपेदेशेषोडशहस्तंद्वादशहस्तंवादश
हस्तंवाचतुरस्रंचतुर्द्वारमंडपंकृत्वाश्वत्थोडुंबरप्लक्षवटशाखामयतोरणान्युच्छ्रयेत्॥पंचहस्तानित
दर्धविस्ताराणिहस्तमात्रावखातानिउत्तरांगेमुंडहस्तमात्राणिशूलोपेतानितत्तत्फलकतोरणयु
क्तानिपूर्वादिदिक्षुद्वाराणिकृत्वा॥मंडपमध्येचपंचहस्तावाचतुर्हस्तावाहस्तोच्छ्रयाकूर्मपृष्ठोन्न
तावेदिका॥तस्याश्चतुर्दिक्षुत्रयोदशांगुलांतरंत्यक्त्वाकुंडानिकुंडयुक्तानिसर्वतोहस्तमात्राणि
चतुरस्राणिचतुस्त्र्यंगुलविस्तारोच्छ्रयाणित्रिमेखलानि॥वितस्तिमात्रायामासप्तांगुलविस्तृ
तयोनिचत्वारिकुंडानि॥पंचममेवंविधमेववेद्याईशानभागेआचार्यकुंडं॥तस्येशानभागेनवग्रहपी
ठंवास्तुमंडलं॥नवग्रहमखोक्तसंभारान्विधायवक्ष्यमाणंयूपादिकृत्वामौक्तादितिकावेदितेक्षि

पूर्वेद्युर्यजमानगृहे स्वस्तिपुण्याहवाचनं मातृपूजाभ्युदयिकं निवर्त्य षोडशाष्टौ ऋत्विजो द्वारपाला
नष्टौ चतुरो वा जापकाननपि वरणीयात् । तद्यथा । अद्यामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं पु
ष्करिण्यादिप्रतिष्ठायागांगहोमादिकारयितुमर्घ्यवासोयुगलादिना द्रव्येण ब्रह्माणमाचार्यमृत्वि
जं त्वामहं वृणे । वृतोस्मीति प्रतिवचनं । मधुपर्कविधिना ब्रह्ममुख्यान्पूजयित्वा सौवर्णकुंडलके
यूरकटकांगुलीयकवस्त्रैश्चाचार्यमृत्विक्प्रदेयेभ्योद्विगुणैः । ततो ब्रह्मघोषेण तूर्यमंगलशब्देन च ग
सर्वैर्यजमानान्वितायजनदेशं गत्वासनामंडपे उपकरणजातं संस्थाप्योपविशेयुः । अथाचार्यो १३०
मंडपमागत्य बहिःस्थित्वाग्निमीलइति तोरणमभिमंत्रयेत् । पर्जन्यायइति पूजयेत् । दक्षिणेइ
षेत्वेति शांतिदायनमः । ॐ अग्न आयाहीति पश्चिमे पालाशायनमः । शन्नो देवीरित्युत्तरे चंद्रलेखा

यनमः । द्वारस्तंभेषु त्रीस्त्रीनादित्यानिजनामंत्रैः पूजयेत् । वज्रबाहवे नमः । चित्रगुप्तायनमः । द्वारशा
खयोः पूर्वद्वारस्याप्राच्यै । महाकर्णायनमः । गंभीराक्षायनमः । दक्षिणे सुमुखायनमः । नोदनाम्नाय
नमः । पश्चिमे महारावायनमः । बलायनमः उत्तरे । अथपूर्वादिद्वारे पार्श्वे आयुधनिभांपताकामि
न्द्रायैंद्रीकृतीन्द्राय दद्यात् । रक्तामग्निर्हूतमित्यग्नये । धूम्रामायंगौरितियमस्य । कृष्णामसुन्वंतमि
तिनिर्ऋतये । श्वेतामिमंमेवरुणमितिवरुणाय । पीतांकाणाशिशुरितिवायवे । श्वेतामाप्यायस्वे
तिसोमाय । श्वेतामावोराजानमितीशानाय मेघवर्णांनमोस्तुसर्पेभ्यइत्यनंताय । रक्तांब्रह्मज
ज्ञानमितिब्रह्मणे । पंचवर्णंमहाध्वजंच । ततोलोकपालेभ्योगंधादिपूर्वकंबलिंदद्यात्स्वैःस्वैर्मं
त्रैः । कुमुदादिभ्योपि ध्वजदेवताभ्यः । अस्मे रुद्राइतिरुद्रेभ्यः । त्र्यंबकमितिभूतेभ्यः । क्षेत्रस्यपति

नेतिक्षेत्रपालायबलिंदत्वागम्य ॥ पूर्वद्वारशाखामूलयोर्द्वौकलशौवारिपूर्णौरत्नगर्भौसवस्त्रौसपल्ल
वौविश्वासामितिप्रतिष्ठापयेत् ॥ दक्षिणद्वारेआजिघ्रेति ॥ पश्चिमेआविशाकलशमिति ॥ तद्वद्यु
तीत्युत्तरे ॥ द्वौद्वौकलशौस्थापयित्वापश्चिमद्वारेणप्रविश्यविद्याःशाद्वाक्षिण्येनदक्षिणतोगत्वातत्रो
पविश्यप्राणायामंकृत्वावेद्युपरीशाननागमंडलेवास्तुंपूजयेत् ॥ तत्रादौपूजयेद्वास्तुंवेदास्त्ररुद्रना
जिते ॥ कोणेषुत्रिदशाःपूज्याईशाग्निपितृवायवः ॥ एकैकपदमारूढाःपर्जन्याद्यायथायथं ॥ आपा
द्याःकर्णकोष्ठस्थामरीच्याद्यादशानुगाः ॥ ब्रह्मामध्यप्रदेशेत्रपंचविंशतिकोष्ठके ॥ यजेद्वास्तुपति १३१
च्छायांवारुण्यांमंडलेष्टुमे ॥ परिगृहीतनूमध्येपारभेतयथाविधि ॥ ॥ कल्पेषुपुनरन्यद्वास्तुकथ्यते ॥
तत्रापिपूजयेद्वास्तुंविंबेनास्करभाजिते ॥ ईशस्याग्निमृगश्चैवपितरोगामहद्भृति ॥ ईशादीशानके

षुसार्धद्विपदनायकाः ॥ पर्जन्याद्यास्तुपादस्थाआपाद्याःपदयुग्मकाः ॥ भानुनागामरीच्याद्याब्रह्मा
षट्त्रिंशदंशगः ॥ चरक्याद्याबहिःपूज्याःस्कंदाद्यादिक्षुपूर्ववत् ॥ इतिवास्तुपूजांकृत्वायूपप्रतिष्ठां
कुर्यात् ॥ तद्यथा ॥ कदंबाश्वत्थवैकंकतपालाशबिल्वजःशिरःसंमितोयूपोब्राह्मणस्य ॥ न्यग्रोधख
दिराश्वत्थबिल्वकाश्मर्यमयःकंठसंमितोराजन्यस्य ॥ उदुंबरमधूकार्जुनप्लक्षमयऊरुप्रमाणो
वैश्यस्य ॥ बिभीतकोदुंबरशाल्मलीसारदारुमयोनाभिप्रमाणःशूद्रस्य ॥ सर्वेषामविशेषेण
त्रिरत्निमात्रोयजमानसंमितोवायूपोभवति ॥ अथवेदिकापर्युत्तरदेशेश्वभ्रंकृत्वायवमतीनिरद्भि
रभ्युक्ष्येत्याद्धैकिषुलवतयइति ॥ तस्मिंश्वभ्रेप्रतिष्ठाप्यकुंकुमेनसमालभ्यपुष्पधूपैःसंपूज्ययुवासुवासा
इतिवस्त्रयुग्मेनाच्छाद्यनैवेद्यादिनापूजयित्वान्नमयंत्वाध्वर्यनिमंत्र्यतस्यदक्षिणदिग्भागेवर्णकैर्मंडलं

कुर्यात्॥ चक्राब्जविधिना षोडशारं चक्रं तन्मध्ये ष्टदलं सकर्णिकं पद्मं मंडलस्य बहिः सत्वरजस्तमो
भिः परिधित्रयं कृत्वा दिक्षु विदिक्षु आ रौद्रिक्रमेण गृहीतैः स्वनाममंत्रैरष्टौ ग्रहान्स्थापयेत्॥ त्रा
तारमिंद्रं त्वन्नो अग्ने स्तु गन्तु पंथा प्रसुन्वंतं तत्वायाम्यानो नियुद्भिर्वयर्ठ सोमतमीशानमित्येतैर्मं
त्रैर्लोकपालान्न्यष्टौ॥ अथवा गुसोमौ तरालादीन्कृत्वा लोकपालांतरालेषु यथासंख्यं॥ वसुभ्यो नम
इति वसून्॥ रुद्रेभ्यो नम इति रुद्रान्॥ आदित्येभ्यो नम इत्यादित्या॥ अश्विभ्यां नम इत्यश्विनौ॥ वि
श्वेभ्यो देवेभ्यो नम इति विश्वांदेवान् नम इति गंधर्वान्नैव॥ अप्सरोभ्यो नम इत्यप्सरसः॥ अथ से १३२
न्यासु ब्रह्मपत्रेषु स्कंदाय नम इति स्कंदं॥ दक्षाय नम इति दक्षं॥ विघ्नवेन नम इति विघ्नं॥ दुर्गायै नम
इति दुर्गां॥ स्वधाकाराय नम इति स्वधाकारं॥ मृत्यवे नम इत्वेवं रोगं॥ गणेशाय नम इति ग

णेशं॥ ब्रह्मणे नम इति ब्रह्माणं॥ विष्णवे नम इति विष्णुं॥ रुद्राय नम इति रुद्रं॥ लक्ष्म्यै नम इति लक्ष्मीं॥ अं
बिकायै नम इत्यंबिकां॥ सावित्र्यै नम इति सावित्रीं॥ सरिद्भ्यो नम इति सरितः॥ समुद्रेभ्यो नम इति स
मुद्रान्॥ ब्रह्मणपादमूले मृतेभ्यो नम इति घृतयाम प्रतिष्ठाप्य तत्र षोडशोपचारैः पूजयित्वा॥ ततो
जलचराणि अधिवासयेत्॥ सौवर्णः कूर्मः॥ ताम्रमयो मकरः॥ सौवर्णौ राजतौ वा मत्स्यदुंदुभौ॥ सीस
कमयो वा डुंडुभः कुलीरमंडुकौ ताम्रमयौ॥ मंडूकस्तु पुकमयो वा जलूकाशिंशुमारी राजतौ ग्राहसौ वा
हंसादयो ये शुक्लास्ते राजता॥ चक्रवाकादयो ये पीतास्ते सौवर्णाः॥ ये रक्तास्ते ताम्राः॥ ये कृष्णास्ते
सीसकाः॥ पद्मानि मरकनालापन्नरागादि निर्मितानि॥ रौप्यं नागाष्टकं॥ अन्यजलचरजातं च॥ तद्
तत्सर्वं विशापात्रे निधाय पश्चाद्गंधैरनुलिप्य संपूज्य ताम्रपात्र्यामेषवे प्रतिष्ठानामेति चैकपरिस

स्थापयित्वा तत्पार्श्वे फलिन्युशीरसर्पाक्षीरुद्रदेवीयष्टिकाकमठपंचगंधोदककलशं सैरंपंकजा
थोदिकपंकगंगव्यकलशं तीर्थोदककुंभाधिवासयेत्॥ वापीकूपयोः स्थापनेस्मिन्नवसरे तीर्थोदकपू
र्णान्रत्नगर्भान्सितवस्त्रयुग्ममाल्यचंदनभूषितान्पल्लवाननान्कलशान्वाप्याः कूपस्य वा च
तुर्षु [illegible] षु कृतसप्तधान्यपुंजेषु भाज्ये ब्रकलशमितिस्थापयेत्॥ ततआचार्यः पूर्वकुंडे बह्वृचो नियो
ज्य दक्षिणे यजुर्वेदिनो पश्चिमे सामगो उत्तरे थर्वणो तु पवेशयेत्॥ ततो वेद्यां दक्षिणतो यजमान
उपविश्य सर्वान् ऋत्विजो यजध्वमिति ब्रूयात्॥ ऋत्विजश्च मंत्र वरुणसूक्तानि जपध्वमिति जापकान् १३२
॥ द्वारपालांश्च॥ रात्रिसूक्तं च रौद्रं च पावमानं सुमंगलं॥ जपेयुः पौरुषं सूक्तं पूर्वतो बह्वृचाः पृथ
क्॥ शाक्रं रौद्रं च सौम्यं च कूष्मांडं जातवेदसं॥ सौरं सूक्तं जपेयुस्ते दक्षिणे यजुर्विदः॥ वैराजं।

पौरुषं सूक्तं सौवर्णं रुद्रसंहितं॥ शैशवं पंचनिधनं गायत्रं ज्येष्ठसाम च॥ वामदेव्यं बृहत्साम गौरवीं सर
थंतरं॥ गवां व्रतं विकर्णं च रक्षोघ्नानि वसस्तथा॥ गायंति सामगा राजन्पश्चिम द्वारमाश्रितः॥ अथर्वणा
श्चोत्तरतः शांतिकं पौष्टिकं तथा॥ जपेन्यो दिशि देवमाश्रिता वरुणं प्रभुं॥ वारुणानि च सूक्तानि जपे
युः सर्वतो गणतो॥ अथाचार्यः स्वकुंडे कृतसंस्कारे स्मिन्प्रतिष्ठाप्य कुंडस्य चतुर्दिक्षु क्षीरोदक दध्युद
ककुशोदकगंधोदकसंज्ञकाकुंभान्स्थापयेत्॥ ऋत्विज आचार्यकुंडादग्निं सलब्ध्वा स्वक्रमेण
चतुर्षु कुंडेषु कृतसंस्कारेषु प्रणयन प्रतिकलशं शांतिकलशान्विन्यसेयुः॥ अथाचार्यो वरुण
देवत्यं यवमयं चरुं श्रपयित्वाज्यभागाविष्ट्वा स्वगृह्योक्तविधिना होमं कृत्वा वरुणाहुतीर्जुहोति॥ भूः
स्वाहा॥ भुवः स्वाहा॥ स्वः स्वाहा॥ भूर्भुवः स्वः स्वाहा॥ उशाय स्वाहा॥ भीमाय स्वाहा॥ धांताय स्वाहा॥

धुनवेस्वाहा॥सासक्तेस्वाहा॥अनियुग्मतेस्वाहा॥विक्षिपायस्वाहा॥इमंमेवरुणतत्वायामित्वन्नोअ
ग्नेसत्वन्नोअग्नेउदुत्तमंवरुणमितिपंचवारुणीभिःशमीसमिद्भिरौदुंबरीभिर्वामधुघृताक्ताभिःप्र
तिकुंडंप्रत्येकमष्टोत्तरशतमष्टाविंशतिर्वाहोमंकुर्युः॥आज्येनराजाग्निश्चमंडलदेवतानांक्रमेणस्वनाम
मंत्रैस्तिलैर्वादशदशाहुतीर्जुहुयुः॥यवईंद्रायेतिमरुद्भ्योविश्वकर्मन्नितिविश्वकर्मणे॥ततोवास्तुहो
मंकृत्वाअघोरेणाष्टोत्तरशतंतिलैःशांत्यर्थंहुत्वासर्वप्रायश्चित्तादिपूर्णांतंकर्मकृत्वावरुणायब
लिंदत्वालोकपालेभ्यश्चरात्र्यधिवासनंरात्रौजागरणंगीतवाद्यादिनाकुर्युः॥ततःप्रभातेस्नात्वा १३५
चार्यऋत्विग्युतोमंडलपूजादिहवनांतंकृत्वासांवत्सरप्रोक्तशुभेलग्नेगुरुःशुक्लवस्त्रकृतोष्णी
षोविन्यस्तजलचरोताम्रपात्रींसोपस्करामादायमहानदीजलपूर्णकलशंचग्राहयित्वासयजमा

नोवेदमंगलवाद्यघोषैर्जलाशयंगत्वावरुणमावाहयेत्॥तद्यथा॥नमस्तेविश्वगुप्तायनमोविष्णोअ
पांपते॥सान्निध्यंकुरुदेवेशसमुद्रेयत्प्रदत्तवै॥वापीकूपपयोमध्येंतरंयच॥मित्रमित्रोसिभक्तानांध
नदोधनकांक्षिणां॥वैद्योरोगाभिभूतानांशरण्यंशरणार्थिनामिति॥ततोगंधाद्यैर्नैवेद्यांतैःप्र
पूजयित्वापुरुषप्रमाणेजलेमकरमत्स्यादिरूपंवरुणंसंप्रवाहयेत्॥औषध्यादिकंचक्षिपेत्॥
ततस्तत्रपूर्वादिक्रमेणानंतायनमः॥महापद्मायनमः॥तक्षकायनमः॥कुलिकायनमः॥शेषा
यनमः॥वासुकयेनमः॥पद्मायनमः॥कर्कोटकायनमः॥इत्येतान्गंधादिनाकैःसंपूज्यनिक्षिपे
त्॥ततःपंचनिष्कस्निग्धैःदध्युदकादिकलशान्नदीजलकलशंग्राहयित्वाआपोहिष्ठेतिजलमध्येक्षि
पेत्॥अथयजमानतोदक्षिणां॥ततःदहीनमर्घ्याधिकांवाहटकमुद्राचतुर्तांसालवंशादिजोरक्तदो

षन्निनिर्मुक्तांप्रतिष्ठाप्यस्नपनयित्वाविधिनास्नापयित्वागंधैरालिप्यश्वेतपीतरक्तवर्णकैश्चार्चयित्वा
पुष्पाद्यैःसमभ्यर्च्यध्वजवस्त्रैर्येनिनादैर्मंगलानिस्वनैःपुष्करिण्यास्तडागस्यवामध्येयष्टिकांनिक्षिपे
त्॥अनेनमंत्रेणसमस्तनोगजटायविश्वाधारायैरक्षितायकुंफट्नवनागायनागाधिपतयेनम
इति॥नमोस्तुसर्पेभ्यइतितामभिमंत्र्यास्वमंत्रेणानुच्यएषवैप्रतिष्ठानामेतिप्रतिष्ठापयेत्॥अ
थयजमानस्तडागस्यपुष्करिण्यावादक्षिणतउदङ्मुखींकनकालंकृतांसितवस्त्रवेष्टितमस्त
कांगांपूजयित्वातस्याःपुच्छमादायोत्तरंतीरमुत्तरेत्॥तदाब्रह्मदेवगंगस्वसामगायति॥अथोत्तीर्य १३५
कर्त्तातांगांसदक्षिणांसामगायदत्वायर्वणेसाम्नापुनरापोहिष्ठेतिसृभिःपुत्रकलत्रज्ञाति
युक्तोवगाहनंकुर्यात्॥तत्रवापीकूपयोगोत्तरणंनास्ति॥अथयजलाभिमुखोयजमानस्तज्जले

लोत्सर्गंकुर्यात्॥तद्यथा॥अंजलिनाकुशतिलोदकंगृहीत्वाथैतत्पुष्करिण्यादिस्थितंजलंकाश्यप
गोत्रोदेवदत्तप्रपौत्रोयज्ञदत्तपौत्रोविष्णुमित्रपुत्रोविष्णुशर्माअशेषपापक्षयकामःस्वर्गका
मोवामोक्षकामोवास्वपितृणांस्वर्गादिकामोवासर्वभूतेभ्यःसाधारणलोकानांधर्मार्थकाममो
क्षसिद्धयेहमुत्सृजामि॥ततोमंत्राःपीवनीयाः॥सर्वसत्वेभ्यउत्सृष्टंमयैतज्जलमुत्तमं॥सेवं
तांसर्वभूतानिस्नानपानावगाहनैः॥सामान्यंसर्वभूतेभ्योमयादत्तमिदंजलं॥धर्मार्थकाममो
क्षेषुसाधनंस्यादहर्निशमितितोयमध्येनिक्षिपेत्॥ततोजलमातृभ्योनमइतिजलमातृःपू
जयित्वामंडपमागच्छेत्॥अथाचार्यःस्वेकुंडेष्टशतमघोरेणसत्वन्नइतिचसर्वप्रायश्चित्तं
हुणंचदत्वाततःशांतितोयेनयजमानमभिषिंचेत्॥अथयजमानःस्वकुंडलादिनापूजयि

त्वाचार्यं गंधाद्यैरभ्यर्च्य तस्मै गोसहस्रं तस्यार्द्धं गोशतं तदर्धं पंचविंशतिं दश षड्भिस्तदभावे सोपस्क
रां सवत्सां सहिरण्यां गां दद्यात्। ब्रह्मा प्रीयतामिति। ततो ऋत्विग्भ्यो ज्ञापकेभ्योऽन्येभ्यो ब्राह्मणे
भ्यश्च यथाशक्ति दक्षिणां दत्वा शिल्पिनः कर्मकरांश्च पूजयित्वा क्षमापयेत्। अथाचार्यः पूर्ववद्दि
ग्बलिं दद्यादिति। अथ यजमानो दिनचतुष्टयमनिवारितमन्नं प्रयच्छेत्। विप्रसहस्रं भोजयेद्व
तं वा यथाशक्ति वेति। अथाचार्यो दिनचतुष्टयं यावत्प्रत्यहं होमं शतसंख्यया कुर्यात्। चतुर्थेऽह्नि च
हरिं स्थापयित्वा पूर्वोक्तिमंत्रैः पूर्ववद्धोमं कुर्यात्। यजमानेन दक्षिणा यथाशक्ति दातव्या। ततः सर्व २३६
र्थसिद्धिर्भवति। पूर्ववत्सर्गगात्रेषु विधिः॥ इति वापीकूपतडागाद्युद्यापनं॥ अथ वृक्षोद्यापनमु
च्यते। तत्रैव वारुणप्रतिष्ठावत्सर्वं कर्म इत्यादि कृत्वा शुभे दिने शुभेन नक्षत्रे विप्रकथिते वृक्षोद्या

पनं कुर्यात्। प्रातः पुण्याहवाचनं। मातृपूजनमाभ्युदयिकं च कृत्वा ब्राह्मणमाचार्यमृत्विजोऽष्टौ चतुरो वा वृ
णुयात्। तद्यथा। अमुकगोत्रममुकवेदाध्यायिनममुकशर्माणं वृक्षोद्यापनहोमादिकर्म कारयितु
ममुना वासोयुगलादिना ब्राह्मणमाचार्यमृत्विजं वा महं वृणे। वृतोऽस्मीति प्रतिवचनं। मधुपर्कवि
धिना तान्प्रत्येकं पूजयित्वोद्यानभूमिं शांतिपाठेन गत्वा मंडपद्वारतोरणपूजादिकर्म निर्वर्त्य वेद्यां
परिवारसकमालिखेत्। तद्यथा। सप्तधा भाजिते क्षेत्रे कोणभागैर्द्विकोष्ठकैः। त्रिपदास्तु मरीच्याद्या ब्र
ह्मा नवपदो मतः। विदिक्स्थाः षट्पदाश्चाष्टावन्ये तु पदिकाः स्मृताः। ब्रह्मानारामरुद्राणां वास्तुरुक्तश्च
शांतये इति। मंडले विधिवद्देवताः संपूज्य वृक्षसमीपं गत्वा पताकान्तं वृतं कृत्वा सर्वौषधीकलशेन
या औषधीरिति स्नापयित्वा पिष्टादिना भूषयित्वा गंधैश्चानुलिप्य पुष्पमालादिभिरलंकृत्य पूजां नि

वेल्येसूक्ष्मरक्तवस्त्रेराछाद्यरक्तसूत्रेणविष्टयित्वात्वंचसोमनोवशोजिवातुंनमरामहे॥प्रि
यत्तोत्रोवनस्पतिरितिमंत्रेणगंधाद्यैःपूजयित्वाधूपार्थंगुग्गुलंदद्यात्॥ततःपूर्णान्कलशान्प्राच्या
दिदिक्षुसप्तधान्येषाज्यिघ्रकलशामितिस्थापयेत्॥तत्समीपवर्त्तिनौवृक्षौपताकाद्यलंकृतारक्त
पीतश्वेतवर्णकैश्चर्चितारक्तसूत्रवेष्टिताश्चकुशमूलाःकलशाःकर्त्तव्याः॥हेममयानिपंचदश
फलानिरत्नबीजरत्नयुतानिसौवर्णसूचीशलाकाच्छुरिकान्वितानिताम्रपात्र्यांकृत्वावेद्यांम
धिवासयेत्॥अथसूतोमंडपमागत्यतत्रसूर्यमंडलघोषेणगंधादिपूर्वकंमिंद्रादिभ्योलोक १३२
पालेभ्यस्वस्वमंत्रैर्बलिंदत्वात्र्यंबकमितिमृत्युभ्यश्चेत्यधिवासनं॥प्रभातेकृतस्नानआचार्य
र्त्विग्युतःकलशःपूजादिवस्यंतंकृत्वाकुंडेग्निंप्रतिष्ठाप्यवनस्पतिदेवस्यंचरुंश्रपयित्वागृह्य

क्तविधिनाहोमंकृत्वावनस्पतिदैवत्येनमंत्रेणपलाशसमिधमष्टशतमाज्येनयवैःकृष्णतिलैश्च
हुत्वापूर्वकल्पितैःकलशैर्मंत्रैःपादपंयौस्नापयित्वातस्यजातकर्मादिगोदानपर्यंतंकर्मसं
स्कारजातंस्वगृह्योक्तविधिनाकुर्यात्॥तत्रसुवर्णभूम्याकर्णवेधंसुवर्णशलाकयांजनंसौवर्ण
क्षुरेणचूडाकर्ममेखलांमुंजमयींवासःपरिधापयेत्॥ततोविवाहंवृक्षस्यमालसामाधव्या
सहवयजंत्यासहकुर्यात्॥एषवैप्रतिष्ठानामेतिप्रतिष्ठाप्यसर्वप्रायश्चित्तंकृत्वापूर्णांदत्वा॥ कृतिं ५
श्वेतवस्त्रयुतांसुवर्णशृंगींरौप्यक्षुरांकांस्योपदोहिनींप्राङ्मुखींगांवृक्षमध्येसमुत्सृजेत्॥त
तोवाद्यमंगलैःपूर्वकल्पितैःकलशैराचार्योभिषेकमंत्रैर्वारुणैर्यजमानमभिषिंचेत्॥कृता
भिषेकोयजमानःपुष्पांजलिंगृहीत्वावृक्षंप्रार्थयेत्॥येवाक्षिवनःशिखरिणांशिरसोविभूषाये

नंदनादिषुवनेषुकृतप्रतिष्ठाः॥येकामदाःसुरतरोरगकिंनराणांतेमेनतस्यदुहितार्त्तिहरानवंश
एतद्विजातिविधिवत्कृतोकृताशःपश्यत्वयंशिशिरदीधितिरंबरस्थः॥त्वंरत्नपुत्रपरिकल्पनया
दत्तोसिकार्यसदैवभवताममपुत्रकार्यं॥इत्युक्त्वादत्तंपुनर्बोलयित्वादत्तपात्रेषुवदनंपश्यन्
इमंमंत्रंप्रयोजयेत्॥अंगादंगात्संभवतिहृदयादधिजायसे॥आत्मावैपुत्रनामासिसंजीवश
रदःशतं॥इतिब्राह्मणस्यमंत्रपाठः॥इतरस्तूष्णीं॥ततःऋत्विजोगोनिर्वस्त्रकेकरणअंगुली
यादिकैश्चस्वविभवानुसारेणपूजयेत्॥आचार्यंतद्विगुणंमोक्षयेंगांचपयस्विनींतस्मैदद्यात् १२९
दिनचतुष्टयपर्यंतंदीनानाथेभ्योभोजनंज्ञातिबंधुबांधवेभ्यश्चदद्यात्॥चतुर्थेह्निसमिद्धि
राज्येनयवैःकृसतिलैश्चकृत्वाशक्त्यादक्षिणांदद्यात्॥सर्वान्कामानवाप्नोतिफलंचोत्तमम

कृते॥यश्चैकमपिराजेंद्रदत्तंसंस्थापयेन्नरः॥सोपिस्वर्गेवसेन्मर्त्योयावदिंद्राश्चतुर्दश॥अ
श्वत्थमेकंपिचुमंदमेकंन्यग्रोधमेकंदशचिंचिणीकं॥कपित्थबिल्वामलकीत्रयंचपंचाम्ररोपी
नरकंनपश्येत्॥मृतान्भव्यान्नविष्यांश्चतारयंतोमसंमितान्॥परमांसिद्धिमाप्नोतिपुन
रावृत्तिदुर्लभां॥पुत्रैर्विनानसुगतिर्भवतेनराणांदुःपुत्रकैरपितथाभयलोकनाशः॥एतद्विचार्यसु
धियातरवःपृथिव्यांपुराणविधिनापरिकल्पनीयाः॥नतारमाशिरःस्फुरन्मुकुटरारन्मरीचिच्छटा
च्छतानविलसत्कलेनखमपूरवद्धंसाचितं॥दधत्सुतरुणारुणप्रतिकसत्सराजश्रियंगणे
शचरणद्वयंकृततीस्त्रायतांवाचंनोप्युचितंप्रपंचरसवित्तोयस्याश्चत्फज्वलामुक्तावलीरा
ज्यभोककरतलेनिर्युक्तमुकेवस्तसत्॥स्वंगारादिरसार्णवामृतघटीमाधवेनयंत्रस्थितासिंचैति

सततंसमस्तसुमनःसंतानकल्पद्रुमान्॥ जितेंद्रनीजयकृतितत्समास्कसुरवसुरारैर्श्रुनदंस
देवरमासुरवांभोरुकृत्वापूर्णांकृतिंदत्वा॥ श्वेतवस्त्रयुतांसुवर्णश्रृंगींरोप्यखुरांकांस्योपदोहींश
श्रुरवींगांद्वस्यमध्येसमुत्थ्य॥ ततोवाद्यमंगलैःपूर्वकल्पितैःकलशैराचार्योभिषेकमंत्रैर्वीरुणैर्य
जमानमभिषिंचेत्॥ कृताभिषेजमानःपुष्पांजलिंगृहीत्वाद्भुतंप्रार्थयेत्॥ येशाश्विनःशिरवरि
णां॥ क्षीरसोन्नृषायेनंदनादिषुवनेतःप्रतिष्ठा॥ येकामदाःसुरतरोमरगकिंनराणांतेमनतस्य
दुहितांविहरानवंत्॥ एतद्विजातिविधिवत्सकृताशःपश्यत्वयंशिशिरदीधितिरंबरस्थः॥ १३९
त्वंद्रष्टुपुत्रपरिकल्पनयाद्भुतोसिकार्यसिदेवमवतामकार्यं॥ इत्युक्त्वाद्भुतंपुनःपुनर्लोलयि
त्वाद्भुतपात्रेस्ववदनंपश्यन्॥ ईमंमंत्रंप्रयोजयेत्॥ अंगादंगवसिद्धदयात्दधिजायसे॥ आ।

स्वपसंबुजार्चनरतःकौश्रीराघवर्योभवत्सूरिर्न्द्रियशान्प्रशांतबलवसुत्रैषणादिचयन्॥ अस्यैत
जगत्प्रतत्यविरतःकारण्यपुण्येनवस्तारुण्येनमदेस्मुनिश्रिवसदायोगम्यतेदुःखवान्॥ सोज
नावसतिस्त्रिविक्रमइतिप्रख्यात्दिजन्मक्षितिबल्लिरेयकमितिःकृतातिथिजनप्रीतिस्थिरासुःसु
तः॥ एकांतश्चविचित्रसूत्ररचनापाथोधिर्मथाक्षचलःश्रीमद्दुर्गमदुर्गहिर्तितटिनीकल्लोलवन्कोम
हात्॥ छंदःकंदनपालनप्रविलसज्वरौरुदानांबुदोलंकारावणकुंनसंनत्रमुनीःकाव्यार्यचंद्रो
दयः॥ तेनेहंविहितासर्वदेवस्थापनपद्धतिः॥ शिष्याणामाचार्यतांलोकेनयतीनंदनांचिरं॥ ॥इति १४०
श्रीरघुसूरिसूनुश्रीत्रिविक्रमसूरिविरचितायांआचार्यचंद्रिकाभिधानासर्वदेवप्रतिष्ठापद्ध
तिःसमाप्ता॥ ॥संवत्१९३२नावर्षेआषाडवदी२वारगुरौयेणलिखितंच-गणपतीनारायणेन॥

त्मा वै पुत्रनामासि स जीव शरदः शतं ॥ इति ब्राह्मणस्य मंत्रपाठ बिंबितं यज्ञंगणत्रमं संततमातनो-
ति ॥ आसीद्दिव्यांगिरसगोत्रसरोजसूर्यः श्रीमान्यमाध्यिंयमुनिः प्रथितः पृथिव्यां ॥ गौडेषु हृद्व-
लिनिस्थितिरस्य सक्तिर्बीलादिरन्वय ईवास्य मुविप्रसिद्धः ॥ वाक्यच्यायनेमुनिरुक्तति सदा रच्या त्या३
ता अथ यत्यद्भुतं वेतश्चारु विचारमध्वरविधौ बुद्धिः शरीरतपः ॥ यस्मिन्वक्षत्तां ततश्चंद्रादिता रारद्धि-
तां गोदानस्नानविधेः स यात्यधुरथेतेवासमेपुरे ॥ तद्वंस भूषणमणिर्मधुनायकोऽभूत्तस्माज्जदा-
धरसुधीः सुधीयामधीशः ॥ तस्यांगजो हरिरिव द्विजवर्यवंद्यः श्रीश्रीपतिर्निगममानसराजहं-
सः तस्य सुनुः सुनुतरः प्रसन्नः सज्जरीनाग्रणीः ॥ सांगस्सूरि रमेयानूनमाध्यंदिनविभूषणं ॥ स तत्सा-
हित्यसद्धाम धिनिरिवधिर्वेदाद्यडुश्चांबुधीः श्रीमाध्यंदिनधर्मडुधरीनरप्रौगेकधुर्यस्ततः ॥ सुनुर्वि